Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

चतुर्थः भागः - १

Learn Samskrit

THE LANGUAGE OF GITA

Part - 4.1

संस्कृतसंवर्धनप्रतिष्ठानम्

Samskrit for Specific Purpose Series - 3

गीतायाः भाषा

संस्कृतं पठ्यताम्

चतुर्थः भागः - १

Learn Samskrit

THE LANGUAGE OF GITA

PART - 4.1

ONGC-CSR Supported Project of
Samskrit Promotion Foundation

संस्कृतसंवर्धनप्रतिष्ठानम्
देहली

प्रकाशनम्
संस्कृतसंवर्धनप्रतिष्ठानम्
११२०४/५, वेदभवनम्, गौशालामार्गः
देहली - ११०००६

© प्रकाशकस्य एव

प्रथममुद्रणम् - २०१७
द्वितीयमुद्रणम् - २०२१

मुद्रणम्
प्रिन्टैक इन्टरनेशनल
ए-६/डी, झिलमिल इंडस्ट्रियल एरिया,
दिल्ली - ११००९५

परामर्शसमितिः

डॉ. चान्दकिरणसलूजा
चमूकृष्णशास्त्री (पद्मश्रीः)
डॉ. विश्वासः

लेखकाः

आचार्य अनूप शर्मा
अश्विनी राजेश लड्के
सौ. श्रद्धा उपाध्ये
श्रीदेव झा

ISBN -978-81-944709-5-3

Learn Samskrit - THE LANGUAGE OF GITA (PART - 4.1)
Fourth level text book to learn Samskrit through Gita.

Publisher - Samskrit Promotion Foundation
11204/5, Vedabhavanam, Gaushala Marg, Delhi-110006
Email: info@samskritpromotion.in
Pages - 6+298
Second Print - 2021
Printed at : Printech International
A-6/D, Jhilmil Industrial Area, Delhi-110095

Preface

The richness and vibrance of the Samskrit language is a fact acknowledged by scholars and intellectuals across the world. Over millennia, Samskrit has been the principal vehicle of the knowledge traditions and practices of Bharat, or India. This continuum of the language not only helped create innumerable branches of knowledge, but also resulted in an unmatched corpus of classical texts in every conceivable domain of human endeavor, thus laying the very foundations for the development and spectacular rise of the Bharatiya civilization.

However, in recent centuries, Samskrit became tagged as just a 'religious language', an impression that remains in the minds of many people throughout the world even to this day. This situation is due to several reasons: (१) while our day-to-day affairs were in our individual 'mother tongue', Samskrit remained restricted to the conduct of our religious ceremonies and programs; (२) over the last two centuries or so, there were concerted efforts to alienate Samskrit from our mainstream education; and (३) for a long time, there has been a deliberate campaign of disinformation regarding Samskrit, either because of ignorance or because of ulterior motives.

The truth is simple: Samskrit is the unparalled medium, the original language that has articulated all knowledge and wisdom in our region since eternity. The language of science and medicine has been Samskrit. The language of literature has been Samskrit. The language of philosophy and religion has been Samskrit. The language of the arts and music has been Samskrit. It is no wonder that mankind's first astronomical observations were recorded in Samskrit. Again, Samskrit is the only language that truly reveals the secrets of Yoga or Ayurveda.

Yet, we are confronted today with a peculiar situation. While there are countless works in Samskrit on a wide range of subjects, innumerable original works still remain unpublished. To make matters worse, even the published Samskrit literature is seen and studied only through the lens of religion. In order to bridge the disconnect between Samskrit and modern times, the need of the hour is the editing and publishing of ancient Samskrit texts, knowledge retrieval and dissemination, and research and re-interpretation. All this in Samskrit itself --- not in translation, as the essence can easily be lost. The challenges for Bharat are major, but shouldering the responsibilites would not only be life-fulfilling, but also offer our younger generation bright career opportunities and a great future in Samskrit studies.

Today, adult beginners of Samskrit are learning the language for specific purposes: e.g., to access the original texts on Yoga, Ayurveda, Vedanta, as well as the eternal repositories of wisdom such as the Arthashastra, the Vedas, the Upanishads, the Bhagavad-Gita. The vocabulary, verbal repertoire, syntax, semantics, etc., of every discipline differ from one to the other.

With such specific requirements, many modern-day learners find that the conventional language-centered approach is a roundabout route to accessing their information needs. This new Samskrit for Specific Purpose (SSP) series is uniquely tailored for them, offering a more focused methodology. Unlike the traditionally available Samskrit learning materials or courses, this SSP series is uniquely designed to facilitate the study of the target language through the target subject, and the study of the target subject through the target language.

The SSP series can be useful for all irrespective of age groups and occupations for both self-learning and classroom teaching. The SSP series course books herald a new era in Samskrit learning/education, and are supplemented with audio, video and e-learning modules. The approach of 'Samskrit through Samskrit' is extremely crucial. You can, and will, easily learn Samskrit directly, without the crutch of, say, English. Thus, in the broader context, Samskrit through Samskrit (STS) and Samskrit for Specific Purpose (SSP) will together provide a highly effective learning platform for even first-time learners.

In conclusion, a brief word of advice: although learners may feel, at the outset, that their intention to learn Samskrit is only to read and understand the target subject, they must keep in mind that sound/speech (listening and speaking) is the primary medium of a language. The practice of listening and speaking should precede the practice of the reading and writing.

The SSP series is designed to introduce Samskrit through simple conversations, to make learning both interesting and meaningful, followed with graded lessons. The series will not only make learners function adequately in Samskrit, but will also enable them eventually to read, comprehend and undertake studies in Samskrit in their specific interest area at a higher level.

SPF acknowledges and thanks Dr. H R Vishwasa, Mangalore for his guidance and advice in preparation of books of Bhagavad Gita Series.

अनुक्रमणिका

क्र०	अध्यायः	अध्यायनाम	पृष्ठसंख्या
१.	अथ प्रथमोऽध्यायः	अर्जुनविषादयोगः	१
२.	अथ द्वितीयोऽध्यायः	साङ्ख्ययोगः	७८
३.	अथ तृतीयोऽध्यायः	कर्मयोगः	२०१
४.	सम्पूर्ण-श्रीमद्भगवद्गीतायाः अकारादिक्रमेण पादानुक्रमणिका		२७५

सङ्केताक्षरसूची

अ.	अकारान्तः	र.	रकारान्तः (रेफान्तः)
आ.	आकारान्तः	म.	मकारान्तः
इ.	इकारान्तः	न.	नकारान्तः
ई.	ईकारान्तः	ध.	धकारान्तः
उ.	उकारान्तः	ज.	जकारान्तः
ऊ.	ऊकारान्तः	द.	दकारान्तः
ऋ.	ऋकारान्तः	चका.	चकारान्तः
ओ.	ओकारान्तः	त.	तकारान्तः
पुं.	पुंलिङ्गः	प.	पकारान्तः
नपुं.	नपुंसकलिङ्गः	श.	शकारान्तः
स्त्री.	स्त्रीलिङ्गः	सका.	सकारान्तः
प्र.	प्रथमा विभक्तिः	आत्म.	आत्मनेपदम्
द्वि.	द्वितीया विभक्तिः	पर.	परस्मैपदम्
तृ.	तृतीया विभक्तिः	लट्.	लट् लकारः
च.	चतुर्थी विभक्तिः	लिट्.	लिट् लकारः

पं.	पञ्चमी विभक्तिः	लोट्.	लोट् लकारः
ष.	षष्ठी विभक्तिः	लङ्.	लङ् लकारः
स.	सप्तमी विभक्तिः	विधिलिङ्.	विधिलिङ् लकारः
सम्बो.	सम्बोधनम्	लुङ्.	लुङ् लकारः
एक.	एकवचनम्	लृङ्.	लृङ् लकारः
द्विव.	द्विवचनम्	प्रपु.	प्रथमपुरुषः
बहु.	बहुवचनम्	मपु.	मध्यमपुरुषः
सर्व.	सर्वनामपदम्	उपु.	उत्तमपुरुषः
ह.	हकारान्तः	क्रियावि.	क्रियाविशेषणम्
व.	वकारान्तः		
ऽ	एतस्य नाम अवग्रहचिह्नम्, अकारं दर्शयितुम् एतत् चिह्नं स्थापितम् अस्ति ।		

उपसर्गाः

प्र	परा	अप	सम्	अनु	अव
निस्	निर्	दुस्	दुर्	वि	आङ्
नि	अधि	अपि	अति	सु	उद्
अभि	प्रति	परि	उप		

एते उपसर्गाः सन्ति । एतेषां प्रयोगः सर्वदा धातोः आदौ भवति ।
पदपरिचये व्याकरणांशे वा 'प्र' इत्यादयः ये शब्दाः लिखिताः सन्ति ते उपसर्गाः इति ज्ञातव्यम् ।

अस्मिन् ग्रन्थे क्रियापदं यस्मिन् पदे प्रयुक्तम् अस्ति तस्मिन् एव पदिनि धातोः निर्देशः कृतः अस्ति । अर्थात् प्रयोगं दृष्ट्वा पदनिर्देशः अस्ति ।

अथ प्रथमोऽध्यायः

१

अर्जुनविषादयोगः

धृतराष्ट्र उवाच - **धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।**
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥१.१॥

पदच्छेदः - धृतराष्ट्रः, उवाच - धर्मक्षेत्रे, कुरुक्षेत्रे, समवेताः, युयुत्सवः ।
मामकाः, पाण्डवाः, च, एव, किम्, अकुर्वत, सञ्जय ॥

अन्वयः - सञ्जय ! धर्मक्षेत्रे कुरुक्षेत्रे समवेताः युयुत्सवः मामकाः पाण्डवाः च एव किम् अकुर्वत ?

पदार्थः - धृतराष्ट्रः = महाराजः धृतराष्ट्रः, उवाच = उक्तवान्, सञ्जय = हे सञ्जय !, धर्मक्षेत्रे = धर्मप्रधानक्षेत्रे, कुरुक्षेत्रे = कुरुक्षेत्राख्ये प्रदेशे, समवेताः = एकत्रिताः, युयुत्सवः = योद्धुम् इच्छवः, मामकाः = मदीयाः, पाण्डवाः च = पाण्डुपुत्राः च, किम् अकुर्वत = किं कृतवन्तः ?

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
धृतराष्ट्रः	अ. पुं. प्र. एक.	उवाच	वच् (वच परिभाषणे) पर. कर्तरि लिट्. प्रपु. एक.
सञ्जय	अ. पुं. सम्बो. एक.	धर्मक्षेत्रे	अ. नपुं. स. एक. (विशेषणम्)
कुरुक्षेत्रे	अ. नपुं. स. एक. (विशेष्यम्)	समवेताः	अ. पुं. प्र. बहु.
युयुत्सवः	उ. पुं. प्र. बहु. (विशेषणम्)	मामकाः	अ. पुं. प्र. बहु. (विशेष्यम्)
पाण्डवाः	अ. पुं. प्र. बहु. (विशेष्यम्)	च	अव्ययम्
एव	अव्ययम्	किम्	किम्[1] - म. सर्व. नपुं. द्वि. एक/ अव्ययम्
अकुर्वत	कृ (डुकृञ् करणे) आत्म. कर्तरि लङ्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः

समवेता युयुत्सवः	समवेताः + युयुत्सवः	विसर्गसन्धिः (लोपः) ।
पाण्डवाश्च	पाण्डवाः + च	विसर्गसन्धिः (सकारः) श्चुत्वसन्धिः ।
चैव	च + एव	वृद्धिसन्धिः ।

(ख) समासः

धर्मक्षेत्रे	धर्मस्य क्षेत्रं धर्मक्षेत्रम्, तस्मिन् - षष्ठीतत्पुरुषः ।
कुरुक्षेत्रे	कुरूणां क्षेत्रं कुरुक्षेत्रम्, तस्मिन् - षष्ठीतत्पुरुषः ।

---

1. 'किम्' इति अव्ययपदम् अपि अस्ति । अस्य सर्वनामत्वेन अपि प्रयोगः भवति ।

(ग) कृदन्तः	क्षेत्रम्	क्षि (क्षि क्षये) + ष्ट्रन्।
	समवेताः	सम् + अव + इ (इण् गतौ) + क्त (कर्तरि)।
	युयुत्सवः	युध् (युध सम्प्रहारे) + सन् (इच्छार्थे) + उ (कर्तरि)।
	सञ्जय	सम् + जि (जि जये) + अच्, तत्सम्बुद्धौ।
(घ) तद्धितान्तः	मामकाः	अस्मद् (ममकादेशः) + अण्। मम इमे इति मामकाः।
	पाण्डवाः	पाण्डु + अण् (अपत्यार्थे)। पाण्डोः अपत्यानि पुमांसः इति पाण्डवाः।

भावस्पष्टीकरणम् -

अकुर्वत।	
के अकुर्वत ?	**मामकाः** अकुर्वत।
मामकाः **पुनश्च के** अकुर्वत ?	मामकाः **पाण्डवाः** च अकुर्वत।
कथम् भूताः मामकाः पाण्डवाः च अकुर्वत ?	**समवेताः** मामकाः पाण्डवाः च अकुर्वत।
समवेताः **पुनश्च कीदृशाः** मामकाः पाण्डवाः च अकुर्वत ?	समवेताः **युयुत्सवः** मामकाः पाण्डवाः च अकुर्वत।
कुत्र समवेताः युयुत्सवः मामकाः पाण्डवाः च अकुर्वत ?	**कुरुक्षेत्रे** समवेताः युयुत्सवः मामकाः पाण्डवाः च अकुर्वत।
कीदृशे कुरुक्षेत्रे समवेताः युयुत्सवः मामकाः पाण्डवाः च अकुर्वत ?	**धर्मक्षेत्रे** कुरुक्षेत्रे समवेताः युयुत्सवः मामकाः पाण्डवाः च अकुर्वत।
धर्मक्षेत्रे कुरुक्षेत्रे समवेताः युयुत्सवः मामकाः पाण्डवाः च **किम्** अकुर्वत ?	
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**सञ्जय !**

तात्पर्यम् - हे सञ्जय ! मत्पुत्राः पाण्डुपुत्राश्च युद्धं कर्तुम् उत्सुकाः सन्तः धर्मक्षेत्रे कुरुक्षेत्रे सम्मिल्य किम् अकुर्वन् ? इति धृतराष्ट्रः सञ्जयं पृष्टवान्।

सञ्जय उवाच - **दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा।**
आचार्यमुपसङ्गम्य राजावचनमब्रवीत्॥१.२॥

पदच्छेदः -

सञ्जयः, उवाच - दृष्ट्वा, तु, पाण्डवानीकम्, व्यूढम्, दुर्योधनः, तदा।
आचार्यम्, उपसङ्गम्य, राजा, वचनम्, अब्रवीत्॥

अन्वयः - तदा तु व्यूढं पाण्डवानीकं दृष्ट्वा राजा दुर्योधनः आचार्यम् उपसङ्गम्य वचनम् अब्रवीत्।

पदार्थः - सञ्जयः = सञ्जयनामकः सेवकः, उवाच = उक्तवान्, तदा तु = तदानीं तु, व्यूढम् = व्यूहत्वेन स्थापितम्, पाण्डवानीकम् = पाण्डवसैन्यम्, दृष्ट्वा = अवलोक्य, राजा = नृपः, दुर्योधनः = दुर्योधनः, आचार्यम् = गुरुं द्रोणम्, उपसङ्गम्य = उपसृत्य, वचनम् = वाक्यम्, अब्रवीत् = अवदत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सञ्जयः	अ. पुं. प्र. एक.	उवाच	वच् (वच परिभाषणे) पर. कर्तरि लिट्. प्रपु. एक.
तदा	अव्ययम्	तु	अव्ययम्
व्यूढम्	अ. नपुं. द्वि. एक. (विशेषणम्)	पाण्डवानीकम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
दृष्ट्वा	क्त्वान्तम् अव्ययम्	राजा	राजन्- न. पुं. प्र. एक. (विशेषणम्)
दुर्योधनः	अ. पुं. प्र. एक. (विशेष्यम्)	आचार्यम्	अ. पुं. द्वि. एक.
उपसङ्गम्य	ल्यबन्तम् अव्ययम्	वचनम्	अ. नपुं. द्वि. एक.
अब्रवीत्	ब्रू (ब्रूञ् व्यक्तायां वाचि) पर. कर्तरि लङ् प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	पाण्डवानीकं व्यूढम्	पाण्डवानीकम् + व्यूढम्	अनुस्वारसन्धिः।
	व्यूढं दुर्योधनः	व्यूढम् + दुर्योधनः	अनुस्वारसन्धिः।
	दुर्योधनस्तदा	दुर्योधनः + तदा	विसर्गसन्धिः (सकारः)।
(ख) समासः	पाण्डवानीकम्	पाण्डवानाम् अनीकं पाण्डवानीकम्, तत् - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	दृष्ट्वा	दृश् (दृशिर् प्रेक्षणे) + क्त्वा।	
	व्यूढम्	वि + वह् (वह प्रापणे) + क्त (कर्मणि) आकारविशेषवत्त्वेन विभक्तम् इत्यर्थः, तत्।	
	दुर्योधनः	दुर् + युध् (युध सम्प्रहारे) युच्।	
	आचार्यः	आ + चर् (चर गतिभक्षणयोः) + ण्यत्। आचरणीयः (सेवनीयः) आचार्यः।	
	उपसङ्गम्य	उप + सम् + गम् (गम्लृ गतौ) + ल्यप्	
	वचनम्	वच् (वच परिभाषणे) + ल्युट् (करणे) उच्यते अनेन इति वचनम्।	

भावस्पष्टीकरणम् -

अब्रवीत्।	
कः अब्रवीत्?	**दुर्योधनः** अब्रवीत्।
कीदृशः दुर्योधनः अब्रवीत्?	**राजा** दुर्योधनः अब्रवीत्।
राजा दुर्योधनः **किम्** अब्रवीत्?	राजा दुर्योधनः **वचनम्** अब्रवीत्।
राजा दुर्योधनः **किं कृत्वा** वचनम् अब्रवीत्?	राजा दुर्योधनः **उपसङ्गम्य** वचनम् अब्रवीत्।
राजा दुर्योधनः **कम्** उपसङ्गम्य वचनम् अब्रवीत्?	राजा दुर्योधनः **आचार्यम्** उपसङ्गम्य वचनम् अब्रवीत्।
पुनश्च किं कृत्वा राजा दुर्योधनः आचार्यम् उपसङ्गम्य वचनम् अब्रवीत्?	**पाण्डवानीकं दृष्ट्वा** राजा दुर्योधनः आचार्यम् उपसङ्गम्य वचनम् अब्रवीत्।
कीदृशं पाण्डवानीकं दृष्ट्वा राजा दुर्योधनः आचार्यम् उपसङ्गम्य वचनम् अब्रवीत्?	**व्यूढं** पाण्डवानीकं दृष्ट्वा राजा दुर्योधनः आचार्यम् उपसङ्गम्य वचनम् अब्रवीत्।
कदा व्यूढं पाण्डवानीकं दृष्ट्वा राजा दुर्योधनः आचार्यम् उपसङ्गम्य वचनम् अब्रवीत्?	**तदा तु** व्यूढं पाण्डवानीकं दृष्ट्वा राजा दुर्योधनः आचार्यम् उपसङ्गम्य वचनम् अब्रवीत्।

तात्पर्यम् - तदा व्यूहरूपेण स्थापितं पाण्डवानां सैन्यं दृष्ट्वा राजा दुर्योधनः गुरोः द्रोणाचार्यस्य समीपं गत्वा इदं वचनम् अवदत्।

पश्यैतां पाण्डुपुत्राणामाचार्य महतीं चमूम्।
व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता ॥१.३॥

पदच्छेदः - पश्य, एताम्, पाण्डुपुत्राणाम्, आचार्य, महतीम्, चमूम्।
व्यूढाम्, द्रुपदपुत्रेण, तव, शिष्येण, धीमता ॥

अन्वयः - भोः आचार्य! तव धीमता शिष्येण द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणाम् एतां महतीं चमूं पश्य।

पदार्थः - आचार्य = भोः द्रोणाचार्य, तव = भवतः, धीमता = बुद्धिमता, शिष्येण = छात्रेण, द्रुपदपुत्रेण = धृष्टद्युम्नेन, व्यूढाम् = व्यूहरूपेण स्थापिताम्, पाण्डुपुत्राणाम् = पाण्डवानाम्, एताम् = एनाम्, महतीम् = बृहतीम्, चमूम् = सेनाम्, पश्य = वीक्षस्व।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
आचार्य	अ. पुं. सम्बो. एक.	तव	युष्मद् द. सर्व. ष. एक.
धीमता	धीमत्- त. पुं. तृ. एक. (विशेषणम्)	शिष्येण	अ. पुं. तृ. एक. (विशेष्यम्)
द्रुपदपुत्रेण	अ. पुं. तृ. एक.	व्यूढाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
पाण्डुपुत्राणाम्	अ. पुं. ष. बहु.	एताम्	एतद् द. सर्व. स्त्री. द्वि. एक. (विशेषणम्)
महतीम्	ई. स्त्री. द्वि. एक. (विशेषणम्)	चमूम्	ऊ. स्त्री. द्वि. एक. (विशेष्यम्)
पश्य	पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लोट् मपु. एक.		

व्याकरणम् -

(क) सन्धिः पश्यैताम् — पश्य + एताम् — वृद्धिसन्धिः।
महतीं चमूम् — महतीम् + चमूम् — अनुस्वारसन्धिः।
व्यूढां द्रुपदपुत्रेण — व्यूढाम् + द्रुपदपुत्रेण — अनुस्वारसन्धिः।

(ख) समासः पाण्डुपुत्राणाम् — पाण्डोः पुत्राः पाण्डुपुत्राः, तेषाम् - षष्ठीतत्पुरुषः।
द्रुपदपुत्रेण — द्रुपदस्य पुत्रः द्रुपदपुत्रः, तेन - षष्ठीतत्पुरुषः।

(ग) कृदन्तः व्यूढाम् — वि + वह् (वह प्रापणे) + क्त (कर्मणि), ताम्।
आचार्यः — आ + चर् (चर गतिभक्षणयोः) + ण्यत् आचरणीयः (सेवनीयः) आचार्यः।
शिष्येण — शास् (शासु अनुशिष्टौ) + क्यप्, तेन।

(घ) तद्धितान्तः धीमता — धी + मतुप्। धीः अस्य अस्मिन् वा अस्ति इति धीमान्, तेन।

भावस्पष्टीकरणम् -

पश्य।	
कां पश्य ?	**एतां** चमूं पश्य।
कीदृशीम् एतां चमूं पश्य ?	**महतीम्** एतां चमूं पश्य।
केषां महतीम् एतां चमूं पश्य ?	**पाण्डुपुत्राणां** महतीम् एतां चमूं पश्य।
कीदृशीं पाण्डुपुत्राणां महतीम् एतां चमूं पश्य ?	**व्यूढां** पाण्डुपुत्राणां महतीम् एतां चमूं पश्य।
केन व्यूढां पाण्डुपुत्राणां महतीम् एतां चमूं पश्य ?	**द्रुपदपुत्रेण** व्यूढां पाण्डुपुत्राणां महतीम् एतां चमूं पश्य।

कीदृशेन द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणां महतीम् एतां चमूं पश्य ?	**शिष्येण** द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणां महतीम् एतां चमूं पश्य ।
पुनश्च कीदृशेन द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणां महतीम् एतां चमूं पश्य ?	**धीमता** शिष्येण द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणां महतीम् एतां चमूं पश्य ।
कस्य धीमता शिष्येण द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणां महतीम् एतां चमूं पश्य ?	**तव** धीमता शिष्येण द्रुपदपुत्रेण व्यूढां पाण्डुपुत्राणां महतीम् एतां चमूं पश्य ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**आचार्य !**

तात्पर्यम् - भोः आचार्य ! तव चतुरेण शिष्येण धृष्टद्युम्नेन पाण्डवानां महत् सैन्यमिदं व्यूहरूपेण स्थापितम् अस्ति । इदं पश्य ।

अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥१.४॥
धृष्टकेतुश्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित्कुन्तिभोजश्च शैब्यश्च नरपुङ्गवः ॥१.५॥
युधामन्युश्च विक्रान्त उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥१.६॥

पदच्छेदः - अत्र, शूराः, महेष्वासाः, भीमार्जुनसमाः, युधि ।
युयुधानः, विराटः, च, द्रुपदः, च, महारथः ॥
धृष्टकेतुः, चेकितानः, काशिराजः, च, वीर्यवान् ।
पुरुजित्, कुन्तिभोजः, च, शैब्यः, च, नरपुङ्गवः ॥
युधामन्युः, च, विक्रान्तः, उत्तमौजाः, च, वीर्यवान् ।
सौभद्रः, द्रौपदेयाः, च, सर्वे, एव, महारथाः ॥

अन्वयः - अत्र युधि युयुधानः, विराटः, महारथः च द्रुपदः, धृष्टकेतुः, चेकितानः, वीर्यवान् च काशिराजः, पुरुजित्, कुन्तिभोजः, नरपुङ्गवः च शैब्यः, विक्रान्तः च युधामन्युः, वीर्यवान् च उत्तमौजाः सौभद्रः, द्रौपदेयाः च (इति) भीमार्जुनसमाः शूराः सर्वे एव महेष्वासाः महारथाः (सन्ति) ।

पदार्थः - अत्र = अस्मिन् स्थले, युधि = युद्धे, युयुधानः = युयुधानः, विराटः = विराटः, महारथः = योधानां दशसहस्रेण योद्धा, द्रुपदः = द्रुपदः, धृष्टकेतुः = धृष्टकेतुः, चेकितानः = चेकितानः, वीर्यवान् = वीरः,

काशिराजः = काशिराजः, पुरुजित् = पुरुजित्, कुन्तिभोजः = कुन्तिभोजः, नरपुङ्गवः = नरेषु श्रेष्ठः, शैब्यः = शिबेः राजा, विक्रान्तः = पराक्रमशीलः, युधामन्युः = युधामन्युः, उत्तमौजाः = बलवान्, सौभद्रः = अभिमन्युः, द्रौपदेयाः = द्रौपद्याः पञ्च पुत्राः उपपाण्डवाः, भीमार्जुनसमाः = भीमार्जुनाभ्यां समानाः, शूराः = वीराः, सर्वे = सकलाः, महेष्वासाः = महाचापवन्तः, महारथाः एव = महारथाः एव ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अत्र	अव्ययम्	युधि	युध् - ध. स्त्री. स. एक.
युयुधानः	अ. पुं. प्र. एक. (विशेष्यम्)	विराटः	अ. पुं. प्र. एक. (विशेष्यम्)
महारथः	अ. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
द्रुपदः	अ. पुं. प्र. एक. (विशेष्यम्)	धृष्टकेतुः	उ. पुं. प्र. एक. (विशेष्यम्)
चेकितानः	अ. पुं. प्र. एक. (विशेष्यम्)	वीर्यवान्	वीर्यवत् - त. पुं. प्र. एक. (विशेषणम्)
काशिराजः	अ. पुं. प्र. एक. (विशेष्यम्)	पुरुजित्	पुरुजित् - त. पुं. प्र. एक. (विशेष्यम्)
कुन्तिभोजः	अ. पुं. प्र. एक. (विशेष्यम्)	नरपुङ्गवः	अ. पुं. प्र. एक. (विशेषणम्)
शैब्यः	अ. पुं. प्र. एक. (विशेष्यम्)	विक्रान्तः	अ. पुं. प्र. एक. (विशेषणम्)
युधामन्युः	उ. पुं. प्र. एक. (विशेष्यम्)	वीर्यवान्	वीर्यवत्- त. पुं. प्र. एक. (विशेषणम्)
उत्तमौजाः	उत्तमौजस् - सका. पुं. प्र. एक. (विशेषण)	सौभद्रः	अ. पुं. प्र. एक. (विशेष्यम्)
द्रौपदेयाः	अ. पुं. प्र. बहु. (विशेष्यम्)	भीमार्जुनसमाः	अ. पुं. प्र. बहु. (विशेषणम्)
शूराः	अ. पुं. प्र. बहु. (विशेषणम्)	सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
एव	अव्ययम्	महेष्वासाः	अ. पुं. प्र. बहु. (विशेषणम्)
महारथाः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	शूरा महेष्वासाः	शूराः + महेष्वासाः	विसर्गसन्धिः (लोपः) ।
	महेष्वासा भीमार्जुनसमाः	महेष्वासाः + भीमार्जुनसमाः	विसर्गसन्धिः (लोपः) ।
	भीमार्जुनसमा युधि	भीमार्जुनसमाः + युधि	विसर्गसन्धिः (लोपः) ।
	युयुधानो विराटः	युयुधानः + विराटः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	विराटश्च	विराटः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	द्रुपदश्च	द्रुपदः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।

	धृष्टकेतुश्चेकितानः	धृष्टकेतुः + चेकितानः	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	काशिराजश्च	काशिराजः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	कुन्तिभोजश्च	कुन्तिभोजः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	शैब्यश्च	शैब्यः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	युधामन्युश्च	युधामन्युः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	विक्रान्त उत्तमौजाः	विक्रान्तः + उत्तमौजाः	विसर्गसन्धिः (लोपः)।
	उत्तमौजाश्च	उत्तमौजाः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	सौभद्रो द्रौपदेयाः	सौभद्रः + द्रौपदेयाः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	द्रौपदेयाश्च	द्रौपदेयाः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	सर्व एव	सर्वे + एव	यान्तवान्तसन्धिः, यलोपः, प्रकृतिभावः[1]।

(ख) समासः	महेष्वासाः	महान् इष्वासः येषां ते महेष्वासाः - बहुव्रीहिः।
	भीमार्जुनसमाः	भीमश्च अर्जुनश्च भीमार्जुनौ - द्वन्द्वः।
		भीमार्जुनाभ्यां समाः - तृतीयातत्पुरुषः।
		भीमार्जुनयोः समाः इति वा भीमार्जुनसमाः - षष्ठीतत्पुरुषः।
	महारथः	महान् रथः यस्य सः - बहुव्रीहिः।
	काशिराजः	काश्याः राजा काशिराजः - षष्ठीतत्पुरुषः।
	नरपुङ्गवः	पुमांश्चासौ गौश्च पुङ्गवः (श्रेष्ठः) - कर्मधारयः।
		नरेषु पुङ्गवः - सप्तमीतत्पुरुषः।
	उत्तमौजाः	उत्तमम् ओजः यस्य सः - बहुव्रीहिः।
(ग) कृदन्तः	युधि	युध् (युध सम्प्रहारे) + क्विप् (भावे) युद्, तस्याम्।
(घ) तद्धितान्तः	वीर्यवान्	वीर्य + मतुप्, वीर्यम् अस्य अस्मिन् वा अस्ति।
	शैब्यः	शिबि + ष्यञ् (राजा इत्यर्थे) शिबेः राजा।
	सौभद्रः	सुभद्रा + अण् (अपत्यार्थे) सुभद्रायाः अपत्यं पुमान्।
	द्रौपदी	द्रुपद + अण् (अपत्यार्थे) द्रुपदस्य अपत्यं स्त्री।
	द्रौपदेयाः	द्रौपदी + ढक् (अपत्यार्थे) द्रौपद्याः अपत्यानि पुमांसः।

भावस्पष्टीकरणम् -

महेष्वासाः (सन्ति)।	
कीदृशाः महेष्वासाः सन्ति ?	**शूराः** महेष्वासाः सन्ति।

1. अत्र प्रकृतिभावशब्देन व्याकरणशास्त्रे प्रसिद्धः पारिभाषिकः प्रकृतिभावः नास्ति, अपि तु सन्धिकार्यभावः प्रकृतिभावः इति स्वीकरणीयम्। एवमेव अन्यत्रापि ज्ञेयम्।

पुनश्च कीदृशाः शूराः महेष्वासाः सन्ति ?	**भीमार्जुनसमाः** शूराः महेष्वासाः सन्ति ।
के पुनः भीमार्जुनसमाः शूराः महेष्वासाः सन्ति ?	**युयुधानः, विराटः, महारथः च द्रुपदः, धृष्टकेतुः, चेकितानः, वीर्यवान् च काशिराजः, पुरुजित्, कुन्तिभोजः, नरपुङ्गवः च शैब्यः, विक्रान्तः च युधामन्युः, वीर्यवान् च उत्तमौजाः सौभद्रः द्रौपदेयाः च** इति भीमार्जुनसमाः शूराः महेष्वासाः सन्ति ।
युयुधानः, विराटः ..... द्रौपदेयाः च इति भीमार्जुनसमाः शूराः महेष्वासाः **कीदृशाः** सन्ति ?	युयुधानः, विराटः ..... द्रौपदेयाः च इति भीमार्जुनसमाः शूराः महेष्वासाः **महारथाः** सन्ति ।
युयुधानः, विराटः ..... द्रौपदेयाः च इति भीमार्जुनसमाः शूराः **कति** महेष्वासाः महारथाः सन्ति ?	युयुधानः, विराटः ..... द्रौपदेयाः च इति भीमार्जुनसमाः शूराः **सर्वे एव** महेष्वासाः महारथाः सन्ति ।
कुत्र युयुधानः, विराटः द्रौपदेयाः च इति भीमार्जुनसमाः शूराः सर्वे एव महेष्वासाः महारथाः सन्ति ?	**युधि** युयुधानः, विराटः द्रौपदेयाः च इति भीमार्जुनसमाः शूराः सर्वे एव महेष्वासाः महारथाः सन्ति ।
कस्यां युधि युयुधानः, विराटः ..... द्रौपदेयाः च इति भीमार्जुनसमाः शूराः सर्वे एव महेष्वासाः महारथाः सन्ति ?	**अत्र** युधि युयुधानः, विराटः द्रौपदेयाः च इति भीमार्जुनसमाः शूराः सर्वे एव महेष्वासाः महारथाः सन्ति ।

तात्पर्यम् - अत्र पाण्डवसैन्ये युयुधानः विराटः इत्यादयः भीमार्जुनसमाः शूराः सर्वे धनुर्धराः महारथाः एव सन्ति ।

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते ॥१.७॥

पदच्छेदः - अस्माकम्, तु, विशिष्टाः, ये, तान्, निबोध, द्विजोत्तम ।
नायकाः, मम, सैन्यस्य, संज्ञार्थम्, तान्, ब्रवीमि, ते ॥

अन्वयः - द्विजोत्तम ! अस्माकं तु विशिष्टाः ये तान् निबोध । मम सैन्यस्य (ये) नायकाः तान् ते संज्ञार्थं ब्रवीमि ।

पदार्थः - द्विजोत्तम = हे द्विजोत्तम द्रोणाचार्य ! अस्माकं तु = अस्माकं कौरवाणां तु, विशिष्टाः = असाधारणाः, ये = ये योद्धारः, तान् = तान्, निबोध = जानीहि, मम = दुर्योधनस्य मम, सैन्यस्य = सेनायाः, नायकाः = ये सेनापतयः, तान् = तान् नायकान्, ते = तुभ्यम्, संज्ञार्थम् = सम्यक् ज्ञानार्थम्, ब्रवीमि = निवेदयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
द्विजोत्तम	अ. पुं. सम्बो. एक.	अस्माकम्	अस्मद्- द. सर्व. ष. बहु. (विशेष्यम्)
तु	अव्ययम्	ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)
विशिष्टाः	अ. पुं. प्र. बहु. (विशेषणम्)	तान्	तद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)
निबोध	नि + बुध् (बुध अवगमने) पर. कर्तरि लोट्. मपु. एक.	मम	अस्मद्- द. सर्व. ष. एक. (विशेष्यम्)
सैन्यस्य	अ. नपुं. ष. एक.	नायकाः	अ. पुं. प्र. बहु.
ते	युष्मद्- द. सर्व. च. एक.	संज्ञार्थम्	अ. नपुं. द्वि. एक. क्रियावि[1].
ब्रवीमि	ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः	अस्माकं तु	अस्माकम् + तु	अनुस्वारसन्धिः।
	विशिष्टा ये	विशिष्टाः + ये	विसर्गसन्धिः (लोपः)।
	नायका मम	नायकाः + मम	विसर्गसन्धिः (लोपः)।
	संज्ञार्थं तान्	संज्ञार्थम् + तान्	अनुस्वारसन्धिः।
(ख) समासः	द्विजोत्तमः	द्विजेषु उत्तमः - सप्तमीतत्पुरुषः।	
	संज्ञार्थम्	संज्ञायै इदम् - चतुर्थीतत्पुरुषः। (नित्यसमासः)	
(ग) कृदन्तः	विशिष्टः	वि + शिष् (शिष असर्वोपयोगे) + क्त। (कर्तरि) विशिष्यते इति विशिष्टः।	

भावस्पष्टीकरणम् -

विशिष्टाः।	
केषां विशिष्टाः ?	**अस्माकं** विशिष्टाः।
अस्माकं ये विशिष्टाः **तान् किं करोमि ?**	अस्माकं ये विशिष्टाः **तान् निबोध।**
नायकाः।	
कस्य नायकाः ?	**सैन्यस्य** नायकाः।
कस्य सैन्यस्य नायकाः ?	**मम** सैन्यस्य नायकाः।

1. क्रियाविशेषणं सर्वदा नपुंसकलिङ्गिकं द्वितीयाविभक्त्यन्तं च भवति।

तव सैन्यस्य (ये) नायकाः **तान् किं करोषि** ?	मम सैन्यस्य (ये) नायकाः **तान् ब्रवीमि** ।
तव सैन्यस्य (ये) नायकाः तान् **किमर्थं ब्रवीषि** ?	मम सैन्यस्य (ये) नायकाः तान् **संज्ञार्थं ब्रवीमि** ।
तव सैन्यस्य (ये) नायकाः तान् संज्ञार्थं **कस्मै** ब्रवीषि ?	मम सैन्यस्य (ये) नायकाः तान् संज्ञार्थं **ते** ब्रवीमि ।
अस्मिन् श्लोके सम्बोधनपदं **किम्** ?	**द्विजोत्तम !**

तात्पर्यम् - हे द्रोणाचार्य ! मम सैन्ये ये विशिष्टाः सेनापतयः सन्ति तान् भवान् जानाति एव । तथापि भवतः ज्ञानाय तेषां नामानि अहं स्मारयामि ।

भवान्भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
अश्वत्थामा विकर्णश्च सौमदत्तिस्तथैव च ॥१.८॥

पदच्छेदः - भवान्, भीष्मः, च, कर्णः, च, कृपः, च, समितिञ्जयः ।
अश्वत्थामा, विकर्णः, च, सौमदत्तिः, तथा, एव, च ॥

अन्वयः भवान् भीष्मः कर्णः समितिञ्जयः च कृपः अश्वत्थामा विकर्णः तथैव सौमदत्तिः च सन्ति ।

पदार्थः - भवान् = द्रोणाचार्यः, भीष्मः = पितामहः भीष्मः, कर्णः = कर्णः, समितिञ्जयः कृपः = रणजित् कृपाचार्यः, (समितिञ्जयः = युद्धनिपुणः), अश्वत्थामा = अश्वत्थामा, विकर्णः = विकर्णः, सौमदत्तिः = भूरिश्रवाः ।

पदपरिचयः -

पदम्	**विवरणम्**	**पदम्**	**विवरणम्**
भवान्	भवत्- त. पुं. प्र. एक. (विशेषणम्)	भीष्मः	अ. पुं. प्र. एक
कर्णः	अ. पुं. प्र. एक.	समितिञ्जयः	अ. पुं. प्र. एक. (विशेषण)
च	अव्ययम्	कृपः	अ. पुं. प्र. एक. (विशेष्यम्)
अश्वत्थामा	अश्वत्थामन्- न. पुं. प्र. एक. (विशेष्यम्)	विकर्णः	अ. पुं. प्र. एक.
तथा	अव्ययम्	एव	अव्ययम्
सौमदत्तिः	इ. पुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः

भीष्मश्च	भीष्मः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
कर्णश्च	कर्णः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
कृपश्च	कृपः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
विकर्णश्च	विकर्णः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।

	सौमदत्तिस्त	सौमदत्तिः + तथा	विसर्गसन्धिः (सकारः)।
	तथैव	तथा + एव	वृद्धिसन्धिः।
(ख) समासः	समितिञ्जयः	समितिं (युद्धं) जयति समितिञ्जयः - कर्तरि खश्प्रत्ययः उपपदसमासश्च।	
	अश्वत्थामा	अश्वस्य स्थामा इव स्थामा (स्थितिः) यस्य सः अश्वत्थामा - बहुव्रीहिः।	
	विकर्णः	विशिष्टौ कर्णौ यस्य सः विकर्णः - बहुव्रीहिः।	
(ग) तद्धितान्तः	सौमदत्तिः	सोमदत्त + इञ् (अपत्यार्थे)। सोमदत्तस्य अपत्यं पुमान्।	

भावस्पष्टीकरणम् -

सन्ति। (अध्याहृतम्)	
के के सन्ति ?	**भवान् भीष्मः कर्णः समितिञ्जयः कृपः अश्वत्थामा विकर्णः सौमदत्तिः च** सन्ति।

अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः।
नानाशस्त्रप्रहरणाः सर्वे युद्धविशारदाः ॥१.९॥

पदच्छेदः - अन्ये, च, बहवः, शूराः, मदर्थे, त्यक्तजीविताः।
नानाशस्त्रप्रहरणाः, सर्वे, युद्धविशारदाः ॥

अन्वयः - नानाशस्त्रप्रहरणाः शूराः सर्वे युद्धविशारदाः अन्ये च बहवः मदर्थे त्यक्तजीविताः।

पदार्थः - नानाशस्त्रप्रहरणाः = नैकविधानि शस्त्राणि प्रहर्तुं समर्थाः, शूराः = वीराः, सर्वे = सकलाः, युद्धविशारदाः = समरनिपुणाः, अन्ये = इतरे, बहवः = अनेके, मदर्थे = मम कृते, त्यक्तजीविताः = अर्पितप्राणाः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
नानाशस्त्रप्रहरणाः	अ. पुं. प्र. बहु. (विशेषणम्)	शूराः	अ. पुं. प्र. बहु. (विशेष्यम्)
सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	युद्धविशारदाः	अ. पुं. प्र. बहु. (विशेषणम्)
अन्ये	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	च	अव्ययम्
बहवः	उ. पुं. प्र. बहु. (विशेषणम्)	मदर्थे	अव्ययम्
त्यक्तजीविताः	अ. पुं. प्र. बहु. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः	शूरा मदर्थे	शूराः + मदर्थे	विसर्गसन्धिः (लोपः) ।
(ख) समासः	त्यक्तजीविताः	त्यक्तं जीवितं यैः ते - बहुव्रीहिः ।	
	नानाशस्त्रप्रहरणाः	नानाविधानि शस्त्राणि नानाशस्त्राणि - मध्यमपदलोपी तत्पुरुषः । नानाशस्त्राणि प्रहरणानि येषां ते नानाशस्त्रप्रहरणाः - बहुव्रीहिः ।	
	युद्धविशारदाः	युद्धे विशारदाः युद्धविशारदाः - सप्तमीतत्पुरुषः ।	
	मदर्थे	मम अर्थे - षष्ठीतत्पुरुषः । अर्थे कृते च द्वौ शब्दौ तादर्थ्येऽव्ययसंज्ञकौ - इति वचनात् अर्थे इत्येतत् अव्ययम् । तदन्तत्वात् अयमपि शब्दः अव्ययम् ।	

भावस्पष्टीकरणम् -

त्यक्तजीविताः (सन्ति) ।	
कस्मै त्यक्तजीविताः सन्ति ?	**मदर्थे** त्यक्तजीविताः सन्ति ।
के मदर्थे त्यक्तजीविताः सन्ति ?	**अन्ये** मदर्थे त्यक्तजीविताः सन्ति ।
अन्ये च **कति** मदर्थे त्यक्तजीविताः सन्ति ?	अन्ये च **बहवः** मदर्थे त्यक्तजीविताः सन्ति ।
कीदृशाः अन्ये च बहवः मदर्थे त्यक्तजीविताः सन्ति ?	**नानाशस्त्रप्रहरणाः** अन्ये च बहवः मदर्थे त्यक्तजीविताः सन्ति ।
नानाशस्त्रप्रहरणाः **पुनश्च कीदृशाः** अन्ये च बहवः मदर्थे त्यक्तजीविताः सन्ति ?	नानाशस्त्रप्रहरणाः **शूराः** अन्ये च बहवः मदर्थे त्यक्तजीविताः सन्ति ।
नानाशस्त्रप्रहरणाः शूराः **पुनश्च कीदृशाः** अन्ये च बहवः मदर्थे त्यक्तजीविताः सन्ति ?	नानाशस्त्रप्रहरणाः शूराः **युद्धविशारदाः** अन्ये च बहवः मदर्थे त्यक्तजीविताः सन्ति ।
नानाशस्त्रप्रहरणाः शूराः **कति** युद्धविशारदाः अन्ये च बहवः मदर्थे त्यक्तजीविताः सन्ति ?	नानाशस्त्रप्रहरणाः शूराः **सर्वे** युद्धविशारदाः अन्ये च बहवः मदर्थे त्यक्तजीविताः सन्ति ।

तात्पर्यम् - न केवलम् एतावन्तः, अन्येऽपि बहवः मदर्थं प्राणान् समर्पयितुं सिद्धाः बहुविधानि प्रहारसाधनानि धृतवन्तः समरनिष्णाताः विक्रमिणः सैन्ये सन्ति ।

अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितम् ।
पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितम् ॥१.१०॥

पदच्छेदः - अपर्याप्तम्, तद्, अस्माकम्, बलम्, भीष्माभिरक्षितम् ।
पर्याप्तम्, तु, इदम्, एतेषाम्, बलम्, भीमाभिरक्षितम् ॥

अन्वयः - अस्माकं भीष्माभिरक्षितं तद् बलम् अपर्याप्तम्। इदं तु एतेषां भीमाभिरक्षितं बलं पर्याप्तम् (अस्ति)।

पदार्थः - अस्माकम् = कौरवाणाम्, भीष्माभिरक्षितम् = भीष्मेण संरक्षितम्, तद् बलम् = तत् सैन्यम्, अपर्याप्तम् = असमर्थम्, एतेषां तु = पाण्डवानां पुनः, भीमाभिरक्षितम् = भीमेन संरक्षितम्, इदं बलम् = इदं सैन्यम्, पर्याप्तम् = समर्थम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अस्माकम्	अस्मद्- द. सर्व. ष. बहु. (विशेष्यम्)	भीष्माभिरक्षितम्	अ. नपुं. प्र. एक. (विशेषणम्)
तत्	तद्- द. सर्व. नपुं. प्र. एक. (विशेषणम्)	बलम्	अ. नपुं. प्र. एक. (विशेष्यम्)
अपर्याप्तम्	अ. नपुं. प्र. एक. (विशेषणम्)	इदम्	इदम्- म. सर्व. नपुं. प्र. एक. (विशेषणम्)
तु	अव्ययम्	एतेषाम्	एतद्- द. सर्व. पुं. ष. बहु. (विशेषणम्)
भीमाभिरक्षितम्	अ. नपुं. प्र. एक. (विशेषणम्)	पर्याप्तम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः

अपर्याप्तं तद्	अपर्याप्तम् + तत्	अनुस्वारसन्धिः।
तदस्माकम्	तत् + अस्माकम्	जश्त्वसन्धिः।
अस्माकं बलम्	अस्माकम् + बलम्	अनुस्वारसन्धिः।
बलं भीष्माभिरक्षितम्	बलम् + भीष्माभिरक्षितम्	अनुस्वारसन्धिः।
त्विदम्	तु + इदम्	यणसन्धिः।
पर्याप्तं तु	पर्याप्तम् + तु	अनुस्वारसन्धिः।
एतेषां बलम्	एतेषाम् + बलम्	अनुस्वारसन्धिः।
बलं भीमाभिरक्षितम्	बलम् + भीमाभिरक्षितम्	अनुस्वारसन्धिः।

(ख) समासः

अपर्याप्तम्	न पर्याप्तम् अपर्याप्तम् - नञ्तत्पुरुषः।
भीष्माभिरक्षितम्	भीष्मेण अभिरक्षितम् - तृतीयातत्पुरुषः।
भीमाभिरक्षितम्	भीमेन अभिरक्षितम् - तृतीयातत्पुरुषः।

(ग) कृदन्तः

पर्याप्तम्	परि + आप् (आप्लृ व्याप्तौ) + क्त। (कर्तरि)।
अभिरक्षितम्	अभि + रक्ष् (रक्ष पालने) + क्त (कर्मणि)।

भावस्पष्टीकरणम् -

अपर्याप्तम् ।	
किम् अपर्याप्तम् ?	**तद्** अपर्याप्तम् ।
तत् **किम्** अपर्याप्तम् ?	तद् **बलम्** अपर्याप्तम् ।
कीदृशं तद् बलम् अपर्याप्तम् ?	**भीष्माभिरक्षितं** तद् बलम् अपर्याप्तम् ।
केषां भीष्माभिरक्षितं तद् बलम् अपर्याप्तम् ?	**अस्माकं** भीष्माभिरक्षितं तद् बलम् अपर्याप्तम् ।
अस्माकं भीष्माभिरक्षितं तद् बलम् अपर्याप्तम् **इदं तु पर्याप्तम्** ।	
इदं तु **किं** पर्याप्तम् ?	इदं तु **बलं** पर्याप्तम् ।
इदं तु **कीदृशं** बलं पर्याप्तम् ?	इदं तु **भीमाभिरक्षितं** बलं पर्याप्तम् ।
इदं तु **केषां** भीमाभिरक्षितं बलं पर्याप्तम् ?	इदं तु **एतेषां** भीमाभिरक्षितं बलं पर्याप्तम् ।

तात्पर्यम् - यद्यपि अस्माकं सैन्यस्य रक्षकः भीष्मः तथापि सैन्यमिदम् असमर्थम् । पाण्डवानां सैन्यस्य रक्षकः यद्यपि भीमः तथापि तत्सैन्यम् अत्यन्तं समर्थम् इति मे प्रतिभाति ।

अयनेषु च सर्वेषु यथाभागमवस्थिताः ।
भीष्ममेवाभिरक्षन्तु भवन्तः सर्व एव हि ॥१.११॥

पदच्छेदः - अयनेषु, च, सर्वेषु, यथाभागम्, अवस्थिताः ।
भीष्मम्, एव, अभिरक्षन्तु, भवन्तः, सर्वे, एव, हि ॥

अन्वयः - सर्वेषु अयनेषु यथाभागम् अवस्थिताः भवन्तः सर्वे भीष्मम् एव अभिरक्षन्तु ।

पदार्थः - सर्वेषु = सकलेषु, अयनेषु = व्यूहानां द्वारेषु, यथाभागम् = स्वभागे, अवस्थिताः = स्थिताः, भवन्तः सर्वे = समस्ताः भवन्तः, भीष्मम् एव = भीष्माचार्यम् एव, अभिरक्षन्तु = संरक्षन्तु ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वेषु	अ. सर्व. नपुं. स. बहु. (विशेषणम्)	च	अव्ययम्
अयनेषु	अ. नपुं. स. बहु. (विशेष्यम्)	यथाभागम्	अव्ययम्
अवस्थिताः	अ. पुं. प्र. बहु. (विशेषणम्)	भवन्तः	भवत्- त. पुं. प्र. बहु. (विशेषणम्)
सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)	भीष्मम्	अ. पुं. द्वि. एक.

एव	अव्ययम्	हि	अव्ययम्
अभिरक्षन्तु	अभि+ रक्ष् (रक्ष पालने) पर. कर्तरि लोट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः एवाभिरक्षन्तु — एव + अभिरक्षन्तु सवर्णदीर्घसन्धिः ।
सर्व एव — सर्वे + एव यान्तवान्तादेशसन्धिः, यलोपः, प्रकृतिभावः ।

(ख) समासः यथाभागम् — भागम् अनतिक्रम्य यथाभागम् - अव्ययीभावः ।

(ग) कृदन्तः अवस्थिताः — अव + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि)
अयनेषु — अय् (अय गतौ) + ल्युट् (करणे) । अयन्ते (गच्छन्ति) एभिः इति अयनानि, तेषु ।

भावस्पष्टीकरणम् -

अभिरक्षन्तु ।	
के अभिरक्षन्तु ?	**भवन्तः** अभिरक्षन्तु ।
भवन्तः **कियन्तः** अभिरक्षन्तु ?	भवन्तः **सर्वे** अभिरक्षन्तु ।
कीदृशाः भवन्तः सर्वे अभिरक्षन्तु ?	**अवस्थिताः** भवन्तः सर्वे अभिरक्षन्तु ।
कथम् अवस्थिताः भवन्तः सर्वे अभिरक्षन्तु ?	**यथाभागम्** अवस्थिताः भवन्तः सर्वे अभिरक्षन्तु ।
कुत्र यथाभागम् अवस्थिताः भवन्तः सर्वे अभिरक्षन्तु ?	**अयनेषु** यथाभागम् अवस्थिताः भवन्तः सर्वे अभिरक्षन्तु ।
कतिषु **अयनेषु** यथाभागम् अवस्थिताः भवन्तः सर्वे अभिरक्षन्तु ?	**सर्वेषु** अयनेषु यथाभागम् अवस्थिताः भवन्तः सर्वे अभिरक्षन्तु ।
सर्वेषु अयनेषु यथाभागम् अवस्थिताः भवन्तः सर्वे **कम्** एव अभिरक्षन्तु ?	**सर्वेषु** अयनेषु यथाभागम् अवस्थिताः भवन्तः सर्वे **भीष्मम् एव हि** अभिरक्षन्तु ।

तात्पर्यम् - भवन्तः सर्वेऽपि व्यूहानां द्वारदेशेषु स्वस्वस्थानेषु तिष्ठन्तु । सेनाधिपतिं भीष्मं च रक्षन्तु ।

तस्य सञ्जनयन् हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥१.१२॥

पदच्छेदः - तस्य, सञ्जनयन्, हर्षम्, कुरुवृद्धः, पितामहः ।
सिंहनादम्, विनद्य, उच्चैः, शङ्खम्, दध्मौ, प्रतापवान् ॥

अन्वयः - प्रतापवान् कुरुवृद्धः पितामहः तस्य हर्षं सञ्जनयन् सिंहनादं विनद्य उच्चैः शङ्खं दध्मौ ।

पदार्थः - प्रतापवान् = तेजस्वी, कुरुवृद्धः = कुरुषु ज्येष्ठः, पितामहः = भीष्मः, तस्य = दुर्योधनस्य, हर्षम् = मोदम्, सञ्जनयन् = उत्पादयन्, सिंहनादं विनद्य = सिंहः इव गर्जित्वा, शङ्खम् = शङ्खम्, उच्चैः = उच्चस्वरेण, दध्मौ = अधमत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रतापवान्	प्रतापवत्- त. पु. प्र. एक. (विशेषणम्)	कुरुवृद्धः	अ. पुं. प्र. एक. (विशेषणम्)
पितामहः	अ. पुं. प्र. एक. (विशेष्यम्)	तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)
हर्षम्	अ. पुं. द्वि. एक.	सञ्जनयन्	सञ्जनयत्- त. पु. प्र. एक. (विशेषणम्)
सिंहनादम्	णमुलन्तम् अव्ययम्	विनद्य	ल्यबन्तम् अव्ययम्
उच्चैः	अव्ययम्	शङ्खम्	अ. पुं. द्वि. एक.
दध्मौ	ध्मा (ध्मा - शब्दाग्निसंयोगयोः) पर. कर्तरि लिट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

हर्षं कुरुवृद्धः	हर्षम् + कुरुवृद्धः	अनुस्वारसन्धिः ।
विनद्योच्चैः	विनद्य + उच्चैः	गुणसन्धिः ।
सिंहनादं विनद्य	सिंहनादम् + विनद्य	अनुस्वारसन्धिः ।
शङ्खं दध्मौ	शङ्खम् + दध्मौ	अनुस्वारसन्धिः ।

(ख) समासः कुरुवृद्धः — कुरुषु वृद्धः कुरुवृद्धः - सप्तमीतत्पुरुषः ।

(ग) कृदन्तः

सञ्जनयन् — सम् + जन् (जनी प्रादुर्भावे) + णिच् + शतृ (कर्तरि) ।

सिंहनादम् — सिंहः + नद् (णद अव्यक्ते शब्दे) + णमुल् (भावे) उपमानवाचके शब्दे उपपदे धातोः णमुल् (अम्) ।

विनद्य — वि + नद् (णद अव्यक्ते शब्दे) + ल्यप् ।

(घ) तद्धितान्तः

पितामहः — पितृ + डामहच् (पितुः पिता इत्यर्थे) ।

प्रतापवान् — प्रताप + मतुप्, प्रतापः अस्य अस्मिन् वा अस्ति ।

भावस्पष्टीकरणम् -

दध्मौ ।	
कः दध्मौ ?	**पितामहः** दध्मौ ।
कीदृशः पितामहः दध्मौ ?	**कुरुवृद्धः** पितामहः दध्मौ ।

पुनश्च कीदृशः कुरुवृद्धः पितामहः दध्मौ ?	**प्रतापवान्** कुरुवृद्धः पितामहः दध्मौ ।
प्रतापवान् कुरुवृद्धः पितामहः **कं** दध्मौ ?	प्रतापवान् कुरुवृद्धः पितामहः **शङ्खं** दध्मौ ।
प्रतापवान् कुरुवृद्धः पितामहः **कथं** शङ्खं दध्मौ ?	प्रतापवान् कुरुवृद्धः पितामहः **उच्चैः** शङ्खं दध्मौ ।
प्रतापवान् कुरुवृद्धः पितामहः **किं कृत्वा** उच्चैः शङ्खं दध्मौ ?	प्रतापवान् कुरुवृद्धः पितामहः **विनद्य** उच्चैः शङ्खं दध्मौ ।
प्रतापवान् कुरुवृद्धः पितामहः **कथं** विनद्य उच्चैः शङ्खं दध्मौ ?	प्रतापवान् कुरुवृद्धः पितामहः **सिंहनादं** विनद्य उच्चैः शङ्खं दध्मौ ।
प्रतापवान् कुरुवृद्धः पितामहः **किं कुर्वन्** सिंहनादं विनद्य उच्चैः शङ्खं दध्मौ ?	प्रतापवान् कुरुवृद्धः पितामहः **सञ्जनयन्** सिंहनादं विनद्य उच्चैः शङ्खं दध्मौ ।
प्रतापवान् कुरुवृद्धः पितामहः **कं** सञ्जनयन् सिंहनादं विनद्य उच्चैः शङ्खं दध्मौ ?	प्रतापवान् कुरुवृद्धः पितामहः **हर्षं** सञ्जनयन् सिंहनादं विनद्य उच्चैः शङ्खं दध्मौ ।
प्रतापवान् कुरुवृद्धः पितामहः **कस्य** हर्षं सञ्जनयन् सिंहनादं विनद्य उच्चैः शङ्खं दध्मौ ?	प्रतापवान् कुरुवृद्धः पितामहः **तस्य** हर्षं सञ्जनयन् सिंहनादं विनद्य उच्चैः शङ्खं दध्मौ ।

तात्पर्यम् - तदा पितामहः भीष्मः सिंहः इव उच्चैः गर्जनम् अकरोत् । ततः शङ्खम् अपि अधमत्, येन दुर्योधनस्य महान् सन्तोषः जातः ।

ततः शङ्खाश्च भेर्यश्च पणवानकगोमुखाः ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥१.१३॥

पदच्छेदः - ततः, शङ्खाः, च, भेर्यः, च, पणवानकगोमुखाः ।
सहसा, एव, अभ्यहन्यन्त, सः, शब्दः, तुमुलः,अभवत् ॥

अन्वयः - ततः (तदा) शङ्खाः भेर्यः पणवानकगोमुखाः च सहसा एव अभ्यहन्यन्त । सः शब्दः तुमुलः अभवत् ।

पदार्थः - तदा = तस्मिन् समये, शङ्खाः = शङ्खाः, भेर्यः = भेर्यः, पणवानकगोमुखाः = पणवाः आनकाः गोमुखाश्च, सहसा एव = युगपत् एव, अभ्यहन्यन्त = नादिताः अभवन्, सः = सः, शब्दः = नादः, तुमुलः = घोरः, अभवत् = सञ्जातः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ततः	अव्ययम्	शङ्खाः	अ. पुं. प्र. बहु.

भेर्यः	ई. स्त्री. प्र. बहु.	पणवानकगोमुखाः	अ. पुं. प्र. बहु.
च	अव्ययम्	सहसा	अव्ययम्
एव	अव्ययम्	अभ्यहन्यन्त	अभि + हन् (हन हिंसागत्योः) आत्म. कर्मणि लङ्. प्रपु. बहु.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	शब्दः	अ. पुं. प्र. एक. (विशेष्यम्)
तुमुलः	अ. पुं. प्र. एक. (विशेषणम्)	अभवत्	भू (भू सत्तायाम्) पर. कर्तरि लङ्. प्रपु. एक

व्याकरणम् -

(क) सन्धिः

शङ्खाश्च	शङ्खाः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
भेर्यश्च	भेर्यः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
सहसैव	सहसा + एव	वृद्धिसन्धिः।
एवाभ्यहन्यन्त	एव + अभ्यहन्यन्त	सवर्णदीर्घसन्धिः।
शब्दस्तुलः	शब्दः + तुमुलः	विसर्गसन्धिः (सकारः)।
तुमुलोऽभवत्	तुमुलः + अभवत्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपम्।

(ख) समासः

गोमुखः	गोः मुखम् इव मुखं यस्य सः - बहुव्रीहिः। वाद्यविशेषः।
पणवानकगोमुखाः	पणवाश्च आनकाश्च गोमुखाश्च - द्वन्द्वः। वाद्यविशेषाः।

भावस्पष्टीकरणम् -

अभ्यहन्यन्त।	
के अभ्यहन्यन्त ?	**शङ्खाः** अभ्यहन्यन्त।
शङ्खाः **पुनश्च काः** अभ्यहन्यन्त ?	शङ्खाः **भेर्यश्च** अभ्यहन्यन्त।
शङ्खाः भेर्यश्च **पुनश्च के** अभ्यहन्यन्त ?	शङ्खाः भेर्यः **पणवानकगोमुखाः** च अभ्यहन्यन्त।
शङ्खाः भेर्यः पणवानकगोमुखाः च **कथम्** अभ्यहन्यन्त ?	शङ्खाः भेर्यः पणवानकगोमुखाः च **सहसा एव** अभ्यहन्यन्त।
कदा शङ्खाः भेर्यः पणवानकगोमुखाः च सहसा एव अभ्यहन्यन्त ?	**तदा** शङ्खाः भेर्यः पणवानकगोमुखाः च सहसा एव अभ्यहन्यन्त।
अभवत्।	
कः अभवत् ?	**सः** अभवत्।

सः **कः** अभवत् ?	सः शब्दः अभवत् ।
सः शब्दः **कीदृशः** अभवत् ?	सः शब्दः **तुमुलः** अभवत् ।

तात्पर्यम् - तस्मिन् एव काले शङ्खानां धमनम्, भेरीणां ताडनम्, पणवानाम्, आनकानां गोमुखानां च वादनं सम्पन्नम्, येन सर्वत्र महान् शब्दः संजातः ।

ततः श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥१.१४॥

पदच्छेदः - ततः, श्वेतैः, हयैः, युक्ते, महति, स्यन्दने, स्थितौ ।
माधवः, पाण्डवः, च, एव, दिव्यौ, शङ्खौ, प्रदध्मतुः ॥

अन्वयः - ततः माधवः पाण्डवश्च श्वेतैः हयैः युक्ते महति स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ।

पदार्थः - ततः = तदनन्तरम् (तस्मात् परम्), माधवः = श्रीकृष्णः, पाण्डवः = अर्जुनः, श्वेतैः = धवलैः, हयैः = अश्वैः, युक्ते = संयुक्ते, महति = विशाले, स्यन्दने = रथे, स्थितौ = उपविष्टौ, दिव्यौ = अलौकिकौ. शङ्खौ = शङ्खौ, प्रदध्मतुः = ध्मातवन्तौ ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ततः	अव्ययम्	माधवः	अ. पुं. प्र. एक.
पाण्डवः	अ. पुं. प्र. एक.	च	अव्ययम्
एव	अव्ययम्	श्वेतैः	अ. पुं. तृ. बहु. (विशेषणम्)
हयैः	अ. पुं. तृ. बहु. (विशेष्यम्)	युक्ते	अ. पुं. स. एक. (विशेषणम्)
महति	महत्- त. पुं. स. एक. (विशेषणम्)	स्यन्दने	अ. पुं. स. एक. (विशेष्यम्)
स्थितौ	अ. पुं. प्र. द्विव. (विशेषणम्)	दिव्यौ	अ. पुं. द्वि. द्विव. (विशेषणम्)
शङ्खौ	अ. पुं. द्वि. द्विव. (विशेष्यम्)	प्रदध्मतुः	ध्मा (ध्मा शब्दाग्निसंयोगयोः) पर. कर्तरि लिट्. प्रपु. द्विव.

व्याकरणम् -

(क) सन्धिः	श्वेतैर्हयैः	श्वेतैः + हयैः	विसर्गसन्धिः (रेफः) ।
	हयैर्युक्ते	हयैः + युक्ते	विसर्गसन्धिः (रेफः) ।
	पाण्डवश्च	पाण्डवः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।

	चैव	च + एव	वृद्धिसन्धिः ।
(ख) समासः	माधवः	मायाः (लक्ष्म्याः) धवः (पतिः) - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	युक्ते	युज् (युजिर् योगे) + क्त (कर्तरि) ।	
	स्यन्दने	स्यन्द (स्यन्दू प्रस्रवणे) + युच्, तस्मिन् ।	
	स्थितौ	स्था (ष्ठा गतिनिवृत्तौ) + क्त । (कर्तरि) ।	
(घ) तद्धितान्तः	पाण्डवः	पाण्डु + अण् (अपत्यार्थे) । पाण्डोः अपत्यं पुमान् ।	
	दिव्यौ	दिव् + यत् (भवार्थे) । दिवि भवौ ।	

भावस्पष्टीकरणम् -

प्रदध्मतुः ।	
कौ प्रदध्मतुः ?	**माधवः पाण्डवश्च** प्रदध्मतुः ।
माधवः पाण्डवश्च **कौ** प्रदध्मतुः ?	माधवः पाण्डवश्च **शङ्खौ** प्रदध्मतुः ।
माधवः पाण्डवश्च **कीदृशौ** शङ्खौ प्रदध्मतुः ?	माधवः पाण्डवश्च **दिव्यौ** शङ्खौ प्रदध्मतुः ।
माधवः पाण्डवश्च **कथम्भूतौ** दिव्यौ शङ्खौ प्रदध्मतुः ?	माधवः पाण्डवश्च **स्थितौ** दिव्यौ शङ्खौ प्रदध्मतुः ।
माधवः पाण्डवश्च **कुत्र** स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ?	माधवः पाण्डवश्च **स्यन्दने** स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ।
माधवः पाण्डवश्च **कीदृशे** स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ?	माधवः पाण्डवश्च **महति** स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ।
माधवः पाण्डवश्च **पुनश्च कीदृशे** महति स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ?	माधवः पाण्डवश्च **युक्ते** महति स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ।
माधवः पाण्डवश्च **कैः** युक्ते महति स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ?	माधवः पाण्डवश्च **हयैः** युक्ते महति स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ।
माधवः पाण्डवश्च **कीदृशैः** हयैः युक्ते महति स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ?	माधवः पाण्डवश्च **श्वेतैः** हयैः युक्ते महति स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ।
कस्मात्परं माधवः पाण्डवश्च श्वेतैः हयैः युक्ते महति स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ?	**ततः** माधवः पाण्डवश्च श्वेतैः हयैः युक्ते महति स्यन्दने स्थितौ दिव्यौ शङ्खौ प्रदध्मतुः ।

तात्पर्यम् - ततः भगवान् श्रीकृष्णः अर्जुनश्च धवलवर्णैः अश्वैः उह्यमानेन महता रथेन तत्र समागतौ। **तौ च** युद्धोत्साहवर्धनाय स्वीयौ अलौकिकौ शङ्खौ ध्मातवन्तौ ।

पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥१.१५॥
अनन्तविजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणिपुष्पकौ ॥१.१६॥

पदच्छेदः - पाञ्चजन्यम्, हृषीकेशः, देवदत्तम्, धनञ्जयः ।
पौण्ड्रम्, दध्मौ, महाशङ्खम्, भीमकर्मा, वृकोदरः ॥
अनन्तविजयम्, राजा, कुन्तीपुत्रः, युधिष्ठिरः ।
नकुलः, सहदेवः, च, सुघोषमणिपुष्पकौ ॥

अन्वयः - हृषीकेशः पाञ्चजन्यं धनञ्जयः देवदत्तं भीमकर्मा वृकोदरः महाशङ्खं पौण्ड्रं कुन्तीपुत्रः राजा युधिष्ठिरः अनन्तविजयं नकुलः सहदेवः च सुघोषमणिपुष्पकौ दध्मौ ।

पदार्थः - हृषीकेशः = श्रीकृष्णः, पाञ्चजन्यम् = पाञ्चजन्यनामकम्, धनञ्जयः = अर्जुनः, देवदत्तम् = देवदत्तनामकम्, भीमकर्मा = भयङ्करकार्यकारी, वृकोदरः = भीमः, पौण्ड्रम् = पौण्ड्र-नामकम्, महाशङ्खम् = महाकारकं शङ्खम्, कुन्तीपुत्रः = कुन्तीसुतः, राजा युधिष्ठिरः = महाराजः युधिष्ठिरः, अनन्तविजयम् = अनन्तविजयनामकम्, नकुलः सहदेवश्च = नकुलः सहदेवश्च, सुघोषमणिपुष्पकौ = सुघोषमणिपुष्पकनामकौ, दध्मौ = अधमत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
हृषीकेशः	अ. पुं. प्र. एक.	पाञ्चजन्यम्	अ. पुं. द्वि. एक. (विशेषणम्)
धनञ्जयः	अ. पुं. प्र. एक.	देवदत्तम्	अ. पुं. द्वि. एक. (विशेषणम्)
भीमकर्मा	भीमकर्मन्- न. पुं. प्र. एक. (विशेषणम्)	वृकोदरः	अ. पुं. प्र. एक. (विशेष्यम्)
महाशङ्खम्	अ. पुं. द्वि. एक. (विशेषणम्)	पौण्ड्रम्	अ. पुं. द्वि. एक. (विशेष्यम्)
कुन्तीपुत्रः	अ. पुं. प्र. एक. (विशेषणम्)	राजा	राजन्- न. पुं. प्र. एक. (विशेषणम्)
युधिष्ठिरः	अ. पुं. प्र. एक. (विशेष्यम्)	अनन्तविजयम्	अ. पुं. द्वि. एक. (विशेषणम्)
नकुलः	अ. पुं. प्र. एक.	सहदेवः	अ. पुं. प्र. एक.
च	अव्ययम्	सुघोषमणिपुष्पकौ	अ. पुं. द्वि. द्विव. (विशेषणम्)

दध्मौ	ध्मा (ध्मा - शब्दाग्निसंयोगयोः) पर. कर्तरि लिट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	पाञ्चजन्यं हृषीकेशः	पाञ्चजन्यम् + हृषीकेशः	अनुस्वारसन्धिः ।
	हृषीकेशो देवदत्तम्	हृषीकेशः + देवदत्तम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	देवदत्तं धनञ्जयः	देवदत्तम् + धनञ्जयः	अनुस्वारसन्धिः ।
	पौण्ड्रं दध्मौ	पौण्ड्रम् + दध्मौ	अनुस्वारसन्धिः ।
	महाशङ्खं भीमकर्मा	महाशङ्खम् + भीमकर्मा	अनुस्वारसन्धिः ।
	अनन्तविजयं राजा	अनन्तविजयम् + राजा	अनुस्वारसन्धिः ।
	कुन्तीपुत्रो युधिष्ठिरः	कुन्तीपुत्रः + युधिष्ठिरः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	सहदेवश्च	सहदेवः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।

(ख) समासः हृषीकेशः — हृषीकाणाम् ईशः हृषीकेशः - षष्ठीतत्पुरुषः ।

(हृषीकम् इन्द्रियम्) ।

हृषीकाणीन्द्रियाण्याहुस्तेषामीशो यतो भवान् ।
हृषीकेशस्ततो विष्णो ख्यातो देवेषु केशवः ॥ महाभारतम्

महाशङ्खम् — महान् च असौ शङ्खः महाशङ्खः, तम् - कर्मधारयः ।

वृकोदरः — वृकस्य उदरम् इव उदरं यस्य सः - बहुव्रीहिः ।

कुन्तीपुत्रः — कुन्त्याः पुत्रः - षष्ठीतत्पुरुषः ।

युधिष्ठिरः — युधि स्थिरः - सप्तमीतत्पुरुषः । समासे सति षत्वम् ।

धनञ्जयः — धनं जयति इति धनञ्जयः - कर्तरि खश् उपपदसमासश्च ।

सर्वाञ्जनपदाञ्जित्वा वित्तमादाय केवलम् ।
मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम् ॥ महाभारतम्

(ग) तद्धितान्तः पाञ्चजन्यः — पञ्चजन + ञ्य (भवार्थे) । पञ्चजने भवः ।

स तु पञ्चजनं हत्वा शङ्खं लेभे जनार्दनः ।
यः स देवमनुष्येषु पाञ्चजन्य इति श्रुतः ॥ हरिवंशः - ८९१७

भावस्पष्टीकरणम् -

दध्मौ ।	
कः दध्मौ ?	**हृषीकेशः** दध्मौ ।
हृषीकेशः **पुनश्च कः** दध्मौ ?	हृषीकेशः **धनञ्जयश्च** दध्मौ ।

हृषीकेशः धनञ्जयश्च **पुनश्च कः** दध्मौ ?	हृषीकेशः धनञ्जयः **वृकोदरश्च** दध्मौ ।
हृषीकेशः धनञ्जयः **कीदृशश्च** वृकोदरः दध्मौ ?	हृषीकेशः धनञ्जयः **भीमकर्मा** वृकोदरः च दध्मौ ।
हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः **पुनश्च कः** दध्मौ ?	हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः **युधिष्ठिरश्च** दध्मौ ।
हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः **कीदृशश्च** युधिष्ठिरः दध्मौ ?	हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः **कुन्तीपुत्रः** युधिष्ठिरः च दध्मौ ।
हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः कुन्तीपुत्रः **पुनः कीदृशश्च** युधिष्ठिरः च दध्मौ ?	हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः कुन्तीपुत्रः **राजा** युधिष्ठिरः च दध्मौ ।
हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः कुन्तीपुत्रः राजा युधिष्ठिरः **पुनश्च कः** दध्मौ ?	हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः कुन्तीपुत्रः राजा युधिष्ठिरः **नकुलश्च** दध्मौ ।
हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः कुन्तीपुत्रः राजा युधिष्ठिरः नकुलः **पुनश्च कः** दध्मौ ?	हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः कुन्तीपुत्रः राजा युधिष्ठिरः नकुलः **सहदेवश्च** दध्मौ ।
हृषीकेशः धनञ्जयः भीमकर्मा वृकोदरः कुन्तीपुत्रः राजा युधिष्ठिरः नकुलः सहदेवः **कं कं** दध्मौ ?	हृषीकेशः **पाञ्चजन्यम्**, धनञ्जयः **देवदत्तम्**, भीमकर्मा वृकोदरः **पौण्ड्रं महाशङ्खम्**, कुन्तीपुत्रः राजा युधिष्ठिरः **अनन्तविजयम्**, नकुलः सहदेवश्च **सुघोषमणिपुष्पकौ** दध्मौ ।

तात्पर्यम् - भगवान् श्रीकृष्णः स्वस्य पाञ्चजन्यं शङ्खम् अधमत् । अर्जुनः स्वस्य देवदत्तं शङ्खम् अधमत् । भीमस्तु भयङ्कराणां कार्याणां करणे कुशलः । पौण्ड्रकनामकः तस्य शङ्खोऽपि महान् एव । सः तम् अधमत् । युधिष्ठिरः अनन्तविजयनामकं शङ्खम् अधमत् । नकुलः सुघोषनामकं सहदेवः च मणिपुष्पकनामकं शङ्खम् अधमत् ।

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजितः ॥१.१७॥
द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान्दध्मुः पृथक्पृथक् ॥१.१८॥

पदच्छेदः - काश्यः, च, परमेष्वासः, शिखण्डी, च, महारथः ।
धृष्टद्युम्नः, विराटः, च, सात्यकिः, च, अपराजितः ॥

द्रुपदः, द्रौपदेयाः, च, सर्वशः, पृथिवीपते ।
सौभद्रः, च, महाबाहुः, शङ्खान्, दध्मुः, पृथक्, पृथक् ॥

अन्वयः - पृथिवीपते ! परमेष्वासः काश्यः, महारथः शिखण्डी, धृष्टद्युम्नः, विराटः, अपराजितः सात्यकिः, द्रुपदः, द्रौपदेयाः महाबाहुः सौभद्रः च सर्वशः शङ्खान् पृथक् पृथक् दध्मुः ।

पदार्थः - पृथिवीपते = हे धृतराष्ट्र !, परमेष्वासः = परमधनुर्धरः, काश्यः = काश्याः राजा, महारथः = योधानां दशसहस्रेण योद्धा, शिखण्डी = शिखण्डी, धृष्टद्युम्नः = धृष्टद्युम्नः, विराटः = विराटराजः, अपराजितः = पराजेतुम् अशक्यः, सात्यकिः = सात्यकिः, द्रुपदः = द्रुपदः, द्रौपदेयाः = द्रौपद्याः पुत्राः, महाबाहुः = महान्तौ बाहू यस्य सः, सौभद्रः च = अभिमन्युः च, पृथक् पृथक् = भिन्नान् भिन्नान्, शङ्खान् = शङ्खान्, दध्मुः = अधमन् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पृथिवीपते	इ. पुं. सम्बो. एक.	परमेष्वासः	अ. पुं. प्र. एक. (विशेषणम्)
काश्यः	अ. पुं. प्र. एक. (विशेष्यम्)	महारथः	अ. पुं. प्र. एक. (विशेषणम्)
शिखण्डी	शिखण्डिन्- न. पुं. प्र. एक. (विशेष्यम्)	धृष्टद्युम्नः	अ. पुं. प्र. एक.
विराटः	अ. पुं. प्र. एक.	अपराजितः	अ. पुं. प्र. एक. (विशेषणम्)
सात्यकिः	इ. पुं. प्र. एक. (विशेष्यम्)	द्रुपदः	अ. पुं. प्र. एक.
द्रौपदेयाः	अ. पुं. प्र. बहु.	महाबाहुः	उ. पुं. प्र. एक. (विशेषणम्)
सौभद्रः	अ. पुं. प्र. एक. (विशेष्यम्)	च	अव्ययम्
सर्वशः	अव्ययम्	शङ्खान्	अ. पुं. द्वि. बहु.
पृथक्	अव्ययम्	दध्मुः	ध्मा (ध्मा शब्दाग्निसंयोगयोः) पर. कर्तरि लिट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः

काश्यश्च	काश्यः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
धृष्टद्युम्नो विराटश्च	धृष्टद्युम्नः + विराटः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
विराटश्च	विराटः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
सात्यकिश्च	सात्यकिः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
चापराजितः	च + अपराजितः	सवर्णदीर्घसन्धिः ।

द्रुपदो द्रौपदेयाः	द्रुपदः + द्रौपदेयाः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
द्रौपदेयाश्च	द्रौपदेयाः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
सौभद्रश्च	सौभद्रः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।

(ख) समासः

परमेष्वासः	आस्ते अत्र इति आसः। इषोः आसः इष्वासः, धनुः इत्यर्थः। परमः इष्वासः यस्य सः - बहुव्रीहिः।
धृष्टद्युम्नः	धृष्टं द्युम्नं येन सः - बहुव्रीहिः।
अपराजितः	न पराजितः अपराजितः - नञतत्पुरुषः।
पृथिवीपते	पृथिव्याः पतिः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः।
महाबाहुः	महान्तौ बाहू यस्य सः - बहुव्रीहिः।

(ग) तद्धितान्तः

काश्यः	काशि + ञ्यङ् (राजा इत्यर्थे)। काश्याः राजा।
सात्यकिः	सत्यक + इञ् (अपत्यार्थे)। सत्यकस्य अपत्यं पुमान्।
शिखण्डी	शिखण्ड + इनि (मतुबर्थे)। शिखण्डः चूडा अस्य अस्मिन् वा अस्ति।

भावस्पष्टीकरणम् -

दध्मुः।	
के दध्मुः ?	**काश्यः शिखण्डी धृष्टद्युम्नः विराटः सात्यकिः द्रुपदः द्रौपदेयाः सौभद्रः च** दध्मुः।
कीदृशः काश्यः, **कीदृशः** शिखण्डी, धृष्टद्युम्नः, विराटः, **कीदृशः** सात्यकिः, द्रुपदः, द्रौपदेयाः **कीदृशः** सौभद्रः च दध्मुः ?	**परमेष्वासः** काश्यः, **महारथः** शिखण्डी, धृष्टद्युम्नः, विराटः, **अपराजितः** सात्यकिः, द्रुपदः, द्रौपदेयाः **महाबाहुः** सौभद्रः च दध्मुः।
परमेष्वासः काश्यः, महारथः शिखण्डी, धृष्टद्युम्नः, विराटः, अपराजितः सात्यकिः, द्रुपदः, द्रौपदेयाः महाबाहुः सौभद्रः च **कति** दध्मुः ?	परमेष्वासः काश्यः, महारथः शिखण्डी, धृष्टद्युम्नः, विराटः, अपराजितः सात्यकिः, द्रुपदः, द्रौपदेयाः महाबाहुः सौभद्रः च **सर्वशः** दध्मुः।
परमेष्वासः काश्यः, महारथः शिखण्डी, धृष्टद्युम्नः, विराटः, अपराजितः सात्यकिः, द्रुपदः, द्रौपदेयाः महाबाहुः सौभद्रः च सर्वशः **कान्** दध्मुः ?	परमेष्वासः काश्यः, महारथः शिखण्डी, धृष्टद्युम्नः, विराटः, अपराजितः सात्यकिः, द्रुपदः, द्रौपदेयाः महाबाहुः सौभद्रः च सर्वशः **शङ्खान्** दध्मुः।
परमेष्वासः काश्यः, महारथः शिखण्डी, धृष्टद्युम्नः, विराटः, अपराजितः सात्यकिः, द्रुपदः, द्रौपदेयाः महाबाहुः सौभद्रः च सर्वशः **कथं** शङ्खान् दध्मुः ?	परमेष्वासः काश्यः, महारथः शिखण्डी, धृष्टद्युम्नः, विराटः, अपराजितः सात्यकिः, द्रुपदः, द्रौपदेयाः महाबाहुः सौभद्रः च सर्वशः **पृथक् पृथक्** शङ्खान् दध्मुः।
अस्मिन् वाक्ये सम्बोधनपदं किम् ?	**पृथिवीपते !**

तात्पर्यम् - हे पृथिवीपते धृतराष्ट्र ! युद्धार्थम् उपस्थितः काशिराजः महान् धनुर्धरः अस्ति । सः काशिराजः, महारथः द्रुपदपुत्रः धृष्टद्युम्नः, विराटराजः, अपराजितः सात्यकिः, द्रुपदमहाराजः, द्रौपद्याः पुत्राः उपपाण्डवाः, महाबाहुः अभिमन्युश्चेति सर्वेऽपि पृथक् पृथक् शङ्खान् अधमन् ।

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥१.१९॥

पदच्छेदः - सः, घोषः, धार्तराष्ट्राणाम्, हृदयानि, व्यदारयत् ।
नभः, च, पृथिवीम्, च, एव, तुमुलः, व्यनुनादयन् ॥

अन्वयः - सः तुमुलः घोषः नभः पृथिवीं च व्यनुनादयन् धार्तराष्ट्राणां हृदयानि व्यदारयत् ।

पदच्छेदः - सः = स एषः, तुमुलः = घोरः, घोषः = नादः, नभः = आकाशम्, पृथिवीं च = भूमिं च, व्यनुनादयन् = प्रतिध्वनयन्, धार्तराष्ट्राणाम् = कौरवाणाम्, हृदयानि = मनांसि, व्यदारयत् = अखण्डयत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	एव	अव्ययम्
तुमुलः	अ. पुं. प्र. एक. (विशेषणम्)	घोषः	अ. पुं. प्र. एक. (विशेष्यम्)
नभः	नभस्- सका. नपुं. द्वि. एक.	पृथिवीम्	ई. स्त्री. द्वि. एक.
च	अव्ययम्	व्यनुनादयन्	व्यनुनादयत्- त. पुं. प्र. एक. (विशेषणम्)
धार्तराष्ट्राणाम्	अ. पुं. ष. बहु.	हृदयानि	अ. नपुं. द्वि. बहु.
व्यदारयत्	वि + दॄ (दॄ विदारणे) णिच्. कर्तरि लङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

स घोषः	सः + घोषः	विसर्गसन्धिः (लोपः) ।
घोषो धार्तराष्ट्राणाम्	घोषः + धार्तराष्ट्राणाम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
धार्तराष्ट्राणां हृदयानि	धार्तराष्ट्राणाम् + हृदयानि	अनुस्वारसन्धिः ।
नभश्च	नभः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
पृथिवीं चैव	पृथिवीम् + चैव	अनुस्वारसन्धिः ।
चैव	च + एव	वृद्धिसन्धिः ।
तुमुलो व्यनुनादयन्	तुमुलः + व्यनुनादयन्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।

(ख) कृदन्तः घोषः घुष् (घुषिर् विशब्दने) + घञ् ।
व्यनुनादयन् वि + अनु + नद् (णद अव्यक्ते शब्दे) + णिच् + शतृ (कर्तरि) ।

(ग) तद्धितान्तः धार्तराष्ट्राणाम् धृतराष्ट्र + अण् (अपत्यार्थे) । धृतराष्ट्रस्य अपत्यानि पुमांसः, तेषाम् ।

भावस्पष्टीकरणम् -

व्यदारयत् ।	
कः व्यदारयत् ?	**घोषः** व्यदारयत् ।
कः घोषः व्यदारयत् ?	**सः** घोषः व्यदारयत् ।
सः **कीदृशः** घोषः व्यदारयत् ?	सः **तुमुलः** घोषः व्यदारयत् ।
सः तुमुलः घोषः **कानि** व्यदारयत् ?	सः तुमुलः घोषः **हृदयानि** व्यदारयत् ।
सः तुमुलः घोषः **केषां** हृदयानि व्यदारयत् ?	सः तुमुलः घोषः **धार्तराष्ट्राणां** हृदयानि व्यदारयत् ।
सः तुमुलः घोषः **किं कुर्वन्** धार्तराष्ट्राणां हृदयानि व्यदारयत् ?	सः तुमुलः घोषः **व्यनुनादयन्** धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
सः तुमुलः घोषः **किं** व्यनुनादयन् धार्तराष्ट्राणां हृदयानि व्यदारयत् ?	सः तुमुलः घोषः **नभः** व्यनुनादयन् धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
सः तुमुलः घोषः नभः **पुनश्च कां** व्यनुनादयन् धार्तराष्ट्राणां हृदयानि व्यदारयत् ?	सः तुमुलः घोषः नभः **पृथिवीं च** व्यनुनादयन् धार्तराष्ट्राणां हृदयानि व्यदारयत् ।

तात्पर्यम् - सर्वेऽपि महावीराः युगपदेव शङ्खान् ध्मातवन्तः इति तदा महान् घोरश्च शब्दः समुत्पन्नः । तेन आकाशे भूमौ च प्रतिध्वनिः जातः । तस्य घोषस्य श्रवणेन दुष्टानां कौरवाणां हृदयानि विदीर्णानि इव अभवन् ।

अथ व्यवस्थितान् दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्रसम्पाते धनुरुद्यम्य पाण्डवः ॥१.२०॥
हृषीकेशं तदा वाक्यमिदमाह महीपते ।

पदच्छेदः - अथ, व्यवस्थितान्, दृष्ट्वा, धार्तराष्ट्रान्, कपिध्वजः ।
प्रवृत्ते, शस्त्रसम्पाते, धनुः, उद्यम्य, पाण्डवः ॥
हृषीकेशम्, तदा, वाक्यम्, इदम्, आह, महीपते ।

अन्वयः - महीपते ! अथ व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा कपिध्वजः पाण्डवः शस्त्रसम्पाते प्रवृत्ते धनुः उद्यम्य तदा हृषीकेशम् इदं वाक्यम् आह ।

पदार्थः - महीपते हे धृतराष्ट्र !, अथ = ततः, व्यवस्थितान् = उद्युक्तान्, धार्तराष्ट्रान् = कौरवान्, दृष्ट्वा = वीक्ष्य, कपिध्वजः = वानरकेतनः, पाण्डवः = अर्जुनः, शस्त्रसम्पाते = आयुधपाते, प्रवृत्ते = सम्पन्ने, धनुः = चापम्, उद्यम्य = उद्धृत्य, तदा = तस्मिन् समये, हृषीकेशम् = कृष्णम्, इदम् = एतत्, वाक्यम् = वचनम्, आह = वदति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महीपते	इ. पुं. सम्बो. एक.	अथ	अव्ययम्
व्यवस्थितान्	अ. पुं. द्वि. बहु. (विशेषणम्)	धार्तराष्ट्रान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
दृष्ट्वा	क्त्वान्तम् अव्ययम्	कपिध्वजः	अ. पुं. प्र. एक. (विशेषणम्)
पाण्डवः	अ. पुं. प्र. एक. (विशेष्यम्)	शस्त्रसम्पाते	अ. पुं. स. एक. (विशेष्यम्)
प्रवृत्ते	अ. पुं. स. एक. (विशेषणम्)	धनुः	धनुस् - सका. नपुं. द्वि. एक.
उद्यम्य	ल्यबन्तम् अव्ययम्	तदा	अव्ययम्
हृषीकेशम्	अ. पुं. द्वि. एक.	इदम्	इदम्- म. सर्व. नपुं. द्वि. एक. (विशेषणम्)
वाक्यम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	आह	ब्रू (ब्रूञ् व्यक्तायां वाचि) पर.कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः
- धनुरुद्यम्य — धनुः + उद्यम्य — विसर्गसन्धिः (रेफः) ।
- हृषीकेशं तदा — हृषीकेशम् + तदा — अनुस्वारसन्धिः ।

(ख) समासः
- महीपते — मह्याः पतिः महीपतिः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः ।
- कपिध्वजः — कपिः ध्वजे यस्य सः कपिध्वजः - बहुव्रीहिः ।
- शस्त्रसम्पाते — शस्त्राणां सम्पातः शस्त्रसम्पातः, तस्मिन् - सप्तमीतत्पुरुषः ।
- हृषीकेशम् — हृषीकाणाम् ईशः हृषीकेशः- षष्ठीतत्पुरुषः । (१.१५) दृश्यताम् ।

(ग) कृदन्तः
- व्यवस्थितान् — वि + अव + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि), तान् ।
- दृष्ट्वा — दृश् (दृशिर् प्रेक्षणे) + क्त्वा ।
- प्रवृत्ते — प्र + वृत् (वृतु वर्तने) + क्त (कर्तरि), तस्मिन् ।
- सम्पाते — सम् + पत् (पत्लृ गतौ) + घञ् (भावे), तस्मिन् ।
- उद्यम्य — उद् + यम् (यम च परिवेषणे) + ल्यप् ।
- वाक्यम् — वच् (वच परिभाषणे) + ण्यत् ।

(घ) तद्धितान्तः पाण्डवः पाण्डुः + अण् (अपत्यार्थे) । पाण्डोः अपत्यं पुमान् ।
धार्तराष्ट्रान् धृतराष्ट्र + अण् (अपत्यार्थे) । धृतराष्ट्रस्य अपत्यानि पुमांसः ।

भावस्पष्टीकरणम् -

आह ।	
कः आह ?	**पाण्डवः** आह ।
कीदृशः पाण्डवः आह ?	**कपिध्वजः** पाण्डवः आह ।
कपिध्वजः पाण्डवः **किम्** आह ?	कपिध्वजः पाण्डवः **वाक्यम्** आह ।
कपिध्वजः पाण्डवः **किं** वाक्यम् आह ?	कपिध्वजः पाण्डवः **इदं** वाक्यम् आह ।
कपिध्वजः पाण्डवः **कम्** इदं वाक्यम् आह ?	कपिध्वजः पाण्डवः **हृषीकेशम्** इदं वाक्यम् आह ।
कपिध्वजः पाण्डवः **किं कृत्वा** हृषीकेशम् इदं वाक्यम् आह ?	कपिध्वजः पाण्डवः **दृष्ट्वा** हृषीकेशम् इदं वाक्यम् आह ।
कपिध्वजः पाण्डवः **कान्** दृष्ट्वा हृषीकेशम् इदं वाक्यम् आह ?	कपिध्वजः पाण्डवः **धार्तराष्ट्रान्** दृष्ट्वा हृषीकेशम् इदं वाक्यम् आह ।
कपिध्वजः पाण्डवः **कथम्भूतान्** धार्तराष्ट्रान् दृष्ट्वा हृषीकेशम् इदं वाक्यम् आह ?	कपिध्वजः पाण्डवः **व्यवस्थितान्** धार्तराष्ट्रान् दृष्ट्वा हृषीकेशम् इदं वाक्यम् आह ।
कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा **पुनश्च किं कृत्वा** हृषीकेशम् इदं वाक्यम् आह ?	कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा **उद्यम्य** हृषीकेशम् इदं वाक्यम् आह ।
कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा **किम्** उद्यम्य हृषीकेशम् इदं वाक्यम् आह ?	कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा **धनुः** उद्यम्य हृषीकेशम् इदं वाक्यम् आह ।
कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा **कदा** धनुः उद्यम्य हृषीकेशम् इदं वाक्यम् आह ?	कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा **प्रवृत्ते** (सति) धनुः उद्यम्य हृषीकेशम् इदं वाक्यम् आह ।
कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा **कस्मिन्** प्रवृत्ते (सति) धनुः उद्यम्य हृषीकेशम् इदं वाक्यम् आह ?	कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा **शस्त्रसम्पाते** प्रवृत्ते (सति) धनुः उद्यम्य हृषीकेशम् इदं वाक्यम् आह ।
कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा शस्त्रसम्पाते प्रवृत्ते (सति) धनुः उद्यम्य **कदा** हृषीकेशम् इदं वाक्यम् आह ?	कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा शस्त्रसम्पाते प्रवृत्ते (सति) धनुः उद्यम्य **तदा** हृषीकेशम् इदं वाक्यम् आह ।

कदा कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा शस्त्रसम्पाते प्रवृत्ते (सति) धनुः उद्यम्य तदा हृषीकेशम् इदं वाक्यम् आह ?	**अथ** कपिध्वजः पाण्डवः व्यवस्थितान् धार्तराष्ट्रान् दृष्ट्वा शस्त्रसम्पाते प्रवृत्ते (सति) धनुः उद्यम्य तदा हृषीकेशम् इदं वाक्यम् आह ।
अस्मिन् वाक्ये सम्बोधन पदं किम् ?	**महीपते !**

तात्पर्यम् - हे महीपते ! तदनन्तरम् अर्जुनः युद्धसन्नद्धान् भवतः पुत्रान् अपश्यत्। तदा शस्त्रप्रहारोऽपि आरब्धः। एतत् सर्वं दृष्ट्वा अर्जुनः श्रीकृष्णम् इत्थम् अवदत्।

अर्जुन उवाच - **सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत ॥१.२१॥**

पदच्छेदः -

अर्जुनः, उवाच - सेनयोः, उभयोः, मध्ये, रथम्, स्थापय, मे, अच्युत ॥

अन्वयः अच्युत ! उभयोः सेनयोः मध्ये मे रथं स्थापय ।

पदार्थः अर्जुनः = कुन्तीपुत्रः, उवाच = उक्तवान्, अच्युत = श्रीकृष्ण !, सेनयोः = सैन्ययोः, उभयोः = द्वयोः, मध्ये = अन्तरे, मे = मम, रथम् = स्यन्दनम्, स्थापय = नीत्वा स्थापय ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुनः	अ. पुं. प्र. एक.	उवाच	वच् (वच् परिभाषणे) पर. कर्तरि लिट्. प्रपु. एक.
अच्युत	अ. पुं. सम्बो. एक.	उभयोः	आ. स्त्री. ष. द्विव. (विशेषणम्)
सेनयोः	आ. स्त्री. ष. द्विव. (विशेष्यम्)	मध्ये	अ. पुं. स. एक.
मे	अस्मद्- द. सर्व. पुं. ष. एक.	रथम्	अ. पुं. द्वि. एक.
स्थापय	स्था (ष्ठा गतिनिवृत्तौ) णिच्. पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः सेनयोरुभयोः सेनयोः + उभयोः विसर्गसन्धिः (रेफः)।

उभयोर्मध्ये उभयोः + मध्ये विसर्गसन्धिः (रेफः)।

रथं स्थापय	रथम् + स्थापय	अनुस्वारसन्धिः ।
मेऽच्युत	मे + अच्युत	पूर्वरूपसन्धिः ।

(ख) समासः अच्युत न च्युतः अच्युतः, तत्सम्बुद्धौ - नञतत्पुरुषः ।

भावस्पष्टीकरणम् -

स्थापय ।	
कं स्थापय ?	**रथं** स्थापय ।
कस्य रथं स्थापय ?	**मे** रथं स्थापय ।
कुत्र मे रथं स्थापय ?	**मध्ये** मे रथं स्थापय ।
कयोः मध्ये मे रथं स्थापय ?	**सेनयोः** मध्ये मे रथं स्थापय ।
कयोः उभयोः मध्ये मे रथं स्थापय ?	**उभयोः** सेनयोः मध्ये मे रथं स्थापय ।
अस्मिन् वाक्ये सम्बोधनपदं किम् ?	**अच्युत !**

तात्पर्यम् - हे कृष्ण ! भवान् अनयोः कौरवपाण्डवसेनयोः मध्ये मम रथं स्थापयतु ।

यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन् रणसमुद्यमे ॥१.२२॥

पदच्छेदः - यावत्, एतान्, निरीक्षे, अहम्, योद्धुकामान्, अवस्थितान् ।
कैः, मया, सह, योद्धव्यम्, अस्मिन्, रणसमुद्यमे ॥

अन्वयः - यावत् अहम् अस्मिन् रणसमुद्यमे कैः मया सह योद्धव्यम् (इति ज्ञातुम्) अवस्थितान् एतान् योद्धुकामान् निरीक्षे ।

पदार्थः - यावत् = प्रथमम्, अहम् = अहम्, अस्मिन् = एतस्मिन्, रणसमुद्यमे = युद्धे, कैः सह = कैः साकम्, मया = मया, योद्धव्यम् = युद्धं कर्तव्यम् (इति ज्ञातुम्), एतान् = इमान्, अवस्थितान् = स्थितान्, योद्धुकामान् = युयुत्सून्, निरीक्षे = अवलोकयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यावत्	अव्ययम्	अहम्	अस्मद्- द. सर्व. प्र. एक.
अस्मिन्	इदम्- म. सर्व. पुं. स. एक. (विशेषणम्)	रणसमुद्यमे	अ. पुं. स. एक. (विशेष्यम्)
कैः	किम्- म. सर्व. पुं. तृ. बहु.	मया	अस्मद्- द. सर्व. तृ. एक.
सह	अव्ययम्	योद्धव्यम्	अ. नपुं. प्र. एक.

अवस्थितान्	अ. पुं. द्वि. बहु. (विशेषणम्)	एतान्	एतद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)
योद्धुकामान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	निरीक्षे	निर् + ईक्ष् (ईक्ष दर्शने) अर्जुनः आत्म. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	यावदेतान्	यावत् + एतान्	जश्त्वसन्धिः ।
	निरीक्षेऽहम्	निरीक्षे + अहम्	पूर्वरूपसन्धिः ।
	कैर्मया	कैः + मया	विसर्गसन्धिः (रेफः) ।
(ख) समासः	रणसमुद्यमे	रणस्य समुद्यमः रणसमुद्यमः, तस्मिन् - षष्ठीतत्पुरुषः ।	
	योद्धुकामान्	योद्धुं कामः येषां ते योद्धुकामाः, तान् - बहुव्रीहिः ।	
(ग) कृदन्तः	योद्धुम्	युध् (युध सम्प्रहारे) + तुमुन् ।	
	योद्धव्यम्	युध् (युध सम्प्रहारे) + तव्यत् (भावे) ।	
	अवस्थितान्	अव + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि), तान् ।	
	समुद्यमः	सम् + उद् + यम् (यम च उपरमे परिवेषणे) + घञ् ।	

भावस्पष्टीकरणम् -

यावद् अहं निरीक्षे ।	
यावद् अहं **कान्** निरीक्षे ?	यावद् अहं **योद्धुकामान्** निरीक्षे ।
यावद् अहं **कथम्भूतान्** योद्धुकामान् निरीक्षे ?	यावद् अहम् **अवस्थितान्** योद्धुकामान् निरीक्षे ।
यावद् अहं **कान्** अवस्थितान् योद्धुकामान् निरीक्षे ?	यावद् अहम् **एतान्** अवस्थितान् योद्धुकामान् निरीक्षे ।
यावद् अहम् **(किं ज्ञातुम्)** एतान् अवस्थितान् योद्धुकामान् निरीक्षे ?	यावद् अहं **कैः मया सह योद्धव्यम् (इति ज्ञातुम्)** एतान् अवस्थितान् योद्धुकामान् निरीक्षे ।
यावद् अहं **कुत्र** कैः मया सह योद्धव्यम् (इति ज्ञातुम्) एतान् अवस्थितान् योद्धुकामान् निरीक्षे ?	यावद् अहं **रणसमुद्यमे** कैः मया सह योद्धव्यम् (इति ज्ञातुम्) एतान् अवस्थितान् योद्धुकामान् निरीक्षे ।

तात्पर्यम् - युद्धं कर्तुं के के उपस्थिताः सन्ति, अन्यच्च अस्मिन् युद्धे कैः कैः सह मया योद्धव्यम् इति ज्ञातुम् अहं प्रथमं तान् द्रष्टुम् इच्छामि । अतः कृष्ण ! मम रथं तत्र स्थापय ।

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः ॥१.२३॥

पदच्छेदः - योत्स्यमानान्, अवेक्षे, अहम्, ये, एते, अत्र, समागताः ।
धार्तराष्ट्रस्य, दुर्बुद्धेः, युद्धे, प्रियचिकीर्षवः ॥

अन्वयः - दुर्बुद्धेः धार्तराष्ट्रस्य युद्धे प्रियचिकीर्षवः ये एते अत्र समागताः (तान्) अहं योत्स्यमानान् अवेक्षे ।

पदार्थः - दुर्बुद्धेः = दुष्टमतेः, धार्तराष्ट्रस्य = दुर्योधनस्य, युद्धे = रणे, प्रियचिकीर्षवः = प्रियं कर्तुम् इच्छवः, ये एते = ये इमे, अत्र = अस्मिन् स्थाने, समागताः = समायाताः, अहम् अर्जुनः = अहम्, योत्स्यमानान् = युद्धं करिष्यमाणान्, अवेक्षे = पश्यामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
दुर्बुद्धेः	इ. पुं. ष. एक. (विशेषणम्)	धार्तराष्ट्रस्य	अ. पुं. ष. एक. (विशेष्यम्)
युद्धे	अ. नपुं. स. एक.	प्रियचिकीर्षवः	उ. पुं. प्र. बहु.
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	एते	एतद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)
अत्र	अव्ययम्	समागताः	अ. पुं. प्र. बहु. (विशेषणम्)
अहम्	अस्मद्- द. सर्व. प्र. एक.	योत्स्यमानान्	अ. पुं. द्वि. बहु.
अवेक्षे	अव + ईक्ष् (ईक्ष दर्शने) आत्म. कर्तरि लट् उपु. एक.		

व्याकरणम् -

(क) सन्धिः

अवेक्षेऽहम्	अवेक्षे + अहम्	पूर्वरूपसन्धिः ।
य एते	ये + एते	यान्तवान्तसन्धिः, यलोपः, प्रकृतिभावः ।
एतेऽत्र	एते + अत्र	पूर्वरूपसन्धिः ।
दुर्बुद्धेर्युद्धे	दुर्बुद्धेः + युद्धे	विसर्गसन्धिः (रेफः) ।

(ख) समासः प्रियचिकीर्षवः — प्रियं चिकीर्षवः प्रियचिकीर्षवः - द्वितीयातत्पुरुषः ।

(ग) कृदन्तः

युद्धे	युध् (युध - सम्प्रहारे) + क्त (भावे), तस्मिन् ।
समागताः	सम् + आ + गम् (गम्लृ गतौ) + क्त । (कर्तरि) ।
योत्स्यमानान्	युध् (युध सम्प्रहारे) + लृट्, शानच्, तान् ।

(घ) तद्धितान्तः धार्तराष्ट्रस्य — धृतराष्ट्र + अण् (अपत्यार्थे) । धृतराष्ट्रस्य अपत्यं पुमान् धार्तराष्ट्रः, तस्य ।

भावस्पष्टीकरणम् -

समागताः ।	
के समागताः ?	**एते** समागताः ।
कीदृशाः एते समागताः ?	**प्रियचिकीर्षवः** एते समागताः ।
कस्य प्रियचिकीर्षवः एते समागताः ?	**धार्तराष्ट्रस्य** प्रियचिकीर्षवः एते समागताः ।
कीदृशस्य धार्तराष्ट्रस्य प्रियचिकीर्षवः एते समागताः ?	**दुर्बुद्धेः** धार्तराष्ट्रस्य प्रियचिकीर्षवः एते समागताः ।
दुर्बुद्धेः धार्तराष्ट्रस्य प्रियचिकीर्षवः **कुत्र** एते समागताः ?	दुर्बुद्धेः धार्तराष्ट्रस्य प्रियचिकीर्षवः **अत्र** एते समागताः ।
दुर्बुद्धेः धार्तराष्ट्रस्य प्रियचिकीर्षवः अत्र एते समागताः **तान् किं करोषि** ?	दुर्बुद्धेः धार्तराष्ट्रस्य प्रियचिकीर्षवः अत्र एते समागताः (तान्) **अहम् अवेक्षे** ।
दुर्बुद्धेः धार्तराष्ट्रस्य प्रियचिकीर्षवः अत्र एते समागताः **कीदृशान्** (तान्) त्वम् अवेक्षसे ?	दुर्बुद्धेः धार्तराष्ट्रस्य प्रियचिकीर्षवः अत्र एते समागताः **योत्स्यमानान्** (तान्) अहम् अवेक्षे ।

तात्पर्यम् - युद्धं कर्तुम् अत्र ये आगताः सन्ति ते सर्वे युद्धे दुष्टबुद्धेः दुर्योधनस्य प्रियं कर्तुमेव उपस्थिताः सन्ति । तान् योद्धुम् इच्छतः योधान् अहं पश्यामि ।

सञ्जय उवाच- **एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।**
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥१.२४॥
भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥१.२५॥

पदच्छेदः -

सञ्जयः उवाच - एवम्, उक्तः, हृषीकेशः, गुडाकेशेन, भारत ।
सेनयोः, उभयोः, मध्ये, स्थापयित्वा, रथोत्तमम् ॥
भीष्मद्रोणप्रमुखतः, सर्वेषाम्, च, महीक्षिताम् ।
उवाच, पार्थ, पश्य, एतान्, समवेतान्, कुरून्, इति ॥

अन्वयः - भारत ! एवं गुडाकेशेन उक्तः हृषीकेशः सेनयोः उभयोः मध्ये भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां (प्रमुखतः) रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ।

पदार्थः - भारत = हे धृतराष्ट्र !, एवम् = इत्थम्, गुडाकेशेन = अर्जुनेन, उक्तः = कथितः, हृषीकेशः = कृष्णः, सेनयोः = सैन्ययोः, उभयोः = द्वयोः, मध्ये = अन्तरे, भीष्मद्रोणप्रमुखतः = भीष्मद्रोणादीनां सम्मुखे, सर्वेषाम् = अखिलानाम्, महीक्षितां च = राज्ञां च (सम्मुखे), रथोत्तमम् = रथश्रेष्ठम्, स्थापयित्वा = अवस्थाप्य, पार्थ = अर्जुन ! एतान् = इमान्, समवेतान् = सम्मिलितान्, कुरून् = कुरुवंशीयान्, पश्य = अवलोकय, इति = एवम्, उवाच = अब्रवीत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	एवम्	अव्ययम्
गुडाकेशेन	अ. पुं. तृ. एक.	उक्तः	अ. पुं. प्र. एक. (विशेषणम्)
हृषीकेशः	अ. पुं. प्र. एक. (विशेष्यम्)	सेनयोः	आ. स्त्री. ष. द्विव. (विशेष्यम्)
उभयोः	आ. सर्व. स्त्री. ष. द्विव. (विशेषणम्)	मध्ये	अ. पुं. स. एक.
भीष्मद्रोणप्रमुखतः	अव्ययम्	सर्वेषाम्	अ. सर्व. पुं. ष. बहु. (विशेषणम्)
च	अव्ययम्	महीक्षिताम्	महीक्षित्- त. पुं. ष. बहु. (विशेष्यम्)
रथोत्तमम्	अ. पुं. द्वि. एक.	स्थापयित्वा	क्त्वान्तम् अव्ययम्
पार्थ	अ. पुं. सम्बो. एक.	एतान्	एतद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)
समवेतान्	अ. पुं. द्वि. बहु. (विशेषणम्)	कुरून्	उ. पुं. द्वि. बहु. (विशेष्यम्)
पश्य	पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लोट्. मपु. एक.	इति	अव्ययम्
उवाच	ब्रू (ब्रूञ् व्यक्तायां वाचि) पर. कर्तरि लिट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

एवमुक्तो हृषीकेशः	एवमुक्तः + हृषीकेशः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
हृषीकेशो गुडाकेशेन	हृषीकेशः + गुडाकेशेन	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
सेनयोरुभयोः	सेनयोः + उभयोः	विसर्गसन्धिः (रेफः)।
उभयोर्मध्ये	उभयोः + मध्ये	विसर्गसन्धिः (रेफः)।
सर्वेषां च	सर्वेषाम् + च	अनुस्वारसन्धिः।

(ख) समासः	गुडाकेशेन	गुडाकायाः निद्रायाः ईशः गुडाकेशः, तेन - षष्ठीतत्पुरुषः ।
	हृषीकेशः	हृषीकाणाम् इन्द्रियाणाम् ईशः हृषीकेशः - षष्ठीतत्पुरुषः ।
	भीष्मद्रोणप्रमुखतः	भीष्मश्च द्रोणश्च भीष्मद्रोणौ - द्वन्द्वसमासः । भीष्मद्रोणयोः प्रमुखम्, तस्मिन् - षष्ठीतत्पुरुषः । ततः स्वार्थे तसिः ।
	रथोत्तमम्	रथेषु उत्तमः रथोत्तमः, तम् - सप्तमीतत्पुरुषः ।
(ग) कृदन्तः	उक्तः	वच् (वच परिभाषणे + क्त (कर्मणि) ।
	स्थापयित्वा	स्था (ष्ठा गतिनिवृत्तौ) + णिच् (प्रेरणार्थे) + क्त्वा ।
	समवेतान्	सम् + अव् + इण् (इण गतौ) + क्त (कर्तरि), तान् ।
(घ) तद्धितान्तः	भारत	भरत + अण् (अपत्यार्थे) । भरतस्य गोत्रापत्यं पुमान् ।
	महीक्षिताम्	मही + क्षित् + क्विप् (कर्तरि), तेषाम् ।
	पार्थ	पृथा + अण् (अपत्यार्थे) । पृथायाः अपत्यं पुमान्, तत्सम्बुद्धौ ।

भावस्पष्टीकरणम् -

उवाच ।	
कः उवाच ?	**हृषीकेशः** उवाच ।
कथम्भूतः हृषीकेशः उवाच ?	**उक्तः** हृषीकेशः उवाच ।
कथम् उक्तः हृषीकेशः उवाच ?	**एवम्** उक्तः हृषीकेशः उवाच ।
एवं **केन** उक्तः हृषीकेशः उवाच ?	एवं **गुडाकेशेन** उक्तः हृषीकेशः उवाच ।
एवं गुडाकेशेन उक्तः हृषीकेशः **किम्** उवाच ?	एवं गुडाकेशेन उक्तः हृषीकेशः **'पार्थ ! एतान् समवेतान् कुरून् पश्य'** इति उवाच ।
एवं गुडाकेशेन उक्तः हृषीकेशः **किं कृत्वा** 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ?	एवं गुडाकेशेन उक्तः हृषीकेशः **स्थापयित्वा** 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ।
एवं गुडाकेशेन उक्तः हृषीकेशः **कं** स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ?	एवं गुडाकेशेन उक्तः हृषीकेशः **रथोत्तमं** स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ।
एवं गुडाकेशेन उक्तः हृषीकेशः **कुत्र** रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ?	एवं गुडाकेशेन उक्तः हृषीकेशः **मध्ये** रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ।

एवं गुडाकेशेन उक्तः हृषीकेशः **कयोः** मध्ये रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ?	एवं गुडाकेशेन उक्तः हृषीकेशः **उभयोः** मध्ये रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच।
एवं गुडाकेशेन उक्तः हृषीकेशः **कयोः** उभयोः मध्ये रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ?	एवं गुडाकेशेन उक्तः हृषीकेशः **सेनयोः** उभयोः मध्ये रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच।
एवं गुडाकेशेन उक्तः हृषीकेशः सेनयोः उभयोः मध्ये **कुत्र** रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ?	एवं गुडाकेशेन उक्तः हृषीकेशः सेनयोः उभयोः मध्ये **भीष्मद्रोणप्रमुखतः** रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच।
एवं गुडाकेशेन उक्तः हृषीकेशः सेनयोः उभयोः मध्ये भीष्मद्रोणप्रमुखतः **पुनश्च केषां** (प्रमुखतः) रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ?	एवं गुडाकेशेन उक्तः हृषीकेशः सेनयोः उभयोः मध्ये भीष्मद्रोणप्रमुखतः **महीक्षितां च** (प्रमुखतः) रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच।
एवं गुडाकेशेन उक्तः हृषीकेशः सेनयोः उभयोः मध्ये भीष्मद्रोणप्रमुखतः **कतीनां** महीक्षितां च (प्रमुखतः) रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच ?	एवं गुडाकेशेन उक्तः हृषीकेशः सेनयोः उभयोः मध्ये भीष्मद्रोणप्रमुखतः **सर्वेषां** च महीक्षितां (प्रमुखतः) रथोत्तमं स्थापयित्वा 'पार्थ ! एतान् समवेतान् कुरून् पश्य' इति उवाच।
अस्मिन् वाक्ये सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - अर्जुनः भगवन्तं श्रीकष्णं यदा एवम् उक्तवान् तदा श्रीकृष्णः तयोः सेनयोः मध्ये रथं स्थापितवान्। भीष्मस्य द्रोणस्य अन्येषां राज्ञां च सम्मुखे रथं संस्थाप्य सः "अर्जुन ! युद्धं कर्तुम् उपस्थितान् एतान् कौरवपक्षीयान् पश्य" इति अवदत्।

तत्रापश्यत् स्थितान् पार्थः पितॄनथ पितामहान्।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा ॥१.२६॥
श्वशुरान् सुहृदश्चैव सेनयोरुभयोरपि।

पदच्छेदः - तत्र, अपश्यत्, स्थितान्, पार्थः, पितॄन्, अथ, पितामहान्।
आचार्यान्, मातुलान्, भ्रातॄन्, पुत्रान्, पौत्रान्, सखीन्, तथा,
श्वशुरान्, सुहृदः, च, एव, सेनयोः, उभयोः, अपि।

अन्वयः - अथ पार्थः तत्र स्थितान् पितॄन् पितामहान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् तथा पौत्रान् सखीन् श्वशुरान् सुहृदः च एव उभयोः अपि सेनयोः अपश्यत् ।

पदार्थः - अथ = ततः, पार्थः = अर्जुनः, तत्र = तस्मिन् प्रदेशे, स्थितान् = वर्तमानान्, पितॄन् = पितृतुल्यान्, पितामहान् = पितुः पितॄन्, आचार्यान् = गुरून्, मातुलान् = मातृसहोदरान्, भ्रातॄन् = सहोदरान्, पुत्रान् = पुत्रतुल्यान्, पौत्रान् = पुत्रपुत्रान्, सखीन् = मित्राणि, श्वशुरान् = भार्यायाः पितॄन्, सुहृदः च = कृतोपकारान् च, उभयोः = द्वयोः, अपि = अपि, सेनयोः = सैन्ययोः, अपश्यत् = दृष्टवान् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अथ	अव्ययम्	पार्थः	अ. पुं. प्र. एक.
तत्र	अव्ययम्	स्थितान्	अ. पुं. द्वि. बहु. (विशेषणम्)
पितॄन्	ऋ. पुं. द्वि. बहु. (विशेष्यम्)	पितामहान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
आचार्यान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	मातुलान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
भ्रातॄन्	ऋ. पुं. द्वि. बहु. (विशेष्यम्)	पुत्रान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
पौत्रान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	तथा	अव्ययम्
सखीन्	सखि- इ. पुं. द्वि. बहु. (विशेष्यम्)	श्वशुरान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
सुहृदः	सुहृद्- द. पुं. द्वि. बहु. (विशेष्यम्)	च	अव्ययम्
एव	अव्ययम्	उभयोः	आ.सर्व. स्त्री. ष. द्विव. (विशेषणम्)
अपि	अव्ययम्	सेनयोः	आ. स्त्री. ष. द्विव. (विशेष्यम्)
अपश्यत्	पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

तत्रापश्यत्	तत्र + अपश्यत्	सवर्णदीर्घसन्धिः ।
सखींस्तथा	सखीन् + तथा	सत्वसन्धिः अनुस्वारागमः च ।
सुहृदश्च	सुहृदः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
चैव	च + एव	वृद्धिसन्धिः ।
सेनयोरुभयोः	सेनयोः + उभयोः	विसर्गसन्धिः (रेफः) ।
उभयोरपि	उभयोः + अपि	विसर्गसन्धिः (रेफः) ।

(ख) कृदन्तः

स्थितान्	स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि), तान् ।
आचार्यान्	आ + चर् (चर गतिभक्षणयोः) + ण्यत्, तान् ।

(ग) तद्धितान्तः पार्थः — पृथा + अण्, (अपत्यार्थे)। पृथायाः अपत्यं पुमान्।
पितामहान् — पितृ + डामहच् (पितुः पिता इत्यर्थे) पितामहः, तान्।
मातुलान् — मातृ + डुलच् (मातुः भ्राता इत्यर्थे)। मातुः भ्राता मातुलः, तान्।
पौत्रान् — पुत्र + अण् (अपत्यार्थे) पुत्रस्य अपत्यं पुमान्, तान्।

भावस्पष्टीकरणम् -

अपश्यत्।	
कः अपश्यत्।	**पार्थः** अपश्यत्।
पार्थः **कान् कान्** अपश्यत्?	पार्थः **पितॄन् पितामहान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखीन् श्वशुरान् सुहृदः च** अपश्यत्।
पार्थः पितॄन् पितामहान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखीन् श्वशुरान् सुहृदः च **कुत्र** अपश्यत्?	पार्थः पितॄन् पितामहान् आचार्यान् मातुलान् भ्रातॄन् पुत्रान् पौत्रान् सखीन् श्वशुरान् सुहृदः च **सेनयोः** अपश्यत्।
पार्थः पितॄन् पितामहान् .... श्वशुरान् सुहृदः च **कयोः** सेनयोः अपश्यत्?	पार्थः पितॄन् पितामहान् .... श्वशुरान् सुहृदः च **उभयोः** सेनयोः अपि अपश्यत्।
पार्थः **कथम्भूतान्** पितॄन् पितामहान् .... श्वशुरान् सुहृदः च उभयोः सेनयोः अपि अपश्यत्?	पार्थः **स्थितान्** पितॄन् पितामहान् श्वशुरान् सुहृदः च उभयोः सेनयोः अपि अपश्यत्।
पार्थः **कुत्र** स्थितान् पितॄन् पितामहान् .... श्वशुरान् सुहृदः च उभयोः सेनयोः अपि अपश्यत्?	पार्थः **तत्र** स्थितान् पितॄन् पितामहान् .... श्वशुरान् सुहृदः च उभयोः सेनयोः अपि अपश्यत्।
कदा पार्थः तत्र स्थितान् पितॄन् पितामहान् .... श्वशुरान् सुहृदः च उभयोः सेनयोः अपि अपश्यत्?	**अथ** पार्थः तत्र स्थितान् पितॄन् पितामहान् .... श्वशुरान् सुहृदः च उभयोः सेनयोः अपि अपश्यत्।

तात्पर्यम् - उभयोः सेनयोः मध्ये अर्जुनः स्वबान्धवान्, गुरून्, मित्राणि च अपश्यत्।

तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धूनवस्थितान्॥१.२७॥
कृपया परयाविष्टो विषीदन्निदमब्रवीत्।

पदच्छेदः - तान्, समीक्ष्य, सः, कौन्तेयः, सर्वान्, बन्धून्, अवस्थितान्॥
कृपया, परया, आविष्टः, विषीदन्, इदम्, अब्रवीत्।

अन्वयः - परया कृपया आविष्टः सः कौन्तेयः तान् सर्वान् अवस्थितान् बन्धून् समीक्ष्य विषीदन् इदम् अब्रवीत्।

पदार्थः - परया = अधिकया, कृपया = दयया, आविष्टः = सहितः, सः कौन्तेयः = सः अर्जुनः, तान् = तान्, सर्वान् = अखिलान्, अवस्थितान् = उपस्थितान्, बन्धून् = बान्धवान्, समीक्ष्य = अवलोक्य, विषीदन् = सन्तप्यमानः, इदम् = एतत्, अब्रवीत् = अवदत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परया	आ. स्त्री. तृ. एक. (विशेषणम्)	कृपया	आ. स्त्री. तृ. एक. (विशेष्यम्)
आविष्टः	अ. पुं. प्र. एक. (विशेषणम्)	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
कौन्तेयः	अ. पुं. प्र. एक. (विशेष्यम्)	तान्	तद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)
सर्वान्	अ. सर्व. पुं. द्वि. बहु. (विशेषणम्)	अवस्थितान्	अ. पुं. द्वि. बहु. (विशेषणम्)
बन्धून्	उ. पुं. द्वि. बहु. (विशेष्यम्)	समीक्ष्य	ल्यबन्तम् अव्ययम्
विषीदन्	विषीदत्- त. पुं. प्र. एक. (विशेषणम्)	इदम्	इदम्- म. सर्व. नपुं. द्वि. एक. (विशेषणम्)
अब्रवीत्	ब्रू (ब्रूञ् व्यक्तायां वाचि) पर. कर्तरि लङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	स कौन्तेयः	सः + कौन्तेयः	विसर्गसन्धिः (लोपः)।
	परयाविष्टः	परया + आविष्टः	सवर्णदीर्घसन्धिः[1]।
	आविष्टो विषीदन्	आविष्टः + विषीदन्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	विषीदन्निदम्	विषीदन् + इदम्	ङमुडागमसन्धिः।
(ख) कृदन्तः	आविष्टः	आ + विश् (विश प्रवेशने) + क्त (कर्मणि)	
	अवस्थितान्	अव + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) तान्।	
	समीक्ष्य	सम् + ईक्ष् (ईक्ष दर्शने) + ल्यप्।	
	विषीदन्	वि + सद् (षद्लृ विशरणगत्यवसादनेषु) + शतृ (कर्तरि)।	
(ग) तद्धितान्तः	कौन्तेयः	कुन्ती + ढक् (अपत्यार्थे, एय इत्यादेशः) कुन्त्याः अपत्यं पुमान्।	

---

1. अत्र शास्त्रदृशा पररूपसन्धिः अस्ति। किन्तु एतादृशेषु स्थलेषु सरलतायै सर्वत्र सवर्णदीर्घसन्धिः इति निर्दिष्टः। उयत्र रूपं तु समानमेव।

भावस्पष्टीकरणम् -

अब्रवीत्।	
कः अब्रवीत्?	**कौन्तेयः** अब्रवीत्।
कः कौन्तेयः अब्रवीत्?	**सः** कौन्तेयः अब्रवीत्।
कथम्भूतः सः कौन्तेयः अब्रवीत्?	**आविष्टः** सः कौन्तेयः अब्रवीत्।
कया आविष्टः सः कौन्तेयः अब्रवीत्?	**कृपया** आविष्टः सः कौन्तेयः अब्रवीत्।
कीदृश्या कृपया आविष्टः सः कौन्तेयः अब्रवीत्?	**परया** कृपया आविष्टः सः कौन्तेयः अब्रवीत्।
परया कृपया आविष्टः सः कौन्तेयः **किं कुर्वन्** अब्रवीत्?	परया कृपया आविष्टः सः कौन्तेयः **विषीदन्** अब्रवीत्।
परया कृपया आविष्टः सः कौन्तेयः विषीदन् **किम्** अब्रवीत्?	परया कृपया आविष्टः सः कौन्तेयः विषीदन् **इदम्** अब्रवीत्।
परया कृपया आविष्टः सः कौन्तेयः विषीदन् **किं कृत्वा** इदम् अब्रवीत्?	परया कृपया आविष्टः सः कौन्तेयः विषीदन् **समीक्ष्य** इदम् अब्रवीत्।
परया कृपया आविष्टः सः कौन्तेयः विषीदन् **कान्** समीक्ष्य इदम् अब्रवीत्?	परया कृपया आविष्टः सः कौन्तेयः विषीदन् **तान्** समीक्ष्य इदम् अब्रवीत्।
परया कृपया आविष्टः सः कौन्तेयः विषीदन् **कान्** तान् समीक्ष्य इदम् अब्रवीत्?	परया कृपया आविष्टः सः कौन्तेयः विषीदन् तान् **बन्धून्** समीक्ष्य इदम् अब्रवीत्।
परया कृपया आविष्टः सः कौन्तेयः विषीदन् **कथम्भूतान्** तान् बन्धून् समीक्ष्य इदम् अब्रवीत्?	परया कृपया आविष्टः सः कौन्तेयः विषीदन् तान् **अवस्थितान्** बन्धून् समीक्ष्य इदम् अब्रवीत्।
परया कृपया आविष्टः सः कौन्तेयः विषीदन् तान् **कति** अवस्थितान् बन्धून् समीक्ष्य इदम् अब्रवीत्?	परया कृपया आविष्टः सः कौन्तेयः विषीदन् तान् **सर्वान्** अवस्थितान् बन्धून् समीक्ष्य इदम् अब्रवीत्।

तात्पर्यम् - अर्जुनः तत्र सम्मिलितान् सर्वान् बान्धवान् दृष्ट्वा करुणया युक्तः अभवत्। सः महान्तं क्लेशम् अनुभवन् इदम् वाक्यम् अवदत्।

अर्जुन उवाच - दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥१.२८॥
सीदन्ति मम गात्राणि मुखं च परिशुष्यति।

पदच्छेदः -

अर्जुन, उवाच- दृष्ट्वा, इमम्, स्वजनम्, कृष्ण, युयुत्सुम्, समुपस्थितम्।
सीदन्ति, मम, गात्राणि, मुखम्, च, परिशुष्यति ॥

अन्वयः - कृष्ण ! युयुत्सुं समुपस्थितम् इमं स्वजनं दृष्ट्वा मम गात्राणि सीदन्ति मुखं च परिशुष्यति ।

पदार्थः - कृष्ण = मधुसूदन ! युयुत्सुम् = योद्धुमिच्छुम्, समुपस्थितम् = समीपे वर्तमानम्, इमम् = एनम्, स्वजनम् = आत्मीयजनम्, दृष्ट्वा = अवलोक्य, मम = मे, गात्राणि = अङ्गानि, सीदन्ति = शिथिलीभवन्ति, मुखं च = वदनं च, परिशुष्यति = शुष्कं भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कृष्ण	अ. पुं. सम्बो. एक.	युयुत्सुम्	उ. पुं. द्वि. एक. (विशेषणम्)
समुपस्थितम्	अ. पुं. द्वि. एक. (विशेषणम्)	इमम्	इदम्- म. सर्व. पुं. द्वि. एक. (विशेषणम्)
स्वजनम्	अ. पुं. द्वि. एक. (विशेष्यम्)	दृष्ट्वा	क्त्वान्तम् अव्ययम्
मम	अस्मद्- द. सर्व. ष. एक.	गात्राणि	अ. नपुं. प्र. बहु.
सीदन्ति	सीद (षद्लृ विशरणगत्यवसादनेषु) पर. कर्तरि लट्. प्रपु. बहु.	मुखम्	अ. नपुं. प्र. एक.
च	अव्ययम्	परिशुष्यति	परि + शुष् (शुष शोषणे) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	दृष्ट्वेमं	दृष्ट्वा + इमम्	गुणसन्धिः ।
	इमं स्वजनम्	इमम् + स्वजनम्	अनुस्वारसन्धिः ।
	स्वजनं कृष्ण	स्वजनम् + कृष्ण	अनुस्वारसन्धिः ।
	युयुत्सुं समुपस्थितम्	युयुत्सुम् + समुपस्थितम्	अनुस्वारसन्धिः ।
	मुखं च	मुखम् + च	अनुस्वारसन्धिः ।
(ख) समासः	स्वजनम्	स्वस्य जनः स्वजनः, तम् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	समुपस्थितम्	सम् + उप + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि), तम् ।	
	दृष्ट्वा	दृश् (दृशिर् प्रेक्षणे) + क्त्वा ।	

भावस्पष्टीकरणम् -

सीदन्ति ।	
कानि सीदन्ति ?	**गात्राणि** सीदन्ति ।
कस्य गात्राणि सीदन्ति ?	**मम** गात्राणि सीदन्ति ।

किं कृत्वा मम गात्राणि सीदन्ति ?	**दृष्ट्वा** मम गात्राणि सीदन्ति ।
कं दृष्ट्वा मम गात्राणि सीदन्ति ?	**इमं स्वजनं** दृष्ट्वा मम गात्राणि सीदन्ति ।
कथम्भूतम् इमं स्वजनं दृष्ट्वा मम गात्राणि सीदन्ति ?	**समुपस्थितम्** इमं स्वजनं दृष्ट्वा मम गात्राणि सीदन्ति ।
पुनश्च कीदृशं समुपस्थितम् इमं स्वजनं दृष्ट्वा मम गात्राणि सीदन्ति ?	**युयुत्सुं** समुपस्थितम् इमं स्वजनं दृष्ट्वा मम गात्राणि सीदन्ति ।
परिशुष्यति च ।	
किं च परिशुष्यति ?	**मुखं** च परिशुष्यति ।
अस्मिन् वाक्ये सम्बोधनपदं किम् ?	**कृष्ण !**

तात्पर्यम् - हे कृष्ण ! युद्धं कर्तुम् आगताः एते सर्वेऽपि अस्मदीयाः एव। एतान् दृष्ट्वा मम अङ्गानि शिथिलानि जायमानानि सन्ति। मुखम् अपि शुष्कं जायमानम् अस्ति।

वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥१.२९॥
गाण्डीवं स्रंसते हस्तात् त्वक्चैव परिदह्यते।
न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥१.३०॥

पदच्छेदः - वेपथुः, च, शरीरे, मे, रोमहर्षः, च, जायते ॥
गाण्डीवम्, स्रंसते, हस्तात्, त्वक्, च, एव, परिदह्यते ।
न, च, शक्नोमि, अवस्थातुम्, भ्रमति, इव, च, मे, मनः ॥

अन्वयः - रोमहर्षः वेपथुः च मे शरीरे जायते। हस्तात् गाण्डीवं स्रंसते। त्वक् च एव परिदह्यते। अवस्थातुं न शक्नोमि। मे मनः भ्रमति इव।

पदार्थः - रोमहर्षः = रोमाञ्चः, वेपथुः च = कम्पनं च, मे = मम, शरीरे = देहे, जायते = उद्भवन् अस्ति, हस्तात् = करात्, गाण्डीवम् = गाण्डीवनामकं धनुः, स्रंसते = भ्रश्यति, त्वक् च एव = चर्म च, परिदह्यते = सन्तप्यते, अवस्थातुम् = स्थातुम्, न शक्नोमि = नहि प्रभवामि, मनः = चित्तम्, भ्रमति इव = भ्राम्यति इति मन्ये।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
रोमहर्षः	अ. पुं. प्र. एक.	वेपथुः	उ. पुं. प्र. एक.
च	अव्ययम्	मे	अस्मद्- द. सर्व. पुं. ष. एक.

शरीरे	अ. नपुं. स. एक.	जायते	जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.
हस्तात्	अ. पुं. पं. एक.	गाण्डीवम्	अ. नपुं. प्र. एक.
स्रंसते	स्रंस् (स्रंसु अवस्रंसने) आत्म. कर्तरि लट्. प्रपु. एक.	त्वक्	त्वच् - चका. स्त्री. प्र. एक.
एव	अव्ययम्	परिदह्यते	परि + दह् (दह भस्मीकरणे) पर. कर्मणि लट्. प्रपु. एक.
अवस्थातुम्	तुमुन्नन्तम् अव्ययम्	न	अव्ययम्
शक्नोमि	शक् (शक्लृ शक्तौ) पर. कर्तरि लट्. उपु. एक.	मनः	मनस्- सका. नपुं. प्र. एक.
भ्रमति	भ्रम् (भ्रमु चलने) पर. कर्तरि लट्. प्रपु. एक.	इव	अव्ययम्

व्याकरणम् -

(क) सन्धिः	वेपथुश्च	वेपथुः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	रोमहर्षश्च	रोमहर्षः + च	विसर्गसन्धिः (सकारः) श्चुत्वम्।
	गाण्डीवं स्रंसते	गाण्डीवम् + स्रंसते	अनुस्वारसन्धिः।
	चैव	च + एव	वृद्धिसन्धिः।
	शक्नोम्यवस्थातुम्	शक्नोमि + अवस्थातुम्	यणसन्धिः।
	भ्रमतीव	भ्रमति + इव	सवर्णदीर्घसन्धिः।
(ख) समासः	रोमहर्षः	रोम्णां हर्षः रोमहर्षः - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	अवस्थातुम्	अव + स्था (ष्ठा गतिनिवृत्तौ) + तुमुन्।	
(घ) तद्धितान्तः	गाण्डीवम्	गाण्डि + व। पूर्वपदस्य दीर्घो विकल्पेन। गाण्डिः ग्रन्थिः अस्य अस्मिन् वा अस्ति इति गाण्डीवम्।	

भावस्पष्टीकरणम् -

जायते।	
कः जायते ?	**रोमहर्षः** जायते।
रोमहर्षः **पुनश्च कः** जायते ?	रोमहर्षः **वेपथुश्च** जायते।
रोमहर्षः वेपथुश्च **कुत्र** जायते ?	रोमहर्षः वेपथुश्च **शरीरे** जायते।

रोमहर्षः वेपथुश्च **कस्य** शरीरे जायते ?	रोमहर्षः वेपथुश्च **मे** शरीरे जायते ।
स्रंसते ।	
किं स्रंसते ?	**गाण्डीवं** स्रंसते ।
कस्मात् गाण्डीवं स्रंसते ?	**हस्तात्** गाण्डीवं स्रंसते ।
परिदह्यते ।	
किं च एव परिदह्यते ?	**त्वक् च एव** परिदह्यते ।
न च शक्नोमि ।	
किं कर्तुं च न शक्नोमि ?	**अवस्थातुं** च न शक्नोमि ।
भ्रमति इव ।	
किं भ्रमति इव ?	**मनः** भ्रमति इव ।
कस्य मनः भ्रमति इव ?	**मे** मनः भ्रमति इव ।

तात्पर्यम् - मम शरीरे कम्पः जायते । अहं रोमाञ्चम् अनुभवन् अस्मि । गाण्डीवं धनुः मम हस्तात् स्रंसते । मम त्वक् दग्धा इव भवति । अहं सम्यक् स्थातुं न शक्नोमि । मम मनः भ्रमति इव ।

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे ॥१.३१॥

पदच्छेदः - निमित्तानि, च, पश्यामि, विपरीतानि, केशव ।
न, च, श्रेयः, अनुपश्यामि, हत्वा, स्वजनम्, आहवे ॥

अन्वयः - केशव ! विपरीतानि च निमित्तानि पश्यामि । आहवे स्वजनं हत्वा श्रेयः च न अनुपश्यामि ।

पदार्थः - केशव = कृष्ण !, विपरीतानि च = प्रतिकूलानि अपि, निमित्तानि = शकुनानि, पश्यामि = (अवलोकयामि) आहवे = युद्धे, स्वजनम् = बान्धवम्, हत्वा = निहत्य (मारयित्वा), श्रेयः च = कल्याणं च, न = नहि, अनुपश्यामि = अनुभावयामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
केशव	अ. पुं. सम्बो. एक.	विपरीतानि	अ. नपुं. द्वि. बहु. (विशेषणम्)
च	अव्ययम्	निमित्तानि	अ. नपुं. द्वि. बहु. (विशेष्यम्)

पश्यामि	पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. उपु. एक.	आहवे	अ. पुं. स. एक.
स्वजनम्	अ. पुं. द्वि. एक.	हत्वा	क्त्वान्तम् अव्ययम्
श्रेयः	श्रेयस्- सका. नपुं. द्वि. एक.	न	अव्ययम्
अनुपश्यामि	अनु + पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः श्रेयोऽनुपश्यामि श्रेयः + अनुपश्यामि विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः स्वजनम् स्वस्य जनः स्वजनः, तम् - षष्ठीतत्पुरुषः।

(ग) कृदन्तः निमित्तानि नि + मिद् (ञिमिदा स्नेहने) + क्त (कर्तरि), तानि।

विपरीतानि वि + परि + इ (इण् गतौ) + क्त (कर्तरि), तानि।

हत्वा हन् (हन हिंसागत्योः) + क्त्वा।

जनः जन् (जनी प्रादुर्भावे) + अच्।

(घ) तद्धितान्तः श्रेयः प्रशस्य + ईयसुन् (अतिशये) प्रशस्यशब्दस्य 'श्र' इति आदेशः।

केशवः केश + व। प्रशस्ताः केशाः सन्ति अस्य अस्मिन् वा।

भावस्पष्टीकरणम् -

पश्यामि।	
कानि च पश्यामि ?	**निमित्तानि** च पश्यामि।
कीदृशानि च निमित्तानि पश्यामि ?	**विपरीतानि** च निमित्तानि पश्यामि।
अनुपश्यामि।	
किं च न अनुपश्यामि ?	**श्रेयः** च न अनुपश्यामि
किं कृत्वा श्रेयः च न अनुपश्यामि ?	**हत्वा** श्रेयः च न अनुपश्यामि।
कं हत्वा श्रेयः च न अनुपश्यामि ?	**स्वजनं** हत्वा श्रेयः च न अनुपश्यामि।
कुत्र स्वजनं हत्वा श्रेयः च न अनुपश्यामि ?	**आहवे** स्वजनं हत्वा श्रेयः च न अनुपश्यामि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**केशव** !

तात्पर्यम् - हे केशव ! अहं बहूनि अपशकुनानि अमङ्गलानि लक्षणानि पश्यामि । युद्धे स्वीयान् बान्धवान् आप्तजनान् हत्वा किञ्चिदपि कल्याणं न अनुपश्यामि । अपि तु अमङ्गलम् एव प्राप्नोमि इति अहम् अनुभवामि ।

न काङ्क्षे विजयं कृष्ण! न च राज्यं सुखानि च।
किं नो राज्येन गोविन्द! किं भोगैर्जीवितेन वा ॥१.३२॥

पदच्छेदः - न, काङ्क्षे, विजयम्, कृष्ण, न, च, राज्यम्, सुखानि, च ।
किम्, नः, राज्येन, गोविन्द, किम्, भोगैः, जीवितेन, वा ॥

अन्वयः - कृष्ण ! (अहम्) विजयं राज्यं सुखानि च न काङ्क्षे । गोविन्द ! राज्येन भोगैः जीवितेन वा नः किम् ?

पदार्थः - कृष्ण = हे वासुदेव !, विजयम् = जयम्, राज्यम् = राष्ट्रम्, सुखानि च = सुखभोगान् अपि, न काङ्क्षे = न इच्छामि, गोविन्द = हे कृष्ण !, राज्येन = राष्ट्रेण, भोगैः = भोग्यवस्तुभिः, जीवितेन वा = जीवनेन वा, नः = अस्माकम्, किम् = किं प्रयोजनम् ?

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कृष्ण	अ. पुं. सम्बो. एक.	विजयम्	अ. पुं. द्वि. एक.
राज्यम्	अ. नपुं. द्वि. एक.	सुखानि	अ. नपुं. द्वि. बहु.
च	अव्ययम्	न	अव्ययम्
काङ्क्षे (काङ्क्षामि)	काङ्क्ष् (काक्षि काङ्क्षायाम्)[1] पर. कर्तरि लट्. उपु. एक.	गोविन्द	अ. पुं. सम्बो. एक.
राज्येन	अ. नपुं. तृ. एक.	भोगैः	अ. पुं. तृ. बहु.
जीवितेन	अ. नपुं. तृ. एक.	वा	अव्ययम्
नः	अस्मद्- द. सर्व. ष. बहु.	किम्	किम्- म. सर्व. नपुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः			
	विजयं कृष्ण	विजयम् + कृष्ण	अनुस्वारसन्धिः ।
	राज्यं सुखानि	राज्यम् + सुखानि	अनुस्वारसन्धिः ।
	किं नः	किम् + नः	अनुस्वारसन्धिः ।
	नो राज्येन	नः + राज्येन	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	किं भोगैः	किम् + भोगैः	अनुस्वारसन्धिः ।
	भोगैर्जीवितेन	भोगैः + जीवितेन	विसर्गसन्धिः (रेफः) ।

1. (अयं धातुः परस्मैपदी वर्तते अतः काङ्क्षामि इति रूपं स्यात् । परन्तु अत्र आत्मनेपदित्वेन आर्षः प्रयोगः अस्ति ।)

(ख) कृदन्तः गोविन्द — गो + विद् (विद्लृ लाभे) + श (कर्तरि)। गाः विन्दति इति गोविन्दः, तत्सम्बुद्धौ। धेनूः प्राप्नोति इत्यर्थः।

विजयम् — वि + जि (जि जये) + अच् (कर्तरि), तम्।

भोगैः — भुज् (भुज पालनाभ्यवहारयोः) + घञ्, तैः।

जीवितेन — जीव् (जीव प्राणने) + क्त (कर्मणि), तेन।

(ग) तद्धितान्तः राज्यम् — राजन् + यक्। राज्ञः भावः कर्म वा।

भावस्पष्टीकरणम् -

न काङ्क्षे।	
कं न काङ्क्षे ?	**विजयं** न काङ्क्षे।
विजयं **पुनश्च किं** न काङ्क्षे ?	विजयं **राज्यं** च न काङ्क्षे।
विजयं राज्यं **पुनश्च कानि** न काङ्क्षे ?	विजयं राज्यं **सुखानि** च न काङ्क्षे।
राज्येन किम् ?	
राज्येन **पुनश्च कैः** किम् ?	राज्येन **भोगैश्च** किम् ?
राज्येन भोगैः **पुनश्च केन वा** किम् ?	राज्येन भोगैः **जीवितेन वा** किम् ?
राज्येन भोगैः जीवितेन वा **केषां** किम् ?	राज्येन भोगैः जीवितेन वा **नः** किम् ?
अस्मिन् श्लोके सम्बोधनपदे के ?	**कृष्ण, गोविन्द !**

तात्पर्यम् - हे कृष्ण ! अहं विजयं न इच्छामि। अहं राज्यं सुखानि चापि न इच्छामि। हे गोविन्द ! अस्माकं राज्येन भोगैः प्राणैः वा किं प्रयोजनम् ? हे माधव ! सांसारिकभोग्यवस्तुषु मम अभिरुचिः नास्ति।

येषामर्थे काङ्क्षितं नो राज्यं भोगाः सुखानि च।
त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च॥१.३३॥
आचार्याः पितरः पुत्रास्तथैव च पितामहाः।
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा॥१.३४॥

पदच्छेदः - येषाम्, अर्थे, काङ्क्षितम्, नः, राज्यम्, भोगाः, सुखानि, च।
ते, इमे, अवस्थिताः, युद्धे, प्राणान्, त्यक्त्वा, धनानि, च॥
आचार्याः, पितरः, पुत्राः, तथा, एव, च, पितामहाः।
मातुलाः, श्वशुराः, पौत्राः, श्यालाः, सम्बन्धिनः, तथा।

अन्वयः - येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते इमे आचार्याः पितरः पुत्राः तथा एव पितामहाः मातुलाः श्वशुराः पौत्राः श्यालाः तथा सम्बन्धिनः प्राणान् धनानि च त्यक्त्वा युद्धे अवस्थिताः (सन्ति)।

पदार्थः - येषाम् = येषां जनानाम्, अर्थे = कृते, राज्यम् = राष्ट्रम्, भोगाः = सांसारिकभोग्यवस्तूनि, सुखानि च = सुखदायकानि वस्तूनि च, काङ्क्षितम् = वाञ्छितम्, ते = तादृशाः, इमे = एते, आचार्याः = गुरवः, पितरः = पितरः, पुत्राः = पुत्राः, तथा एव = एवम् (तथैव), पितामहाः = पितामहाः, मातुलाः = मातुलाः, श्वशुराः = श्वशुराः, पौत्राः = पौत्राः, श्यालाः = भार्यायाः सहोदराः, तथा = तथा च, सम्बन्धिनः = बान्धवाः, प्राणान् = असून्, धनानि च = अर्थान् च, त्यक्त्वा = विहाय, युद्धे = रणे, अवस्थिताः = स्थिताः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
येषाम्	यद्- द. सर्व. पुं. ष. बहु. (विशेषणम्)	अर्थे	अव्ययम्
राज्यम्	अ. नपुं. प्र. एक.	भोगाः	अ. पुं. प्र. बहु.
सुखानि	अ. नपुं. प्र. बहु.	च	अव्ययम्
नः	अस्मद् - द. सर्व. ष. बहु.	काङ्क्षितम्	अ. नपुं. प्र. एक. (विशेषणम्)
ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	इमे	इदम्- म. सर्व. पुं. प्र. बहु. (विशेषणम्)
आचार्याः	अ. पुं. प्र. बहु. (विशेष्यम्)	पितरः	पितृ- ऋ. पुं. प्र. बहु. (विशेष्यम्)
पुत्राः	अ. पुं. प्र. बहु. (विशेष्यम्)	तथा	अव्ययम्
एव	अव्ययम्	पितामहाः	अ. पुं. प्र. बहु. (विशेष्यम्)
मातुलाः	अ. पुं. प्र. बहु. (विशेष्यम्)	श्वशुराः	अ. पुं. प्र. बहु. (विशेष्यम्)
पौत्राः	अ. पुं. प्र. बहु. (विशेष्यम्)	श्यालाः	अ. पुं. प्र. बहु. (विशेष्यम्)
सम्बन्धिनः	सम्बन्धिन्- न. पुं. प्र. बहु. (विशेष्यम्)	प्राणान्	अ. पुं. द्वि. बहु.
धनानि	अ. नपुं. द्वि. बहु.	त्यक्त्वा	क्त्वान्तम् अव्ययम्
युद्धे	अ. नपुं. स. एक.	अवस्थिताः	अ. पुं. प्र. बहु. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः

काङ्क्षितं नः	काङ्क्षितम् + नः	अनुस्वारसन्धिः।
नो राज्यम्	नः + राज्यम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
राज्यं भोगाः	राज्यम् + भोगाः	अनुस्वारसन्धिः।

	त इमे	ते + इमे	यान्तवान्तादेशसन्धिः, यलोपः, प्रकृतिभावः।
	इमेऽवस्थिताः	इमे + अवस्थिताः	पूर्वरूपसन्धिः।
	अवस्थिता युद्धे	अवस्थिताः + युद्धे	विसर्गसन्धिः (लोपः)।
	प्राणांस्त्यक्त्वा	प्राणान् + त्यक्त्वा	सत्वसन्धिः (रेफः, विसर्गः, अनुस्वारः सकारश्च)
	पुत्रास्तथा	पुत्राः + तथा	विसर्गसन्धिः (सकारः)।
	तथैव	तथा + एव	वृद्धिसन्धिः।
	सम्बन्धिनस्तथा	सम्बन्धिनः + तथा	विसर्गसन्धिः (सकारः)।
(ख) कृदन्तः	काङ्क्षितम्	काङ्क्ष् (काक्षि काङ्क्षायाम्) + क्त। (कर्मणि)।	
	भोगाः	भुज् (भुज पालनाभ्यवहारयोः) + घञ् (कर्मणि)।	
	अवस्थिताः	अव + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि)।	
	युद्धे	युध् (युध सम्प्रहारे) + क्त। (भावे), तस्मिन्।	
	त्यक्त्वा	त्यज् (त्यज हानौ) + क्त्वा।	
	आचार्याः	आ + चर् (चर गतिभक्षणयोः) + ण्यत् (कर्मणि)।	
	पितरः	पा (पा रक्षणे) + तृच् (कर्तरि)।	
(ग) तद्धितान्तः	राज्यम्	राजन् + यक्। राज्ञः भावः कर्म वा।	
	पितामहाः	पितृ + डामहच्। पितुः पिता इत्यर्थे।	
	मातुलाः	मातृ + डुलच्। मातुः भ्राता इत्यर्थे।	
	सम्बन्धिनः	सम्बन्ध + इनि, सम्बन्धः एषाम् एषु वा अस्ति।	

भावस्पष्टीकरणम् -

काङ्क्षितम्।	
किं किं काङ्क्षितम्?	**राज्यं भोगाः सुखानि** च काङ्क्षितम्।
राज्यं भोगाः सुखानि च **केषां** काङ्क्षितम्?	राज्यं भोगाः सुखानि च **नः** काङ्क्षितम्।
केषां कृते राज्यं भोगाः सुखानि च नः काङ्क्षितम्?	येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितम्।
येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **कथम्भूताः**?	येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **अवस्थिताः**।
येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **कुत्र** अवस्थिताः?	येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **युद्धे** अवस्थिताः।

येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **किं कृत्वा** युद्धे अवस्थिताः ?	येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **त्यक्त्वा** युद्धे अवस्थिताः ।
येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **कान्** त्यक्त्वा युद्धे अवस्थिताः ?	येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **प्राणान्** त्यक्त्वा युद्धे अवस्थिताः ।
येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते प्राणान् **पुनश्च कानि** त्यक्त्वा युद्धे अवस्थिताः ?	येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते प्राणान् **धनानि च** त्यक्त्वा युद्धे अवस्थिताः ।
येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **के** प्राणान् धनानि च त्यक्त्वा युद्धे अवस्थिताः ?	येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते **इमे** प्राणान् धनानि च त्यक्त्वा युद्धे अवस्थिताः ।
येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते इमे **के के** प्राणान् धनानि च त्यक्त्वा युद्धे अवस्थिताः ?	येषाम् अर्थे राज्यं भोगाः सुखानि च नः काङ्क्षितं ते इमे **आचार्याः पितरः पुत्राः तथा एव पितामहाः मातुलाः श्वशुराः पौत्राः श्यालाः तथा सम्बन्धिनः** प्राणान् धनानि च त्यक्त्वा युद्धे अवस्थिताः ।

तात्पर्यम् - येषां कृते राज्यं भोगाः सुखानि वा अपेक्षितानि आसन् ते एव बान्धवाः अधुना स्वप्राणान् धनानि च त्यक्तुं तत्पराः (उद्युक्ताः) सन्तः युद्धे उपस्थिताः सन्ति । उपस्थिताश्च एते मम आचार्याः, पितरः, पुत्राः, पितामहाः, मातुलाः, श्वशुराः, पौत्राः, श्यालाः बान्धवाश्च सन्ति ।

एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥१.३५॥

पदच्छेदः - एतान्, न, हन्तुम्, इच्छामि, घ्नतः अपि, मधुसूदन ।
अपि, त्रैलोक्यराज्यस्य, हेतोः, किम्, नु, महीकृते ॥

अन्वयः - मधुसूदन ! त्रैलोक्यराज्यस्य हेतोः घ्नतः अपि एतान् हन्तुं न इच्छामि । किं नु महीकृते ?

पदार्थः - मधुसूदन = हे कृष्ण !, त्रैलोक्यराज्यस्य = त्रिलोकाधिपत्यस्य, हेतोः कारणात् अपि = अपि, घ्नतः अपि = हन्तॄन् अपि, एतान् = इमान्, हन्तुम् = मारयितुम्, न इच्छामि = नहि वाञ्छामि, किं नु = किं पुनः, महीकृते = भूमिप्राप्तये ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मधुसूदन	अ. पुं. सम्बो. एक.	त्रैलोक्यराज्यस्य	अ. नपुं. ष. एक.

हेतोः	उ. पुं. पं. एक.	घ्नतः	घ्नत्- त. पुं. द्वि. बहु.
अपि	अव्ययम्	एतान्	एतद्- द. सर्व. पुं. द्वि. बहु.
हन्तुम्	तुमुन्नन्तम् अव्ययम्	न	अव्ययम्
इच्छामि	इष् (इषु इच्छायाम्) पर. कर्तरि लट्. उपु. एक.	किम्	किम्- म. सर्व. नपुं. प्र. एक.
नु	अव्ययम्	महीकृते	महीकृत्- त. पुं. च. एक.

व्याकरणम् -

(क) सन्धिः	घ्नतोऽपि	घ्नतः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	किं नु	किम् + नु	अनुस्वारसन्धिः।
(ख) समासः	त्रैलोक्यराज्यस्य	त्रैलोक्यस्य राज्यं, त्रैलोक्यराज्यम्, तस्य - षष्ठीतत्पुरुषः।	
	महीकृते	मह्याः कृत् महीकृत्, तस्मै - चतुर्थीतत्पुरुषः। कृञ्-धातोः सर्वेषाम् अपि धातूनाम् अर्थः सम्भवति इति। अतः कृते इत्यस्य अत्र प्राप्तये इत्यर्थः।	
	त्रिलोकी	त्रयाणां लोकानां समाहारः त्रिलोकी - द्विगुसमासः।	
(ग) कृदन्तः	हन्तुम्	हन् (हन हिंसागत्योः) + तुमुन्	
	घ्नतः	हन् (हन हिंसागत्योः) + (लट्) शतृ (कर्तरि) तान्।	
(घ) तद्धितान्तः	त्रैलोक्यम्	त्रिलोकी + ष्यञ्, त्रयाणां लोकानां समाहारः।	
	राज्यस्य	राजन् + यक्, तस्य। राज्ञः भावः कर्म वा।	
विशेषः	मधुसूदनः	मधुं (तन्नामकं) दैत्यं सूदयति इति मधुसूदनः। मधु + सूद् (सूद क्षरणे) + णिच् (स्वार्थे) + ल्यु (अन)। सूदनं मधुदैत्यस्य यस्मात् स मधुसूदनः। (ब्रह्मवैवर्तपुराणे - ११०)	

भावस्पष्टीकरणम् -

न इच्छामि।	
किं कर्तुं न इच्छामि ?	**हन्तुं** न इच्छामि।
कान् हन्तुं न इच्छामि ?	**एतान्** हन्तुं न इच्छामि।
कीदृशान् अपि एतान् हन्तुं न इच्छामि ?	**घ्नतः अपि** एतान् हन्तुं न इच्छामि।

कस्य हेतोः अपि घ्नतः अपि एतान् हन्तुं न इच्छामि ?	**त्रैलोक्यराज्यस्य हेतोः अपि** घ्नतः अपि एतान् हन्तुं न इच्छामि।
त्रैलोक्यराज्यस्य हेतोः अपि घ्नतः अपि एतान् हन्तुं न इच्छामि। **एवं सति इच्छामि** ?	त्रैलोक्यराज्यस्य हेतोः अपि घ्नतः अपि एतान् हन्तुं न इच्छामि। **किं नु महीकृते** ?
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**मधुसूदन !**

तात्पर्यम् - हे कृष्ण ! यदि ते (दुर्योधनादयः) मां मारयन्ति मारयन्तु कामम्। तैः मार्यमाणोऽपि अहं तान् न मारयितुम् इच्छामि। एतेन त्रैलोक्यराज्यम् अपि सिद्ध्यतु नाम, तथापि अहं तान् मारयितुं न इच्छामि। एवं स्थिते केवलायाः अस्याः भूमेः प्राप्तये किमहं तान् बान्धवान् मारयामि ? कथमपि अहं तान् न मारयामि।

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन।
पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः ॥१.३६॥

पदच्छेदः - निहत्य, धार्तराष्ट्रान्, नः, का, प्रीतिः, स्यात्, जनार्दन।
पापम्, एव, आश्रयेत्, अस्मान्, हत्वा, एतान्, आततायिनः ॥

अन्वयः - जनार्दन ! धार्तराष्ट्रान् निहत्य (स्थितानाम्) नः का प्रीतिः स्यात्? (प्रत्युत) आततायिनः एतान् हत्वा (स्थितान्) अस्मान् पापम् एव आश्रयेत्।

पदार्थः - जनार्दन = हे कृष्ण !, धार्तराष्ट्रान् = धृतराष्ट्रस्य पुत्रान्, निहत्य = हत्वा, नः = अस्माकम्, का = कीदृशी, प्रीतिः = आनन्दः, स्यात् = भवेत्, आततायिनः = अत्याचारिणः (हन्तुम् उद्यतान्), एतान् = इमान्, हत्वा = मारयित्वा, अस्मान् = अस्मान्, पापम् = किल्बिषम्, एव = एव, आश्रयेत् = प्राप्नुयात्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जनार्दन	अ. पुं. सम्बो. एक.	धार्तराष्ट्रान्	अ. पुं. द्वि. बहु.
निहत्य	ल्यबन्तम् अव्ययम्	नः	अस्मद्- द. सर्व. ष. बहु.
का	किम्- म. सर्व. स्त्री. प्र. एक. (विशेषणम्)	प्रीतिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
स्यात्	अस् (अस - भुवि) पर. कर्तरि विधिलिङ्. प्रपु. एक.	आततायिनः	आततायिन् - न. पुं. द्वि. बहु.
एतान्	एतद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)	हत्वा	क्त्वान्तम् अव्ययम्
अस्मान्	अस्मद्- द. सर्व. द्वि. बहु.	पापम्	अ. नपुं. प्र. एक.

एव	अव्ययम्	आश्रयेत्	आ + श्रि (श्रिञ् सेवायाम्) पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः स्याज्जनार्दन — स्यात् + जनार्दन — जश्त्वसन्धिः, श्चुत्वसन्धिः ।

एवाश्रयेत् — एव + आश्रयेत् — सवर्णदीर्घसन्धिः ।

आश्रयेदस्मान् — आश्रयेत् + अस्मान् — जश्त्वसन्धिः ।

हत्वैतान् — हत्वा + एतान् — वृद्धिसन्धिः ।

(ख) कृदन्तः निहत्य — नि + हन् (हन हिंसागत्योः) + ल्यप् ।

प्रीतिः — प्री (प्रीञ् तर्पणे कान्तौ च) + क्तिन् ।

जनार्दन — जन् + अर्द (अर्द गतौ याचने च) + ल्यु (कर्तरि) तत्सम्बुद्धौ, जनान् अर्दयति इति । जनाः यथा पुरुषार्थान् याचन्ते तथा करोति इत्यर्थः ।

हत्वा — हन् (हन हिंसागत्योः) + क्त्वा ।

(ग) तद्धितान्तः धार्तराष्टान् — धृतराष्ट्र + अण् (अपत्यार्थे), तान् । धृतराष्ट्रस्य अपत्यानि पुमांसः ।

भावस्पष्टीकरणम् -

स्यात् ।	
का स्यात् ?	**प्रीतिः** स्यात् ।
केषां प्रीतिः स्यात् ?	**नः** प्रीतिः स्यात् ।
किं कृत्वा (स्थितानाम्) नः प्रीतिः स्यात् ?	**निहत्य** स्थितानां नः प्रीतिः स्यात् ।
कान् निहत्य स्थितानां नः प्रीतिः स्यात् ?	**धार्तराष्ट्रान्** निहत्य स्थितानां नः प्रीतिः स्यात् ।
धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः **का** स्यात् ? **प्रत्युत किं स्यात्** ?	धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः **न** स्यात् । (प्रत्युत) **आश्रयेत् ।**
धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात् । प्रत्युत **किम्** आश्रयेत् ?	धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात् । प्रत्युत **पापम् एव** आश्रयेत् ।
धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात् । प्रत्युत **कान्** पापम् एव आश्रयेत् ?	धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात् । प्रत्युत **अस्मान्** पापम् एव आश्रयेत् ।
धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात् । प्रत्युत **किं कृत्वा** (स्थितान्) अस्मान् पापम् एव आश्रयेत् ?	धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात् । प्रत्युत **हत्वा** (स्थितान्) अस्मान् पापम् एव आश्रयेत् ।

धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात्। प्रत्युत **कान्** हत्वा स्थितान् अस्मान् पापम् एव आश्रयेत्?	धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात्। प्रत्युत **एतान्** हत्वा स्थितान् अस्मान् पापम् एव आश्रयेत्।
धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात्। प्रत्युत **कीदृशान्** एतान् हत्वा स्थितान् अस्मान् पापम् एव आश्रयेत्?	धार्तराष्ट्रान् निहत्य स्थितानां नः प्रीतिः न स्यात्। प्रत्युत **आततायिनः** एतान् हत्वा स्थितान् अस्मान् पापम् एव आश्रयेत्।
अस्मिन् श्लोके सम्बोधनपदं किम्?	**जनार्दन!**

तात्पर्यम् - हे जनार्दन! एतेषां कौरवाणां मारणेन अस्माभिः का वा तृप्तिः प्राप्येत? प्रत्युत कृतपातकानाम् एतेषां मारणेन पापमेव अस्मान् स्पृशेत्। अर्थात् एतान् आततायिनः हत्वा अस्मान् पापम् एव आश्रयेत्।

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान्।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव॥१.३७॥

पदच्छेदः - तस्मात्, न, अर्हाः, वयम्, हन्तुं, धार्तराष्ट्रान्, स्वबान्धवान्।
स्वजनम्, हि, कथम्, हत्वा, सुखिनः, स्याम, माधव॥

अन्वयः - माधव! तस्मात् वयं स्वबान्धवान् धार्तराष्ट्रान् हन्तुं न अर्हाः। स्वजनं हि हत्वा कथं सुखिनः स्याम?

पदार्थः - माधव = हे रमापते!, तस्मात् = तस्मात् कारणात्, वयम् = वयम्, स्वबान्धवान् = निजबान्धवान्, धार्तराष्ट्रान् = कौरवान्, हन्तुम् = मारयितुम्, विनाशयितुम्, न = नहि, अर्हाः = योग्याः, हि = यस्मात्, स्वजनम् = निजजनम्, हत्वा = विनाश्य, कथम् = केन प्रकारेण, सुखिनः = सन्तुष्टाः, स्याम = भवेम।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
माधव	अ. पुं. सम्बो. एक.	तस्मात्	तद्- द. सर्व. नपुं. पं. एक. (विशेषणम्)
वयम्	अस्मद्- द. सर्व. प्र. बहु.	स्वबान्धवान्	अ. पुं. द्वि. बहु. (विशेषणम्)
धार्तराष्ट्रान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	हन्तुम्	तुमुन्नन्तम् अव्ययम्
न	अव्ययम्	अर्हाः	अ. पुं. प्र. बहु.
स्वजनम्	अ. पुं. द्वि. एक.	हि	अव्ययम्
हत्वा	क्त्वान्तम् अव्ययम्	कथम्	अव्ययम्
सुखिनः	सुखिन्- न. पुं. प्र. बहु.	स्याम	अस् (अस भुवि) पर. कर्तरि विधिलिङ्. उपु. बहु.

व्याकरणम् -

(क) सन्धिः	तस्मान्न	तस्मात् + न	अनुनासिकसन्धिः ।
	नार्हाः	न + अर्हाः	सवर्णदीर्घसन्धिः ।
	अर्हा वयम्	अर्हाः + वयम्	विसर्गसन्धिः (लोपः) ।
	वयं हन्तुम्	वयम् + हन्तुम्	अनुस्वारसन्धिः ।
	हन्तुं धार्तराष्ट्रान्	हन्तुम् + धार्तराष्ट्रान्	अनुस्वारसन्धिः ।
	स्वजनं हि	स्वजनम् + हि	अनुस्वारसन्धिः ।
	कथं हत्वा	कथम् + हत्वा	अनुस्वारसन्धिः ।

(ख) समासः	स्वबान्धवान्	स्वस्य बान्धवाः स्वबान्धवाः, तान् - षष्ठीतत्पुरुषः ।
	स्वजनम्	स्वस्य जनः स्वजनः, तम् - षष्ठीतत्पुरुषः ।
	माधव	मायाः (लक्ष्म्याः) धवः माधवः, तत्सम्बुद्धौ - षष्ठीतत्पुरुषः ।
(ग) कृदन्तः	अर्हाः	अर्ह् (अर्ह पूजायाम्) + अच् ।
	हन्तुम्	हन् (हन हिंसागत्योः) + तुमुन् ।
	बान्धवः	बन्धु + अण् (स्वार्थे) ।
	हत्वा	हन् (हन हिंसागत्योः) + क्त्वा ।
(घ) तद्धितान्तः	धार्तराष्ट्रान्	धृतराष्ट्र + अण् (अपत्यार्थे), तान् । धृतराष्ट्रस्य अपत्यानि पुमांसः ।
	सुखिनः	सुख + इनि (मतुबर्थे) । सुखम् एषाम् एषु वा अस्ति इति सुखिनः।

भावस्पष्टीकरणम् -

न अर्हाः ।	
के न अर्हाः ?	**वयं** न अर्हाः ।
कस्मात् वयं न अर्हाः ?	**तस्मात्** वयं न अर्हाः ।
तस्मात् वयं **किं कर्तुं** न अर्हाः ?	तस्मात् वयं **हन्तुं** न अर्हाः ।
तस्मात् वयं **कान्** हन्तुं न अर्हाः ?	तस्मात् वयं **धार्तराष्ट्रान्** हन्तुं न अर्हाः ।
तस्मात् वयं **कीदृशान्** धार्तराष्ट्रान् हन्तुं न अर्हाः ?	तस्मात् वयं **स्वबान्धवान्** धार्तराष्ट्रान् हन्तुं न अर्हाः ।
स्याम ।	
कीदृशाः स्याम ?	**सुखिनः** स्याम ।
किं कृत्वा सुखिनः स्याम ?	**हत्वा** सुखिनः स्याम ।
कं हत्वा सुखिनः स्याम ?	**स्वजनं** हत्वा सुखिनः स्याम ।

स्वजनं हि हत्वा **कथं** सुखिनः स्याम ?	
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**माधव !**

तात्पर्यम् - अतः एव हे माधव ! स्वबान्धवान् धार्तराष्ट्रान् (एतान् कौरवान्) हन्तुं वयं न योग्याः । अस्माभिः स्वबान्धवाः कौरवाः न हन्तव्याः । स्वजनं हत्वा वयं कथं वा सुखिनः भवेम ? अर्थात् कथमपि वयं सुखं न प्राप्स्यामः ।

यद्यप्येते न पश्यन्ति लोभोपहतचेतसः ।
कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥१.३८॥
कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥१.३९॥

पदच्छेदः - यद्यपि, एते, न, पश्यन्ति, लोभोपहतचेतसः ।
कुलक्षयकृतम्, दोषम्, मित्रद्रोहे, च, पातकम् ॥
कथम्, न, ज्ञेयम्, अस्माभिः, पापात्, अस्मात्, निवर्तितुम् ।
कुलक्षयकृतम्, दोषम्, प्रपश्यद्भिः, जनार्दन ॥

अन्वयः - जनार्दन ! यद्यपि लोभोपहतचेतसः एते कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति (तथापि) कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः अस्मात् पापात् निवर्तितुं कथं न ज्ञेयम् ?

पदार्थः - जनार्दन = हे कृष्ण !, यद्यपि = यद्यपि, लोभोपहतचेतसः = लोभाभिभ्रष्टचित्ताः, एते = इमे धार्तराष्ट्राः, कुलक्षयकृतम् = वंशनाशजन्यम्, दोषम् = अनर्थम्, मित्रद्रोहे = वयस्यमारणे, पातकं च = पापं च, न पश्यन्ति = नहि वीक्षन्ते, कुलक्षयकृतम् = वंशनाशजन्यम्, दोषम् = अनर्थम्, प्रपश्यद्भिः = अवलोकयद्भिः, अस्माभिः = अस्माभिः, अस्मात् = एतस्मात्, पापात् = दोषात्, किल्बिषात्, निवर्तितुम् = निवारयितुम्, कथम् = केन प्रकारेण, न ज्ञेयम् = न अवगन्तव्यम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जनार्दन	अ. पुं. सम्बो. एक.	यदि	अव्ययम्
अपि	अव्ययम्	एते	एतद्- द. सर्व. पुं. प्र. बहु.
लोभोपहतचेतसः	लोभोपहतचेतस्- सका. पुं. प्र. बहु.	कुलक्षयकृतम्	अ. पुं. द्वि. एक. (विशेषणम्)

दोषम्	अ. पुं. द्वि. एक. (विशेष्यम्)	मित्रद्रोहे	अ. पुं. स. एक.
पातकम्	अ. नपुं. द्वि. एक.	च	अव्ययम्
न	अव्ययम्	पश्यन्ति	पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. बहु.
कुलक्षयकृतम्	अ. पुं. द्वि. एक. (विशेषणम्)	दोषम्	अ. पुं. द्वि. एक. (विशेष्यम्)
प्रपश्यद्भिः	प्रपश्यत्- त. पुं. तृ. बहु. (विशेषणम्)	अस्माभिः	अस्मद्- द. सर्व. तृ. बहु. (विशेष्यम्)
अस्मात्	इदम्- म. सर्व. नपुं. पं. एक. (विशेषणम्)	पापात्	अ. नपुं. पं. एक. (विशेष्यम्)
निवर्तितुम्	तुमुन्नन्तम् अव्ययम्	कथम्	अव्ययम्
न	अव्ययम्	ज्ञेयम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः

यद्यप्येते	यद्यपि + एते	यण्सन्धिः ।
कुलक्षयकृतं दोषम्	कुलक्षयकृतम् + दोषम्	अनुस्वारसन्धिः ।
दोषं मित्रद्रोहे	दोषम् + मित्रद्रोहे	अनुस्वारसन्धिः ।
कथं न	कथम् + न	अनुस्वारसन्धिः ।
पापादस्मात्	पापात् + अस्मात्	जश्त्वसन्धिः ।
अस्मान्निवर्तितुम्	अस्मात् + निवर्तितुम्	अनुनासिकसन्धिः ।
दोषं प्रपश्यद्भिः	दोषम् + प्रपश्यद्भिः	अनुस्वारसन्धिः ।
प्रपश्यद्भिर्जनार्दन	प्रपश्यद्भिः + जनार्दन	विसर्गसन्धिः (रेफः) ।

(ख) समासः

लोभोपहतचेतसः — लोभेन उपहतं, लोभोपहतम् - तृतीयातत्पुरुषः।
लोभोपहतं चेतः येषां ते लोभोपहतचेतसः - बहुव्रीहिः ।

कुलक्षयकृतम् — कुलानां क्षयः कुलक्षयः - षष्ठीतत्पुरुषः ।
कुलक्षयेण कृतः कुलक्षयकृतः, तम् - तृतीयातत्पुरुषः ।

मित्रद्रोहे — मित्रस्य द्रोहः मित्रद्रोहः, तस्मिन् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः

लोभः	लुभ् (लुभ विमोहने) + घञ् ।
उपहतः	उप + हन् (हन हिंसागत्योः) + क्त (कर्मणि) ।
क्षयः	क्षि (क्षि क्षये) + अच् ।
कृतम्	कृ (डुकृञ् करणे) + क्त (कर्मणि) ।

दोषम्	दुष् (दुष वैकृत्ये) + घञ् ।
द्रोहः	द्रुह् (द्रुह जिघांसायाम्) + घञ् ।
पातकम्	पत् (पत्लृ गतौ) + ण्वुल् ।
ज्ञेयम्	ज्ञा (ज्ञा अवबोधने) + यत् (कर्मणि) ।
निवर्तितुम्	नि + वृत् (वृतु वर्तने) + तुमुन् ।
प्रपश्यद्भिः	प्र + पश्य (दृशिर् प्रेक्षणे) + शतृ (कर्तरि), तैः ।
जनार्दन	जन + अर्द् (अर्द गतौ याचने च) + ल्यु (कर्तरि) तत्सम्बुद्धौ, जनान् अर्दयति इति । जनाः यथा पुरुषार्थान् याचन्ते तथा करोति इत्यर्थः ।

भावस्पष्टीकरणम् -

न पश्यन्ति ।	
के न पश्यन्ति ?	**एते** न पश्यन्ति ।
एते **कीदृशाः** न पश्यन्ति ?	एते **लोभोपहतचेतसः** न पश्यन्ति ।
एते लोभोपहतचेतसः **कं** न पश्यन्ति ?	एते लोभोपहतचेतसः **दोषं** न पश्यन्ति ।
एते लोभोपहतचेतसः **कीदृशं** दोषं न पश्यन्ति ?	एते लोभोपहतचेतसः **कुलक्षयकृतं** दोषं न पश्यन्ति ।
एते लोभोपहतचेतसः कुलक्षयकृतं दोषं **पुनश्च किं** न पश्यन्ति ?	एते लोभोपहतचेतसः कुलक्षयकृतं दोषं **पातकं च** न पश्यन्ति ।
एते लोभोपहतचेतसः कुलक्षयकृतं दोषं **कस्मिन्** पातकं च न पश्यन्ति ?	एते लोभोपहतचेतसः कुलक्षयकृतं दोषं **मित्रद्रोहे** पातकं च न पश्यन्ति ।
यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति **(तथापि) कथं न ज्ञेयम्** ?	
यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति (तथापि) **कैः** कथं न ज्ञेयम् ?	यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि **अस्माभिः** कथं न ज्ञेयम् ?
यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि **किं कुर्वद्भिः** अस्माभिः कथं न ज्ञेयम् ?	यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि **प्रपश्यद्भिः** अस्माभिः कथं न ज्ञेयम् ?
यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि **कं** प्रपश्यद्भिः अस्माभिः कथं न ज्ञेयम् ?	यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि **दोषं** प्रपश्यद्भिः अस्माभिः कथं न ज्ञेयम् ?

यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि **कीदृशं** दोषं प्रपश्यद्भिः अस्माभिः कथं न ज्ञेयम् ?	यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि **कुलक्षयकृतं** दोषं प्रपश्यद्भिः अस्माभिः कथं न ज्ञेयम् ?
यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः **किं कर्तुं** कथं न ज्ञेयम् ?	यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः **निवर्तितुं** कथं न ज्ञेयम् ?
यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः **कस्मात्** निवर्तितुं कथं न ज्ञेयम् ?	यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः **पापात्** निवर्तितुं कथं न ज्ञेयम् ?
यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः **कस्मात्** पापात् निवर्तितुं कथं न ज्ञेयम् ?	यद्यपि एते लोभोपहतचेतसः कुलक्षयकृतं दोषं मित्रद्रोहे पातकं च न पश्यन्ति तथापि कुलक्षयकृतं दोषं प्रपश्यद्भिः अस्माभिः **अस्मात्** पापात् निवर्तितुं कथं न ज्ञेयम् ?
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**जनार्दन !**

तात्पर्यम् - हे जनार्दन ! यद्यपि एते लोभाभिभ्रष्टचित्ताः कौरवाः युद्धात् जायमानं कुपरिणामं वंशविनाशं मित्रद्रोहं च अनर्थं न जानन्ति तथापि तत्सर्वं जानन्तः वयं किमर्थम् अस्मात् युद्धरूपात् पापकार्यात् विमुखाः न भवेम ? वैमुख्ये सत्येव अस्य अनर्थस्य निवारणं शक्यमिति तदेव युक्तम् इति मे मतिः ।

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नमधर्मोऽभिभवत्युत ॥१.४० ॥

पदच्छेदः - कुलक्षये, प्रणश्यन्ति, कुलधर्माः, सनातनाः ।
धर्मे, नष्टे, कुलम्, कृत्स्नम्, अधर्मः, अभिभवति, उत ॥

अन्वयः - कुलक्षये सनातनाः कुलधर्माः प्रणश्यन्ति । धर्मे नष्टे कृत्स्नम् उत कुलम् अधर्मः अभिभवति ।

पदार्थः - कुलक्षये = कुलनाशे, सनातनाः = वैदिकाः, प्राचीनाः, कुलधर्माः = वंशधर्माः, प्रणश्यन्ति = विनश्यन्ति, धर्मे = सनातनधर्मे, नष्टे = क्षीणे जाते, कृत्स्नम् उत = सर्वम् अपि, कुलम् = वंशम्, अधर्मः = अनाचारः, अभिभवति = प्रसरति, आक्राम्यति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कुलक्षये	अ. पुं. स. एक.	सनातनाः	अ. पुं. प्र. बहु. (विशेषणम्)
कुलधर्माः	अ. पुं. प्र. बहु. (विशेष्यम्)	प्रणश्यन्ति	प्र + नश् (णश अदर्शने) पर. कर्तरि लट्. प्रपु. बहु.
धर्मे	अ. पुं. स. एक. (विशेष्यम्)	नष्टे	अ. पुं. स. एक. (विशेषणम्)
कृत्स्नम्	अ. नपुं. द्वि. एक.	उत	अव्ययम्
कुलम्	अ. नपुं. द्वि. एक.	अधर्मः	अ. पुं. प्र. एक.
अभिभवति	अभि + भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	कुलं कृत्स्नम्	कुलम् + कृत्स्नम्	अनुस्वारसन्धिः ।
	अधर्मोऽभिभवति	अधर्मः + अभिभवति	विसर्गसन्धिः (सकारः) रेफः, उकारः गुणः पूर्वरूपं च ।
	अभिभवत्युत	अभिभवति + उत	यणसन्धिः ।
(ख) समासः	कुलक्षये	कुलस्य क्षयः कुलक्षयः तस्मिन् - षष्ठीतत्पुरुषः ।	
	कुलधर्माः	कुलस्य धर्माः कुलधर्माः - षष्ठीतत्पुरुषः ।	
	अधर्मः	न धर्मः अधर्मः नञ्तत्पुरुषः ।	
(ग) कृदन्तः	क्षयः	क्षि (क्षि क्षये) + अच् ।	
	नष्टः	नश् (णश - अदर्शने) + क्त (कर्तरि) ।	
(घ) तद्धितान्तः	सनातनाः	सदा + ट्युल् (भव इत्यर्थे) सदा भवाः इत्यर्थः ।	

भावस्पष्टीकरणम् -

प्रणश्यन्ति ।	
के प्रणश्यन्ति ?	**कुलधर्माः** प्रणश्यन्ति ।
कीदृशाः कुलधर्माः प्रणश्यन्ति ?	**सनातनाः** कुलधर्माः प्रणश्यन्ति ।
कस्मिन् (सति) सनातनाः कुलधर्माः प्रणश्यन्ति ?	**कुलक्षये** (सति) सनातनाः कुलधर्माः प्रणश्यन्ति ।
तेन किम् ?	**अभिभवति ।**

कः अभिभवति ?	**अधर्मः** अभिभवति ।
किम् अधर्मः अभिभवति ?	**कुलम्** अधर्मः अभिभवति ।
कीदृशं च कुलम् अधर्मः अभिभवति ?	**कृत्स्नम् उत** कुलम् अधर्मः अभिभवति ।
कदा कृत्स्नम् उत कुलम् अधर्मः अभिभवति ?	**नष्टे** (सति) कृत्स्नम् उत कुलम् अधर्मः अभिभवति ।
कस्मिन् नष्टे (सति) कृत्स्नम् उत कुलम् अधर्मः अभिभवति ?	**धर्मे** नष्टे सति कृत्स्नम् उत कुलम् अधर्मः अभिभवति ।

तात्पर्यम् - कुलानि यदि नाशं प्राप्नुवन्ति तर्हि सनातनाः कुलधर्माः (वैदिककुलधर्माः) विनश्यन्ति । यदि धर्मः नष्टः भवति तर्हि अधर्मः कुलम् आवृणोति ।

अधर्माभिभवात् कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ॥१.४१॥

पदच्छेदः - अधर्माभिभवात्, कृष्ण, प्रदुष्यन्ति, कुलस्त्रियः ।
स्त्रीषु, दुष्टासु, वार्ष्णेय, जायते, वर्णसङ्करः ।

अन्वयः - कृष्ण ! अधर्माभिभवात् कुलस्त्रियः प्रदुष्यन्ति । वार्ष्णेय ! स्त्रीषु दुष्टासु वर्णसङ्करः जायते ।

पदार्थः - कृष्ण = हे गोविन्द !, अधर्माभिभवात् = अधर्माक्रान्तात्, अधर्माक्रमणात्, कुलस्त्रियः = कुलाङ्गनाः, प्रदुष्यन्ति = व्यभिचारिण्यः भवन्ति, वार्ष्णेय = हे कृष्ण !, स्त्रीषु = नारीषु, दुष्टासु = व्यभिचरितासु, वर्णसङ्करः = वर्णमिश्रणम्, जायते = भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कृष्ण	अ. पुं. सम्बो. एक.	अधर्माभिभवात्	अ. पुं. पं. एक.
कुलस्त्रियः	ई. स्त्री. प्र. बहु.	प्रदुष्यन्ति	प्र + दुष् (दुष वैकृत्ये) पर. कर्तरि लट्. प्रपु. बहु.
वार्ष्णेय	अ. पुं. सम्बो. एक.	स्त्रीषु	ई. स्त्री. स. बहु. (विशेष्यम्)
दुष्टासु	आ. स्त्री. स. बहु. (विशेषणम्)	वर्णसङ्करः	अ. पुं. प्र. एक.
जायते	जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) समासः	अधर्माभिभवात्	अधर्मस्य अभिभवः अधर्माभिभवः, तस्मात् - षष्ठीतत्पुरुषः ।
	कुलस्त्रियः	कुलस्य स्त्रियः कुलस्त्रियः - षष्ठीतत्पुरुषः ।
	वर्णसङ्करः	वर्णानां सङ्करः वर्णसङ्करः - षष्ठीतत्पुरुषः ।
	अधर्मः	न धर्मः अधर्मः - नञ्तत्पुरुषः ।
(ख) कृदन्तः	अभिभवात्	अभि + भू (भू सत्तायाम्) + अच् । (भावे) ।
	दुष्टासु	दुष् (दुष वैकृत्ये) + क्त (स्त्रीत्वे टाप्), तासु ।
	सङ्करः	सम् + कॄ (कॄ - विक्षेपे) + अप् ।
(ग) तद्धितान्तः	वार्ष्णेय	वृष्णि + ढक् (अपत्यार्थे) (एयादेशः), तत्सम्बुद्धौ वृष्णेः गोत्रापत्यं पुमान् ।

भावस्पष्टीकरणम् -

प्रदुष्यन्ति ।	
काः प्रदुष्यन्ति ?	**कुलस्त्रियः** प्रदुष्यन्ति ।
कस्मात् कुलस्त्रियः प्रदुष्यन्ति ?	**अधर्माभिभवात्** कुलस्त्रियः प्रदुष्यन्ति ।
तेन किम् ?	तेन **जायते ।**
तेन **कः** जायते ?	तेन **वर्णसङ्करः** जायते ।
तेन **कदा** वर्णसङ्करः जायते ?	तेन **दुष्टासु (सतीषु)** वर्णसङ्करः जायते ।
तेन **कासु** दुष्टासु (सतीषु) वर्णसङ्करः जायते ?	तेन **स्त्रीषु** दुष्टासु (सतीषु) वर्णसङ्करः जायते ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**वार्ष्णेय, कृष्ण !**

तात्पर्यम् - अधर्मः यदि कुलानि आवृणोति तर्हि कुलस्त्रियः प्रदुष्यन्ति । ताः कुलस्त्रियः यदा प्रदुष्यन्ति, सत्पथभ्रष्टाः भविष्यन्ति तदा वर्णसङ्करः उत्पन्नः भवति । अनेन देवपितृमार्गः भ्रष्टः भवति ।

सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥१.४२॥

पदच्छेदः - सङ्करः, नरकाय, एव, कुलघ्नानाम्, कुलस्य, च ।
पतन्ति, पितरः, हि, एषाम्, लुप्तपिण्डोदकक्रियाः ॥

अन्वयः - सङ्करः कुलघ्नानां कुलस्य च नरकाय एव (भवति) । लुप्तपिण्डोदकक्रियाः एषां पितरः हि पतन्ति ।

पदार्थः - सङ्करः = मिश्रणम्, कुलघ्नानाम् = वंशविनाशकानाम्, कुलस्य = वंशस्य, च = तथा, नरकाय एव = नरकलोकाय एव, लुप्तपिण्डोदकक्रियाः = नष्टपिण्डजलतर्पणादिक्रियाः एषाम् = एतेषाम्, पितरः = पितृदेवताः, हि = निश्चयेन, पतन्ति = अधोगतिं प्राप्नुवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सङ्करः	अ. पुं. प्र. एक.	कुलघ्नानाम्	अ. पुं. ष. बहु.
कुलस्य	अ. नपुं. ष. एक.	च	अव्ययम्
नरकाय	अ. पुं. च. एक.	एव	अव्ययम्
हि	अव्ययम्	एषाम्	इदम्- म. सर्व. पुं. ष. बहु. (विशेषणम्)
पितरः	पितृ - ऋ. पुं. प्र. बहु.	लुप्तपिण्डोदकक्रियाः	अ. पुं. प्र. बहु.
पतन्ति	पत् (पत्लृ गतौ) पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः

सङ्करः	सम् + करः	अनुस्वारसन्धिः ।
सङ्करो नरकाय	सङ्करः + नरकाय	विसर्गसन्धिः(सकारः) रेफः, उकारः, गुणः ।
नरकायैव	नरकाय + एव	वृद्धिसन्धिः ।
कुलघ्नानां कुलस्य	कुलघ्नानाम् + कुलस्य	अनुस्वारसन्धिः ।
पितरो हि	पितरः + हि	विसर्गसन्धिः(सकारः) रेफः, उकारः, गुणः ।
ह्येषाम्	हि + एषाम्	यण्सन्धिः ।
एषां लुप्तपिण्डोदकक्रियाः	एषाम् + लुप्तपिण्डोदकक्रियाः	अनुस्वारसन्धिः ।

(ख) समासः

लुप्तपिण्डोदकक्रियाः — पिण्डं च उदकक्रियाः च - पिण्डोदकक्रिये - द्वन्द्वः ।
लुप्ते पिण्डोदकक्रिये येषां ते लुप्तपिण्डोदकक्रियाः - बहुव्रीहिः ।

(ग) कृदन्तः

सङ्करः	सम् + कृ (कृ विक्षेपे) + अप् ।
नरकाय	नृ (नृ - नये) + वुन् (अक), तस्मै ।
कुलघ्नानाम्	कुल + हन् (हन हिंसागत्योः) + क्विप् (कर्तरि) । कुलं हन्ति इति कुलघ्नः ।
पितरः	पा (पा रक्षणे) + तृच् ।
लुप्तः	लुप् (लुप विमोहने) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

भवति। (अध्याहृतम्)	
कः भवति ?	**सङ्करः** भवति।
सङ्करः **कस्मै एव** भवति ?	सङ्करः **नरकाय एव** भवति।
सङ्करः **केषां** नरकाय एव भवति ?	सङ्करः **कुलघ्नानां** नरकाय एव भवति।
सङ्करः कुलघ्नानां **पुनश्च कस्य** नरकाय एव भवति ?	सङ्करः कुलघ्नानां **कुलस्य** च नरकाय एव भवति।
तेन किम् ?	**पतन्ति।**
के पतन्ति ?	**पितरः** पतन्ति।
पितरः **कीदृशाः** पतन्ति ?	पितरः **लुप्तपिण्डोदकक्रियाः** पतन्ति ?
केषां पितरः लुप्तपिण्डोदकक्रियाः पतन्ति ?	**एषां** पितरः लुप्तपिण्डोदकक्रियाः पतन्ति।

तात्पर्यम् - वर्णसङ्करः नरकस्य कारणं भवति। तेन कुलघातकाः कुलानि च नरकं गच्छन्ति। तेषां पितरः श्राद्धतर्पणादिवर्जिताः भवन्ति। ततश्च ते पितरः नरके पतन्ति।

दोषैरेतैः कुलघ्नानां वर्णसङ्करकारकैः।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः ॥१.४३॥

पदच्छेदः - दोषैः, एतैः, कुलघ्नानाम्, वर्णसङ्करकारकैः।
उत्साद्यन्ते, जातिधर्माः, कुलधर्माः, च शाश्वताः ॥

अन्वयः - एतैः वर्णसङ्करकारकैः दोषैः कुलघ्नानां शाश्वताः कुलधर्माः च जातिधर्माः उत्साद्यन्ते।

पदार्थः - एतैः = एभिः, वर्णसङ्करकारकैः = वर्णसाङ्कर्यहेतुभिः, दोषैः = पापैः, कुलघ्नानाम् = वंशघातकानाम्, शाश्वताः = सनातनाः, कुलधर्माः = वंशधर्माः, जातिधर्माः च = वर्णधर्माः च, उत्साद्यन्ते = विनाश्यन्ते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कुलघ्नानाम्	अ. पुं. ष. बहु.	वर्णसङ्करकारकैः	अ. पुं. तृ. बहु. (विशेषणम्)
एतैः	एतद्- द. सर्व. पुं. तृ. बहु. (विशेषणम्)	दोषैः	अ. पुं. तृ. बहु. (विशेष्यम्)
शाश्वताः	अ. पुं. प्र. बहु. (विशेषणम्)	जातिधर्माः	अ. पुं. प्र. बहु. (विशेष्यम्)

कुलधर्माः	अ. पुं. प्र. बहु. (विशेष्यम्)	च	अव्ययम्
उत्साद्यन्ते	उद् + सद् (षद्लृ - विशरणगत्यवसादनेषु) णिच्. कर्मणि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः दोषैरेतैः — दोषैः + एतैः — विसर्गसन्धिः (रेफः)।

कुलघ्नानां वर्णसङ्करकारकैः — कुलघ्नानाम् + वर्णसङ्करकारकैः अनुस्वारसन्धिः।

कुलधर्माश्च — कुलधर्माः + च — विसर्गसन्धिः (सकारः) श्चुत्वम्।

(ख) समासः वर्णसङ्करकारकैः — वर्णानां सङ्करः वर्णसङ्करः - षष्ठीतत्पुरुषः।
वर्णसङ्करस्य कारकाः वर्णसङ्करकारकाः, तैः - षष्ठीतत्पुरुषः।

जातिधर्माः — जातेः धर्माः जातिधर्माः - षष्ठीतत्पुरुषः।

कुलधर्माः — कुलस्य धर्माः कुलधर्माः - षष्ठीतत्पुरुषः।

(ग) कृदन्तः दोषैः — दुष् (दुष वैकृत्ये) + घञ्, तैः।

कुलघ्नानाम् — कुल + हन् (हन हिंसागत्योः) + टक्, तेषाम्। कुलं हन्ति।

सङ्करः — सम् + कृ (विक्षेपे) + अप्।

कारकैः — कृ (डुकृञ् करणे) + ण्वुल् (अक) (कर्तरि), तैः।

जातिः — जन् (जनी प्रादुर्भावे) + क्तिन् (भावे)।

(घ) तद्धितान्तः शाश्वतः — शश्वत् + अण् (भावार्थे)। सदा भवः इति।

भावस्पष्टीकरणम् -

उत्साद्यन्ते।	
के उत्साद्यन्ते ?	**जातिधर्माः** उत्साद्यन्ते।
जातिधर्माः **पुनश्च के** उत्साद्यन्ते ?	जातिधर्माः **कुलधर्माः च** उत्साद्यन्ते।
कीदृशाः जातिधर्माः कुलधर्माः च उत्साद्यन्ते ?	**शाश्वताः** जातिधर्माः कुलधर्माः च उत्साद्यन्ते।
कैः शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते ?	**दोषैः** शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते।
कीदृशैः दोषैः शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते ?	**वर्णसङ्करकारकैः** दोषैः शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते।
वर्णसङ्करकारकैः **कैः** दोषैः शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते ?	वर्णसङ्करकारकैः **एतैः** दोषैः शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते।

केषां वर्णसङ्करकारकैः एतैः दोषैः शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते ?	**कुलघ्नानां** वर्णसङ्करकारकैः एतैः दोषैः शाश्वताः जातिधर्माः कुलधर्माः च उत्साद्यन्ते ।

तात्पर्यम् - एतैः वर्णसङ्करकारकैः वर्णसाङ्कर्यहेतुभिः पापैः कुलघातिनां वंशविनाशकानां सनातनाः कुलधर्माः वर्णधर्माः च विनष्टाः भवन्ति । कौलिकाः सर्वाः अपि व्यवस्थाः विनाशं प्राप्नुवन्ति । वेदमार्गः दूषितः भवति ।

उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरकेऽनियतं वासो भवतीत्यनुशुश्रुम ॥१.४४॥

पदच्छेदः - उत्सन्नकुलधर्माणाम्, मनुष्याणाम्, जनार्दन ।
नरके, अनियतम्, वासः, भवति, इति, अनुशुश्रुम ॥

अन्वयः - जनार्दन ! 'उत्सन्नकुलधर्माणां मनुष्याणाम् अनियतं नरके वासः भवति' इति अनुशुश्रुम ।

पदार्थः - जनार्दन ! = हे कृष्ण, उत्सन्नकुलधर्माणाम् = विनष्टकौलिकधर्माचाराणाम्, मनुष्याणाम् = नराणाम्, अनियतम् = अनिश्चितकालपर्यन्तम्, दीर्घकालं यावत्, नरके = नरकलोके, वासः = स्थितिः, भवति इति = सम्पद्यते इति, अनुशुश्रुम = श्रुतवन्तः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जनार्दन	अ. पुं. सम्बो. एक.	उत्सन्नकुलधर्माणाम्	अ. पुं. ष. बहु. (विशेषणम्)
मनुष्याणाम्	अ. पुं. ष. बहु. (विशेष्यम्)	नरके	अ. पुं. स. एक.
अनियतम्	अ. पुं. द्वि. एक.	वासः	अ. पुं. प्र. एक.
भवति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.	इति	अव्ययम्
अनुशुश्रुम	अनु + श्रु (श्रु श्रवणे) पर. कर्तरि लिट्. उपु. बहु.		

व्याकरणम् -

(क) सन्धिः उत्सन्नकुलधर्माणां मनुष्याणाम्

उत्सन्नकुलधर्माणाम् + मनुष्याणाम्

			अनुस्वारसन्धिः ।
	मनुष्याणां जनार्दन	मनुष्याणाम् + जनार्दन	अनुस्वारसन्धिः ।
	नरकेऽनियतम्	नरके + अनियतम्	पूर्वरूपसन्धिः ।
	अनियतं वासः	अनियतम् + वासः	अनुस्वारसन्धिः ।
	वासो भवति	वासः + भवति	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	भवतीति	भवति +इति	सवर्णदीर्घसन्धिः ।
	इत्यनुशुश्रुम	इति + अनुशुश्रुम	यण्सन्धिः ।
(ख) समासः	उत्सन्नकुलधर्माणाम्	कुलस्य धर्मः कुलधर्मः- षष्ठीतत्पुरुषः । उत्सन्नः कुलधर्मः येषां ते उत्सन्नकुलधर्माः, तेषाम् - बहुव्रीहिः ।	
(ग) कृदन्तः	उत्सन्नः	उद् + सद् (षद्लृ - विशरणगत्यवसादनेषु) + क्त (कर्तरि) ।	
	जनार्दन	जन + अर्द (अर्द - गतौ याचने च) + ल्यु (कर्तरि) तत्सम्बुद्धौ, जनान् अर्दयति इति । जनाः यथा पुरुषार्थान् याचन्ते तथा करोति इत्यर्थः ।	
	नियतम्	नि + यम् (यम - उपरमे+ क्त (कर्तरि) ।	
	वासः	वस् (वस - निवासे) + घञ् (भावे) ।	
(घ) तद्धितान्तः	मनुष्याणाम्	मनु + षुक् (ष्) + यत्, तेषाम् । मनोः अपत्यानि पुमांसः इत्यर्थः ।	

भावस्पष्टीकरणम् -

अनुशुश्रुम ।	
किम् अनुशुश्रुम ?	**'भवति' इति** अनुशुश्रुम ।
'**कः** भवति' इति अनुशुश्रुम ?	'**वासः** भवति' इति अनुशुश्रुम ।
'**कुत्र** वासः भवति' इति अनुशुश्रुम ?	'**नरके** वासः भवति' इति अनुशुश्रुम ।
'नरके **कथं** वासः भवति' इति अनुशुश्रुम ?	'नरके **अनियतं** वासः भवति' इति अनुशुश्रुम ।
केषां 'नरके अनियतं वासः भवति' इति अनुशुश्रुम ?	**मनुष्याणां** 'नरके अनियतं वासः भवति' इति अनुशुश्रुम ।
कीदृशानां मनुष्याणां 'नरके अनियतं वासः भवति' इति अनुशुश्रुम ?	**उत्सन्नकुलधर्माणां** मनुष्याणां 'नरके अनियतं वासः भवति' इति अनुशुश्रुम ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**जनार्दन !**

तात्पर्यम् - हे जनार्दन ! येषां कुलधर्माः नष्टाः अभवन् तादृशानां नष्टकुलधर्माणाम् मनुष्याणाम् अनन्तकाल-पर्यन्तं नरके वासः भवति इति अस्माभिः श्रुतम् ।

अहो बत महत्पापं कर्तुं व्यवसिता वयम्।
यद्राज्यसुखलोभेन हन्तुं स्वजनमुद्यताः ॥१.४५॥

पदच्छेदः - अहो, बत, महत्, पापम्, कर्तुम्, व्यवसिताः, वयम्।
यत्, राज्यसुखलोभेन, हन्तुम्, स्वजनम्, उद्यताः ॥

अन्वयः - अहो बत ! वयं महत् पापं कर्तुं व्यवसिताः यत् राज्यसुखलोभेन स्वजनं हन्तुम् उद्यताः ।

पदार्थः - अहो बत = आश्चर्यम् (शोकप्रकटीकरणम्), वयम् = वयम्, महत् = अत्यन्तम्, पापम् = कुकृत्यम्, दोषम्, कर्तुम्=आचरितुम्, व्यवसिताः=प्रवृत्ताः, यत्=यस्मात् हेतोः, राज्यसुखलोभेन=राज्यसौख्यलोलुपत्वेन, स्वजनम् = कुटुम्बम्, आत्मीयम्, बान्धवम्, हन्तुम् = मारयितुम्, उद्यताः = प्रवृत्ताः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहो	अव्ययम्	बत	अव्ययम्
वयम्	अस्मद् - द. सर्व. प्र. बहु.	महत्	महत्- त. नपुं. द्वि. एक. (विशेषणम्)
पापम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	कर्तुम्	तुमुन्नन्तम् अव्ययम्
व्यवसिताः	अ. पुं. प्र. बहु.	यत्	अव्ययम्
राज्यसुखलोभेन	अ. पुं. तृ. एक.	स्वजनम्	अ. पुं. द्वि. एक.
हन्तुम्	तुमुन्नन्तम् अव्ययम्	उद्यताः	अ. पुं. प्र. बहु.

व्याकरणम् -

(क) सन्धिः	पापं कर्तुम्	पापम् + कर्तुम्	अनुस्वारसन्धिः ।
	कर्तुं व्यवसिताः	कर्तुम् + व्यवसिताः	अनुस्वारसन्धिः ।
	व्यवसिता वयम्	व्यवसिताः + वयम्	विसर्गसन्धिः (लोपः) ।
	यद्राज्यसुखलोभेन	यत् + राज्यसुखलोभेन	जश्त्वसन्धिः ।
	हन्तुं स्वजनम्	हन्तुम् + स्वजनम्	अनुस्वारसन्धिः ।

(ख) समासः	राज्यसुखलोभेन	राज्यस्य सुखं राज्यसुखं - षष्ठीतत्पुरुषः । राज्यसुखे लोभः राज्यसुखलोभः, तेन - सप्तमीतत्पुरुषः ।
	स्वजनम्	स्वस्य जनः स्वजनः, तम् - षष्ठीतत्पुरुषः ।
(ग) कृदन्तः	कर्तुम्	कृ (डुकृञ् करणे) + तुमुन् ।
	लोभेन	लुभ् (लुभ विमोहने) + घञ्, तेन ।
	हन्तुम्	हन् (हन हिंसागत्योः) + तुमुन् ।

	व्यवसिताः	वि + अव + सो (षो अन्तकर्मणि) + क्त (कर्तरि) ।
	उद्यतः	उद् + यम् (यम उपरमे) + क्त (कर्तरि) ।
(घ) तद्धितान्तः	राज्यम्	राजन् + यक्, राज्ञः भावः कर्म वा ।

भावस्पष्टीकरणम् -

व्यवसिताः ।	
के व्यवसिताः ?	**वयं** व्यवसिताः ।
वयं **किमर्थं** व्यवसिताः ?	वयं **कर्तुं** व्यवसिताः ।
वयं **किं** कर्तुं व्यवसिताः ?	वयं **पापं** कर्तुं व्यवसिताः ।
वयं **कीदृशं** पापं कर्तुं व्यवसिताः ?	वयं **अहो बत ! महत्** पापं कर्तुं व्यवसिताः ।
अहो बत ! वयं महत् पापं कर्तुं व्यवसिताः, **कस्मात्** ?	अहो बत ! वयं महत् पापं कर्तुं व्यवसिताः, यत् **उद्यताः** ।
अहो बत ! वयं महत् पापं कर्तुं व्यवसिताः, **तत् किं यत् कर्तुम्** उद्यताः?	अहो बत ! वयं महत् पापं कर्तुं व्यवसिताः, **यत् हन्तुम्** उद्यताः ।
अहो बत ! वयं महत् पापं कर्तुं व्यवसिताः, यत् **कं** हन्तुम् उद्यताः ?	अहो बत ! वयं महत् पापं कर्तुं व्यवसिताः, यत् **स्वजनं** हन्तुम् उद्यताः ।
अहो बत ! वयं महत् पापं कर्तुं व्यवसिताः, यत् स्वजनं **केन हेतुना** हन्तुम् उद्यताः ?	अहो बत ! वयं महत् पापं कर्तुं व्यवसिताः, यत् स्वजनं **राज्यसुखलोभेन** हन्तुम् उद्यताः ।

तात्पर्यम् - हा हन्त ! वयम् एतादृशं महत्पापं कर्तुम् उद्यताः स्मः यत् तुच्छराज्यसुखस्य लोभेन स्वबान्धवान् कुटुम्बान् मारयितुम् उद्यताः स्मः ।

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ॥१.४६॥

पदच्छेदः - यदि, माम्, अप्रतीकारम्, अशस्त्रम्, शस्त्रपाणयः ।
धार्तराष्ट्राः, रणे, हन्युः, तत्, मे, क्षेमतरम्, भवेत् ॥

अन्वयः - यदि अशस्त्रम् अप्रतीकारं मां शस्त्रपाणयः धार्तराष्ट्राः रणे हन्युः तत् मे क्षेमतरं भवेत् ।

पदार्थः - यदि = यदि, चेत् (पक्षान्तरे), अशस्त्रम् = आयुधरहितम्, अस्त्र-शस्त्र-रहितम्, अप्रतीकारम् = प्रतीकारशून्यम्, प्रतिरोधरहितम्, माम् = माम्, शस्त्रपाणयः = आयुधधारिणः, धार्तराष्ट्राः = धृतराष्ट्रपुत्राः,

दुर्योधनादयः, रणे = रणाङ्गणे, युद्धे, हन्युः = नाशयेयुः, तत् = तत्, मे = मम, मम कृते, क्षेमतरम् = कल्याणकरम्, भवेत् = स्यात् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदि	अव्ययम्	अशस्त्रम्	अ. पुं. द्वि. एक. (विशेषणम्)
अप्रतीकारम्	अ. पुं. द्वि. एक. (विशेषणम्)	माम्	अस्मद्- द. सर्व. द्वि. एक. (विशेष्यम्)
शस्त्रपाणयः	इ. पुं. प्र. बहु. (विशेषणम्)	धार्तराष्ट्राः	अ. पुं. प्र. बहु. (विशेष्यम्)
रणे	अ. पुं. स. एक.	हन्युः	हन् (हन हिंसागत्योः) पर. कर्तरि विधिलिङ्. प्रपु. बहु.
तत्	तद् - द. सर्व. नपुं. प्र. एक.	मे	अस्मद् - द. सर्व. ष. एक.
क्षेमतरम्	अ. नपुं. प्र. एक.	भवेत्	भू (भू - सत्तायाम्) पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः

अशस्त्रं शस्त्रपाणयः	अशस्त्रम् + शस्त्रपाणयः	अनुस्वारसन्धिः ।
धार्तराष्ट्रा रणे	धार्तराष्ट्राः + रणे	विसर्गसन्धिः लोपः ।
हन्युस्तत्	हन्युः + तत्	विसर्गसन्धिः (सकारः) ।
तन्मे	तत् + मे	अनुनासिकसन्धिः ।
क्षेमतरं भवेत्	क्षेमतरम् + भवेत्	अनुस्वारसन्धिः ।

(ख) समासः

अप्रतीकारम्	न विद्यते प्रतीकारः यस्य सः अप्रतीकारः, तम् - नञ्बहुव्रीहिः।
अशस्त्रम्	न विद्यते शस्त्रं यस्य सः अशस्त्रः, तम् - नञ्बहुव्रीहिः ।
शस्त्रपाणयः	शस्त्रं पाणौ येषां ते शस्त्रपाणयः - व्यधिकरणबहुव्रीहिः ।

(ग) कृदन्तः

प्रतीकारम्	प्रति + कृ (डुकृञ् - करणे) + घञ् (भावे), तम् । प्रतीकारः / प्रतिकारः ।
शस्त्रम्	शस् (शसु हिंसायाम्) + ष्ट्रन् ।
रणे	रण् (रण शब्दे) + अप्, तस्मिन् ।

(घ) तद्धितान्तः

धार्तराष्ट्राः	धृतराष्ट्र + अण् (अपत्यार्थे) । धृतराष्ट्रस्य अपत्यानि पुमांसः ।
क्षेमतरम्	क्षेम + तरप् (अतिशयार्थे) । अतिशयेन क्षेमम् ।

भावस्पष्टीकरणम् -

हन्युः ।	
के हन्युः ?	**धार्तराष्ट्राः** हन्युः ।
धार्तराष्ट्राः **कं** हन्युः ?	**मां** धार्तराष्ट्राः हन्युः ।
कीदृशाः धार्तराष्ट्राः मां हन्युः ?	**शस्त्रपाणयः** धार्तराष्ट्राः मां हन्युः ।
शस्त्रपाणयः धार्तराष्ट्राः **कीदृशं** मां हन्युः ?	शस्त्रपाणयः धार्तराष्ट्राः **अशस्त्रं** मां हन्युः ।
शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रं **पुनश्च कीदृशं** मां हन्युः ?	शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रम् **अप्रतीकारं** मां हन्युः ।
शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रम् अप्रतीकारं मां **कुत्र** हन्युः ?	शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रम् अप्रतीकारं मां **रणे** हन्युः ।
यदि शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रम् अप्रतीकारं मां रणे हन्युः (तर्हि) **किं भवेत्** ?	यदि शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रम् अप्रतीकारं मां रणे हन्युः (तर्हि) **क्षेमतरं भवेत् ।**
यदि शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रम् अप्रतीकारं मां रणे हन्युः (तर्हि) **किं** क्षेमतरं भवेत् ?	यदि शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रम् अप्रतीकारं मां रणे हन्युः (तर्हि) **तत्** क्षेमतरं भवेत् ।
यदि शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रम् अप्रतीकारं मां रणे हन्युः (तर्हि) तत् **कस्य** क्षेमतरं भवेत् ?	यदि शस्त्रपाणयः धार्तराष्ट्राः अशस्त्रम् अप्रतीकारं मां रणे हन्युः (तर्हि) तत् **मे** क्षेमतरं भवेत् ।

तात्पर्यम् - यदि किञ्चिदपि प्रतीकारम् अकुर्वन्तम् अगृहीतशस्त्रम् अपि मां गृहीतशस्त्राः एते कौरवाः दुर्योधनादयः युद्धे मारयन्ति तर्हि मम कृते तदेव क्षेमतरम् इति अहं भावयामि । स्वमरणम् एव वरं न तु युद्धे स्वजनानां विनाशकार्यम् । कथमपि बन्धुविनाशः अशोभनः एव ।

एवमुक्त्वार्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोकसंविग्नमानसः ॥१.४७॥

पदच्छेदः - एवम्, उक्त्वा, अर्जुनः, सङ्ख्ये, रथोपस्थे, उपाविशत् ।
विसृज्य, सशरम्, चापम्, शोकसंविग्नमानसः ॥

अन्वयः - सङ्ख्ये शोकसंविग्नमानसः अर्जुनः एवम् उक्त्वा सशरं चापं विसृज्य रथोपस्थे उपाविशत् ।

पदार्थः - सङ्ख्ये = युद्धे, शोकसंविग्नमानसः = शोकाकुलचित्तः, अर्जुनः = धनञ्जयः, एवम् = अनेन प्रकारेण, उक्त्वा = कथयित्वा, सशरम् = बाणसहितम्, चापम् = धनुः, विसृज्य = त्यक्त्वा, रथोपस्थे = रथस्य मध्यभागे, उपाविशत् = उपविष्टवान् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सङ्ख्ये	अ. नपुं. स. एक.	शोकसंविग्नमानसः	अ. पुं. प्र. एक. (विशेषणम्)
अर्जुनः	अ. पुं. प्र. एक. (विशेष्यम्)	एवम्	अव्ययम्
उक्त्वा	क्त्वान्तम् अव्ययम्	सशरम्	अ. पुं. द्वि. एक. (विशेषणम्)
चापम्	अ. पुं. द्वि. एक. (विशेष्यम्)	विसृज्य	ल्यबन्तम् अव्ययम्
रथोपस्थे	अ. पुं. स. एक.	उपाविशत्	उप + विश् (विश प्रवेशने) पर. कर्तरि लङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः
- उक्त्वार्जुनः — उक्त्वा + अर्जुनः — सवर्णदीर्घसन्धिः ।
- रथोपस्थ उपाविशत् — रथोपस्थे + उपाविशत् — यान्तवान्तादेशसन्धिः, यलोपः, प्रकृतिभावश्च ।
- सशरं चापम् — सशरम् + चापम् — अनुस्वारसन्धिः ।
- चापं शोकसंविग्नमानसः — चापम् + शोकसंविग्नमानसः — अनुस्वारसन्धिः ।

(ख) समासः
- रथोपस्थे — रथस्य उपस्थः रथोपस्थः, तस्मिन् - षष्ठीतत्पुरुषः ।
- सशरम् — शरेण सह वर्तते इति सशरम् - बहुव्रीहिः ।
- शोकसंविग्नमानसः — शोकेन संविग्नं शोकसंविग्नम् - तृतीयातत्पुरुषः । शोकसंविग्नं मानसं यस्य सः शोकसंविग्नमानसः - बहुव्रीहिः ।

(ग) कृदन्तः
- विसृज्य — वि + सृज् (सृज - विसर्गे) + ल्यप् ।
- शोकः — शुच् (शुच - शोके) + घञ् ।
- संविग्नम् — सम् + विज् (ओविजी - भयचलनयोः) + क्त (कर्तरि) ।

(घ) तद्धितान्तः
- मानसम् — मनस् + अण् (स्वार्थे), मनः एव ।

भावस्पष्टीकरणम् -

उपाविशत्।	
कः उपाविशत् ?	**अर्जुनः** उपाविशत्।
कीदृशः अर्जुनः उपाविशत् ?	**शोकसंविग्नमानसः** अर्जुनः उपाविशत्।
किं कृत्वा शोकसंविग्नमानसः अर्जुनः उपाविशत् ?	**उक्त्वा** शोकसंविग्नमानसः अर्जुनः उपाविशत्।
कथम् उक्त्वा शोकसंविग्नमानसः अर्जुनः उपाविशत् ?	**एवम्** उक्त्वा शोकसंविग्नमानसः अर्जुनः उपाविशत्।
कुत्र एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः उपाविशत् ?	**सङ्ख्ये** एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः उपाविशत्।
सङ्ख्ये एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः **पुनः किं कृत्वा** उपाविशत् ?	सङ्ख्ये एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः **विसृज्य** उपाविशत्।
सङ्ख्ये एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः **कं** विसृज्य उपाविशत् ?	सङ्ख्ये एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः **चापं** विसृज्य उपाविशत्।
सङ्ख्ये एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः **कीदृशं** चापं विसृज्य उपाविशत् ?	सङ्ख्ये एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः **सशरं** चापं विसृज्य उपाविशत्।
सङ्ख्ये एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः सशरं चापं विसृज्य **कुत्र** उपाविशत् ?	सङ्ख्ये एवम् उक्त्वा शोकसंविग्नमानसः अर्जुनः सशरं चापं विसृज्य **रथोपस्थे** उपाविशत्।

तात्पर्यम् - युद्धभूमौ शोकाकुलितमानसः सविषादः अर्जुनः एवं जनार्दनं श्रीकृष्णम् उक्त्वा बाणसहितं धनुः त्यक्त्वा रथस्य मध्यभागे उपविष्टवान्। युद्धं न करिष्यामि इति स्वनिश्चयं प्रकटितवान्।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे अर्जुनविषादयोगो नाम प्रथमोऽध्यायः ॥१॥

प्रथमाध्यायस्य सारः

श्रीमद्भगवद्गीतायाः उपदेशस्य पृष्ठभूमिका तत्प्रयोजनं च प्रथमाध्याये अस्मिन् वर्णिते स्तः। अग्रिमेषु अध्यायेषु आहत्य कृतस्य उपदेशस्य मूलं कारणं किम्? कथं च सः प्रवृत्तः इति एतस्मात् अध्यायात् ज्ञायते। शिष्यस्य मनोभूमिकां ज्ञात्वा तद्गुरुणा श्रीकृष्णेन अर्जुनस्य व्याजेन सम्भ्रान्तचित्तानाम् अस्माकं सर्वेषाम् अपि मार्गदर्शनं कृतम् अस्ति। अतः जीवने यदा वयं निर्णयकरणे काठिन्यम् अनुभवामः, किङ्कर्तव्यतामूढाः वा भवामः तदा गीता अस्मान् मातृवत् मार्गं दर्शयति। तस्मादेव यथा समग्रस्य गीतोपदेशस्य महत्त्वम् अनितरसाधारणम् अस्ति तथैव आदौ विद्यमानस्य अस्य अध्यायस्यापि अस्तीति ज्ञातव्यम्।

संजयधृतराष्ट्रयोः संवादः अध्यायस्य आरम्भे अस्ति। तस्य पृष्ठभूमिः एषा - युद्धम् अवरोद्धुं दूतरूपेण गतः श्रीकृष्णः यदा तत्र असफलः जातः तदा युद्धम् अनिवार्यम्, तत् भविष्यति एव इति स्पष्टम् अभवत्। स्वपुत्राणां मरणभयेन धृतराष्ट्रः व्याकुलः सञ्जातः। तदा व्यासमहर्षिः तत्र उपस्थाय तस्मै दिव्यदृष्टिं दातुम् उद्युक्तः अभवत्। धृतराष्ट्रः स्वस्य नेत्राभ्यां युद्धस्य दर्शनं निराकृतवान् इति कारणेन व्यासमहर्षिः तस्य मन्त्रिणे सञ्जयाय दिव्यदृष्टिं दत्तवान्। तन्मुखात् धृतराष्ट्रः सर्वमपि युद्धवृत्तान्तं श्रुतवान्। अतः गीतायाः आरम्भः संजयधृतराष्ट्रयोः संवादेन भवति।

अस्मिन् अध्याये पराक्रमशालिनां योद्धृणां नामनिर्देशः, भीष्मादीनां शङ्खनादः, अर्जुनस्य मनोभूमिका चेति केचन विषयाः मुख्यत्वेन समुपवर्णिताः सन्ति।

"कुरुक्षेत्रं युद्धभूमिमात्रं न, अपि तु धर्मक्षेत्रम्। तस्मिन् विशिष्टे स्थले मत्पुत्राः कौरवाः पाण्डवाश्च सम्मिल्य किम् अकुर्वन्?" इति धृतराष्ट्रः प्रथमश्लोके सञ्जयं पृच्छति।

महाभारतयुद्धे सहस्रशः राजानः, लक्षशः सैनिकाश्च भागम् अवहन्। तेषु मुख्यानां केषाञ्चन रथिनां महारथिनां च नामानि प्रथमाध्याये निर्दिष्टानि सन्ति। युद्धारम्भे पाण्डवानां सैन्यं दृष्ट्वा दुर्योधनः द्रोणाचार्यम् उद्दिश्य उभयोः सैन्ययोः स्थितानां वीराणां नामानि स्मारयति। तत्रापि सः पाण्डवानां पक्षे स्थितानां नामानि आदौ वदति - "धृष्टद्युम्नः, युयुधानः, विराटः, द्रुपदः, धृष्टकेतुः, चेकितानः, काशिराजः, पुरुजित्, कुन्तिभोजः, शैब्यः, युधामन्युः, उत्तमौजाः, अभिमन्युः. उपपाण्डवाः चेति एते सर्वे भीमार्जुनसमाः शूराः सन्ति। अस्माकं पक्षे च स्वयं भवान्, भीष्मः. कर्णः, कृपः, अश्वत्थामा, विकर्णः, सौमदत्तिः इत्यादयः सन्ति। अन्येऽपि बहवः वीराः मम निमित्तं प्राणान् समर्पयितुं सज्जाः सन्ति" इति। तथापि भीष्मेण संरक्षितं स्वीयं सैन्यं संख्यया महत् अस्ति चेदपि भीमेन रक्षितात् अल्पसंख्यायुतात् पाण्डवसैन्यात् दुर्बलमेव इति तस्य मनसि आसीदेव।

युद्धारम्भं सूचयितुं पितामहः भीष्मः सिंहः इव उच्चैः गर्जनं कृत्वा शङ्खम् अधमत्। ततः शङ्खाः भेर्यः पणवानकगोमुखाः च सहसा एव ताडिताः अभवन्, येन तुमुलः शब्दः अभवत्। ततः कृष्णार्जुनौ अपि युद्धोत्साहवर्धनाय स्वीयौ अलौकिकौ शङ्खौ ध्मातवन्तौ। श्रीकृष्णः पाञ्चजन्यम् अर्जुनः देवदत्तं च शङ्खम् अधमत्। भीमः, युधिष्ठिरः, नकुलः, सहदेवः चापि स्वीयान् शङ्खान् अधमन्। काशिराजः, धृष्टद्युम्नः, विराटराजः, सात्यकिः, द्रुपदमहाराजः.

उपपाण्डवाः, अभिमन्युश्चेति सर्वेऽपि पृथक् पृथक् शङ्खान् अधमन्। तेन महान् घोरश्च शब्दः समुत्पन्नः। आकाशे भूमौ च तस्य प्रतिध्वनिः जातः। तस्य घोषस्य श्रवणेन दुष्टानां कौरवाणां हृदयानि विदीर्णानि इव अभवन्।

तस्मिन् अवसरे अर्जुनः युद्धे भागं ग्रहीतुं सन्नद्धाः के के उपस्थिताः सन्ति इति द्रष्टुम् इच्छति। अतः सः "**उभयोः सेनयोः मध्ये मम रथं स्थापय**" इति सारथिं कृष्णम् आदिशति। भगवान् श्रीकृष्णः तथा कृत्वा "अर्जुन ! युद्धं कर्तुम् उपस्थितान् एतान् पश्य" इति वदति।

अर्जुनः पश्यति - पुरतः उपस्थिताः सर्वे स्वस्य पितरः, पितामहाः, गुरवः, मातुलाः, भ्रातरः, सुहृदः बान्धवाश्च एव। एतैः सह युद्धं करणीयम् इति भावनया एव सः उद्विग्नः भवति। तस्य अङ्गानि शिथिलानि अभवन्। मुखं शुष्कम्, शरीरं कम्पितं रोमाञ्चितं च। धनुः तस्य हस्तात् स्रस्तम्, त्वक् दग्धा, मनः भ्रमितम् इव। एतानि अपशकुनानि दृष्ट्वा सः चिन्तयति यत् अस्मात् युद्धात् किमपि कल्याणं न सिध्यति इति। सः वदति - "हे कृष्ण ! अहं विजयं न इच्छामि। राज्यं सुखानि चापि न इच्छामि। अस्माकं राज्येन भोगैः प्राणैः वा किं प्रयोजनम् ? सांसारिकभोग्यवस्तुषु मम अभिरुचिः नास्ति। येषां कृते राज्यं भोगाः सुखानि वा अपेक्षितानि ते एव बान्धवाः अधुना स्वप्राणान् धनानि च त्यक्तुम् उद्युक्ताः सन्तः युद्धे उपस्थिताः सन्ति। एते मम आचार्याः, पितरः, पुत्राः, पितामहाः, मातुलाः, श्वशुराः, पौत्राः, श्यालाः, बान्धवाश्च सन्ति। दुर्योधनादयः यदि मां मारयन्ति मारयन्तु कामम्। अहं तान् न मारयितुम् इच्छामि" इति।

अग्रे च अर्जुनः स्वकथनस्य समर्थनाय अनर्थपरम्परां काञ्चित् निवेदितवान्। "दुष्टानाम् अपि एतेषां मारणेन पापमेव अस्मान् स्पृशेत्। कुलक्षयकारणतः यत् पापं सम्भवति तत् एते न जानीयुः नाम, परम् अस्माभिः कथं न ज्ञातव्यम् ? कुलानि यदि नश्यन्ति तर्हि सनातनाः कुलधर्माः विनश्यन्ति। यदि कुलधर्मः नश्यति तर्हि अधर्मः कुलम् आवृणोति। तेन कुलस्त्रियः प्रदुष्यन्ति। तेन च वर्णसङ्करः भवति। वर्णसङ्करः कुलघ्नानां कुलस्य च नरकाय भवति। पितरः लुप्तपिण्डोदकक्रियाः भवन्ति। तदा ते नरके पतन्ति। एवं च युद्धे कुलस्य नाशनेन वयं महतः पापस्य भागिनः भवेम" इति।

अन्ततो गत्वा युद्धभूमौ शोकाकुलितमानसः अर्जुनः सशरं चापं त्यक्त्वा रथस्य मध्यभागे उपविश्य '**युद्धं न करिष्यामि**'- इति स्वनिश्चयं प्रकटितवान्।

प्रत्येकमपि अध्यायस्य अनन्तरम् - "श्रीमद्भगवद्गीतासु उपनिषत्सु ..... इति वाक्यं भवति। तत्र तस्य तस्य अध्यायस्य नामनिर्देशः भवति। यथा अस्मिन् अध्याये '**अर्जुनविषादयोगः**' इति। वाक्येऽस्मिन् सप्तमीविभक्तिबहुवचनम् आदरार्थं सूचयति। भगवद्गीतेति शब्दानन्तरम् उपनिषच्छब्दस्य प्रयोगः गीतायाः उपनिषत्सु अन्यतमत्वं तत्समानत्वं च द्योतयति। 'ब्रह्मविद्यायाम्' इति शब्देन गीता अध्यात्मज्ञानप्रकाशिका अस्तीति ज्ञायते।'योगशास्त्रे' इति शब्देन तस्याः समाधिविषयकशास्त्रेण सह सम्बन्धः दर्शितः। अन्ते च अस्याः विषयवस्तु संवादात्मकम् अस्तीति कारणेन 'श्रीकृष्णार्जुनसंवादे' इति उल्लेखः कृतः।

****

अथ द्वितीयोऽध्यायः

सञ्जय उवाच - तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम्।
विषीदन्तमिदं वाक्यमुवाच मधुसूदनः ॥२.१॥

पदच्छेदः -

सञ्जयः, उवाच - तम्, तथा, कृपया, आविष्टम्, अश्रुपूर्णाकुलेक्षणम्।
विषीदन्तम्, इदम्, वाक्यम्, उवाच, मधुसूदनः ॥

अन्वयः - तथा कृपया आविष्टम् अश्रुपूर्णाकुलेक्षणं विषीदन्तं तम् (अर्जुनम्) मधुसूदनः इदं वाक्यम् उवाच।

पदार्थः - तथा = तेन प्रकारेण, कृपया = करुणया (दयया), आविष्टम् = आक्रान्तम्, अश्रुपूर्णाकुलेक्षणम् = साश्रुनेत्रम् (अश्रुपूर्णनेत्रम्), विषीदन्तम् = दुःखितम्, तम् = तम् (अर्जुनम्), मधुसूदनः = श्रीकृष्णः, इदम् = एतत्, वाक्यम् = वचनम्, उवाच = अवदत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तथा	अव्ययम्	कृपया	आ. स्त्री. तृ. एक.
आविष्टम्	अ. पुं. द्वि. एक. (विशेषणम्)	अश्रुपूर्णाकुलेक्षणम्	अ. पुं. द्वि. एक. (विशेषणम्)
विषीदन्तम्	विषीदत् - त. पुं. द्वि. एक. (विशेषणम्)	तम्	तद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)
मधुसूदनः	अ. पुं. प्र. एक.	इदम्	इदम् - म. सर्व. नपुं. द्वि. एक. (विशेषणम्)
वाक्यम्	अ.नपुं. द्वि. एक. (विशेष्यम्)	उवाच	वच् (वच परिभाषणे) पर. कर्तरि लिट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः कृपयाविष्टम् — कृपया + आविष्टम् — सवर्णदीर्घसन्धिः।

(ख) समासः अश्रुपूर्णाकुलेक्षणम् — अश्रुभिः पूर्णे अश्रुपूर्णे- तृतीयातत्पुरुषः।
अश्रुपूर्णे च आकुले च अश्रुपूर्णाकुले - कर्मधारयः।
अश्रुपूर्णाकुले ईक्षणे यस्य सः, तम् - बहुव्रीहिः।

(ग) कृदन्तः आविष्टम् — आ + विश् (विश प्रवेशने) + क्त (कर्तरि) तम्।
ईक्षणम् — ईक्ष् (ईक्ष दर्शने) + ल्युट्।
विषीदन्तम् — वि + सद् (षद्लृ विशरणगत्यवसादनेषु) + शतृ (कर्तरि) तम्।

वाक्यम्	वच् (वच परिभाषणे) + ण्यत् ।
मधुसूदनः	मधुं (तन्नामकम्) दैत्यं सूदयति इति मधुसूदनः ।
	मधु + सूद् + णिच् (स्वार्थे) + ल्यु (अन) ।
	सूदनं मधुदैत्यस्य यस्मात् स मधुसूदनः । - ब्रह्मवैवर्तपुराणे - ११०

भावस्पष्टीकरणम् -

उवाच ।	
कः उवाच ?	**मधुसूदनः** उवाच ।
मधुसूदनः **कम्** उवाच ?	मधुसूदनः **तम्** उवाच ।
मधुसूदनः **कथम्भूतं** तम् उवाच ?	मधुसूदनः **आविष्टं** तम् उवाच ।
मधुसूदनः **कया** आविष्टं तम् उवाच ?	मधुसूदनः **कृपया** आविष्टं तम् उवाच ।
मधुसूदनः कृपया **कथम्** आविष्टं तम् उवाच ?	मधुसूदनः कृपया **तथा** आविष्टं तम् उवाच ।
मधुसूदनः कृपया तथा आविष्टं **पुनश्च कीदृशं** तम् उवाच ?	मधुसूदनः कृपया तथा आविष्टम् **अश्रुपूर्णाकुलेक्षणं** तम् उवाच ।
मधुसूदनः कृपया तथा आविष्टम् अश्रुपूर्णाकुलेक्षणं **किं कुर्वन्तं** तम् उवाच ?	मधुसूदनः कृपया तथा आविष्टम् अश्रुपूर्णाकुलेक्षणं **विषीदन्तं** तम् उवाच ।
मधुसूदनः कृपया तथा आविष्टम् अश्रुपूर्णाकुलेक्षणं विषीदन्तं तं **किम्** उवाच ?	मधुसूदनः कृपया तथा आविष्टम् अश्रुपूर्णाकुलेक्षणं विषीदन्तं तं **वाक्यम्** उवाच ।
मधुसूदनः कृपया तथा आविष्टम् अश्रुपूर्णाकुलेक्षणं विषीदन्तं तं **किं** वाक्यम् उवाच ?	मधुसूदनः कृपया तथा आविष्टम् अश्रुपूर्णाकुलेक्षणं विषीदन्तं तम् **इदं** वाक्यम् उवाच ।

तात्पर्यम् - यतः रणाङ्गणे स्वबान्धवान् दृष्ट्वा अर्जुनः विषादग्रस्तः जातः आसीत् अतः तस्य शोचनीयाम् अवस्थां विलोक्य भगवान् श्रीकृष्णः साश्रुनेत्रं सकरुणं शोकाकुलं तम् अर्जुनम् इदं (वक्ष्यमाणम्) वचनम् अवदत् ।

श्रीभगवानुवाच - **कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।**
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥२.२॥

पदच्छेदः -

श्रीभगवान्, उवाच - कुतः, त्वा, कश्मलम्, इदम्, विषमे, समुपस्थितम् ।
अनार्यजुष्टम्, अस्वर्ग्यम्, अकीर्तिकरम्, अर्जुन ॥

अन्वयः - अर्जुन ! विषमे अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तिकरम् इदं कश्मलं कुतः त्वा समुपस्थितम् ?

पदार्थः - श्रीभगवान् = श्रीकृष्णः, उवाच = उक्तवान्, अर्जुन = हे अर्जुन ! विषमे = विपरीतपरिस्थितौ (विपत्तिकाले), अनार्यजुष्टम् = असाधुसेवितम्, अस्वर्ग्यम् = स्वर्गप्राप्तेः बाधकम् (स्वर्गायोग्यम्), अकीर्तिकरम् = अपयशस्करम्, इदम् = एतत्, कश्मलम् = मनोमालिन्यम्, कुतः = कस्मात्, त्वा = त्वाम्, समुपस्थितम् = समागतम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	विषमे	अ. पुं. स. एक.
अनार्यजुष्टम्	अ. नपुं. प्र. एक. (विशेषणम्)	अस्वर्ग्यम्	अ. नपुं. प्र. एक. (विशेषणम्)
अकीर्तिकरम्	अ. नपुं. प्र. एक. (विशेषणम्)	इदम्	म. सर्व. नपुं. प्र. एक. (विशेषणम्)
कश्मलम्	अ. नपुं. प्र. एक. (विशेष्यम्)	कुतः	अव्ययम्
त्वा	युष्मद् - द. सर्व. द्वि. एक.	समुपस्थितम्	अ. नपुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः	कुतस्त्वा	कुतः + त्वा विसर्गसन्धिः (सकारः) ।
(ख) समासः	अनार्यजुष्टम्	आर्यैः जुष्टम् आर्यजुष्टम् - तृतीयातत्पुरुषः ।
		न आर्यजुष्टम् - नञ्तत्पुरुषः ।
	अस्वर्ग्यम्	न स्वर्ग्यम् - नञ्तत्पुरुषः ।
	अकीर्तिकरम्	न कीर्तिकरम् - नञ्तत्पुरुषः ।
(ग) कृदन्तः	समुपस्थितम्	सम् + उप + स्था + क्त (कर्तरि) ।
	जुष्टम्	जुष् (जुषी प्रीतिसेवनयोः) + क्त (कर्मणि) ।
(घ) तद्धितान्तः	कुतः	किम् + तसिल् (कु आदेशः) । कस्मात् इत्यर्थः ।

भावस्पष्टीकरणम् -

समुपस्थितम् ।	
किं समुपस्थितम् ?	**इदं** समुपस्थितम् ।
इदं **किं** समुपस्थितम् ?	इदं **कश्मलं** समुपस्थितम् ।
कीदृशम् इदं कश्मलं समुपस्थितम् ?	**अनार्यजुष्टम्** इदं कश्मलं समुपस्थितम्
अनार्यजुष्टं **पुनश्च कीदृशम्** इदं कश्मलं समुपस्थितम् ?	अनार्यजुष्टम् **अस्वर्ग्यम्** इदं कश्मलं समुपस्थितम् ।

अनार्यजुष्टम् अस्वर्ग्यं **पुनश्च कीदृशम्** इदं कश्मलं समुपस्थितम् ?	अनार्यजुष्टम् अस्वर्ग्यम् **अकीर्तिकरम्** इदं कश्मलं समुपस्थितम् ।
कुत्र अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तिकरम् इदं कश्मलं समुपस्थितम् ?	**विषमे** अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तिकरम् इदं कश्मलं समुपस्थितम् ।
विषमे अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तिकरम् इदं कश्मलं **कं** समुपस्थितम् ?	विषमे अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तिकरम् इदं कश्मलं **त्वा** समुपस्थितम् ।
विषमे अनार्यजुष्टम् अस्वर्ग्यम् अकीर्तिकरम् इदं कश्मलं **कुतः** त्वा समुपस्थितम् ?	
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन !**

तात्पर्यम् - हे अर्जुन ! अस्मिन् विषमे काले असाधुसेवितं स्वर्गप्राप्तेः बाधकम् अपयशस्करं च एतादृशं चित्तकालुष्यं कथं त्वां (त्वयि) समागतम् ?

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥२.३॥

पदच्छेदः - क्लैब्यम्, मा, स्म, गमः, पार्थ, न, एतत्, त्वयि, उपपद्यते ।
क्षुद्रम्, हृदयदौर्बल्यम्, त्यक्त्वा, उत्तिष्ठ, परन्तप ॥

अन्वयः - हे पार्थ ! (ईदृशम्) क्लैब्यं मा स्म गमः । त्वयि एतत् न उपपद्यते । परन्तप ! क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ ।

पदार्थः - पार्थ = हे अर्जुन ! क्लैब्यम् = नपुंसकत्वम्, मा स्म गमः = मा प्राप्नुहि, त्वयि = भवति, एतत् = इदम्, न उपपद्यते = न युज्यते, परन्तप = हे परन्तप ! (अर्जुन), क्षुद्रम् = तुच्छम्, हृदयदौर्बल्यम् = चित्तवैक्लव्यम्, त्यक्त्वा = विहाय, उत्तिष्ठ = सन्नद्धः भव ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	क्लैब्यम्	अ. नपुं. द्वि. एक.
मा	अव्ययम्	स्म	अव्ययम्
गमः	गम् (गम्लृ गतौ) कर्तरि लुङ्. मपु. एक.	त्वयि	युष्मद् - द. सर्व. स. एक.
एतत्	एतद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)	न	अव्ययम्

उपपद्यते	उप + पद् (पद गतौ) आत्म. कर्तरि लट्. प्रपु. एक.	परन्तप	अ. पुं. सम्बो. एक.
क्षुद्रम्	अ. नपुं. द्वि. एक. (विशेषणम्)	हृदयदौर्बल्यम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
त्यक्त्वा	अव्ययम् (क्त्वान्तम्)	उत्तिष्ठ	उद् + स्था (ष्ठा गतिनिवृत्तौ) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	क्लैब्यं मा	क्लैब्यम् + मा	अनुस्वारसन्धिः ।
	क्षुद्रं हृदयदौर्बल्यम्	क्षुद्रम् + हृदयदौर्बल्यम्	अनुस्वारसन्धिः ।
	हृदयदौर्बल्यं त्यक्त्वा	हृदयदौर्बल्यं + त्यक्त्वा	अनुस्वारसन्धिः ।
	त्यक्त्वोत्तिष्ठ	त्यक्त्वा + उत्तिष्ठ	गुणसन्धिः ।
	नैतत्	न + एतत्	वृद्धिसन्धिः ।
	त्वय्युपपद्यते	त्वयि + उपपद्यते	यण्सन्धिः ।
(ख) समासः	हृदयदौर्बल्यम्	हृदयस्य दौर्बल्यम्	षष्ठीतत्पुरुषः ।
	परन्तप	परान् शत्रून् तापयति इति परन्तपः, तत्सम्बुद्धौ । कर्तरि खच् उपपदसमासः ।	
(ग) कृदन्तः	त्यक्त्वा	त्यज् (त्यज हानौ) + क्त्वा ।	
(घ) तद्धितान्तः	क्लैब्यम्	क्लीब + ष्यञ् (भावे) । क्लीबस्य भावः इत्यर्थः ।	
	दौर्बल्यम्	दुर्बल + ष्यञ् (भावे) । दुर्बलस्य भावः इत्यर्थः ।	

भावस्पष्टीकरणम् -

मा स्म गमः ।	
किं मा स्म गमः ?	**क्लैब्यं** मा स्म गमः ।
(यतः) न उपपद्यते ।	
किं न उपपद्यते ?	**एतत्** न उपपद्यते ।
कस्मिन् एतत् न उपपद्यते ?	**त्वयि** एतत् न उपपद्यते ।
(अतः) परन्तप ! उत्तिष्ठ ।	
किं त्यक्त्वा उत्तिष्ठ ?	**हृदयदौर्बल्यं** त्यक्त्वा उत्तिष्ठ ।
कीदृशं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ ?	**क्षुद्रं** हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**अर्जुन ! परन्तप !**

तात्पर्यम् - हे अर्जुन ! नपुंसकत्वं मा प्राप्नुहि । वीरस्य तव एतत् न युज्यते । त्वं वीरः असि । अतः एतादृशं तुच्छं चित्तवैक्लव्यं त्यक्त्वा युद्धार्थं सन्नद्धो भव । अन्यथा जगति त्वम् उपहासपात्रं भविष्यसि ।

अर्जुन उवाच - कथं भीष्ममहं सङ्ख्ये द्रोणं च मधुसूदन।
इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥२.४॥

पदच्छेदः -

अर्जुनः, उवाच - कथम्, भीष्मम्, अहम्, सङ्ख्ये, द्रोणम्, च, मधुसूदन ।
इषुभिः, प्रतियोत्स्यामि, पूजार्हौ, अरिसूदन ॥

अन्वयः - मधुसूदन ! अहं सङ्ख्ये कथम् इषुभिः पूजार्हौ भीष्मं द्रोणं च प्रतियोत्स्यामि ? अरिसूदन !

पदार्थः - मधुसूदन = हे कृष्ण ! अहम् = अहम्, सङ्ख्ये = युद्धे, कथम् = केन प्रकारेण, पूजार्हौ = पूजनीयौ, भीष्मं द्रोणं च = भीष्मं द्रोणं च, इषुभिः = बाणैः, प्रतियोत्स्यामि = सम्प्रहरिष्यामि, अरिसूदन = हे शत्रुनाशक !

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
मधुसूदन	अ. पुं. सम्बो. एक.	अहम्	अस्मद् - द. सर्व. प्र. एक.
सङ्ख्ये	अ. नपुं. स. एक.	कथम्	अव्ययम्
इषुभिः	उ. पुं. तृ. बहु.	पूजार्हौ	अ. पुं. द्वि. द्विव.
भीष्मम्	अ. पुं. द्वि. एक.	द्रोणम्	अ. पुं. द्वि. एक.
च	अव्ययम्	प्रतियोत्स्यामि	प्रति + युध् (युध सम्प्रहारे)[1] - आत्म. कर्तरि लृट्. उपु. एक.
अरिसूदन	अ. पुं. सम्बो. एक.		

व्याकरणम् -

(क) सन्धिः पूजार्हावरिसूदन — पूजार्हौ + अरिसूदन — यान्तवान्तादेशसन्धिः ।

(ख) समासः पूजार्हौ — पूजाम् अर्हौ पूजार्हौ - द्वितीयातत्पुरुषः ।

(ग) कृदन्त मधुसूदन — मधुं तन्नामकं दैत्यं सूदयति इति मधुसूदनः, तत्सम्बुद्धौ - मधु + सूद् (सूद क्षरणे) + णिच् (स्वार्थे) + ल्यु (अन) ।

अरिसूदन — अरिं सूदयति इति अरिसूदनः, तत्सम्बुद्धौ - अरि + सूद् (सूद क्षरणे) + णिच् (स्वार्थे) + ल्यु (अन) ।

अर्हः — अर्ह् (अर्ह पूजायाम्) + अच् (कर्तरि) ।

द्रोणः — द्रुण् (द्रुण हिंसागतिकौटिल्येषु) + अच् (कर्तरि) ।

1. (अयं धातुः आत्मनेपदी अस्ति अतः प्रतियोत्स्ये इति रूपं भवेत् । अत्र परस्मैपदित्वेन आर्षः प्रयोगः अस्ति ।)

भावस्पष्टीकरणम् -

प्रतियोत्स्यामि ।	
कुत्र प्रतियोत्स्यामि ?	**सङ्ख्ये** प्रतियोत्स्यामि ।
सङ्ख्ये **कं** प्रतियोत्स्यामि ?	सङ्ख्ये **भीष्मं** प्रतियोत्स्यामि ।
सङ्ख्ये भीष्मं **पुनश्च कं** प्रतियोत्स्यामि ?	सङ्ख्ये भीष्मं **द्रोणं च** प्रतियोत्स्यामि ।
सङ्ख्ये **कीदृशौ** भीष्मं द्रोणं च प्रतियोत्स्यामि ?	सङ्ख्ये **पूजार्हौ** भीष्मं द्रोणं च प्रतियोत्स्यामि ।
सङ्ख्ये पूजार्हौ भीष्मं द्रोणं च **कैः** प्रतियोत्स्यामि ?	सङ्ख्ये पूजार्हौ भीष्मं द्रोणं च **इषुभिः** प्रतियोत्स्यामि ।
अस्मिन् श्लोके सम्बोधनपदे के ?	**मधुसूदन, अरसूदन ।**

तात्पर्यम् - हे मधुसूदन ! पितामहः भीष्मः आचार्यः द्रोणश्च मम अत्यन्तं पूजार्हौ (स्तः) अहं युद्धे कथं तौ प्रति बाणप्रयोगं करिष्यामि ? इति अर्जुनः वदति ।

गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ।
हत्वार्थकामांस्तु गुरूनिहैव भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥२.५॥

पदच्छेदः - गुरून्, अहत्वा, हि, महानुभावान्, श्रेयः, भोक्तुम्, भैक्ष्यम्, अपि इह लोके ।
हत्वा, अर्थकामान्, तु, गुरून्, इह, एव, भुञ्जीय, भोगान्, रुधिरप्रदिग्धान् ॥

अन्वयः - महानुभावान् गुरून् अहत्वा (स्थितस्य मम) भैक्ष्यं भोक्तुम् अपि इह लोके श्रेयः । गुरून् हत्वा इह एव रुधिरप्रदिग्धान् (कथम् अहं) भोगान् भुञ्जीय ?

पदार्थः - महानुभावान् = महाशयान्, गुरून् = आचार्यान्, अहत्वा = अमारयित्वा (स्थितस्य मम), भैक्ष्यम् = भिक्षाम्, भोक्तुम् = खादितुम्, इह लोके = अस्मिन् लोके, श्रेयः = साधु, गुरून् = आचार्यान्, हत्वा = विनाश्य, इह एव = अस्मिन् जगति एव, रुधिरप्रदिग्धान् = रक्तमिश्रितान्, अर्थकामान् = अर्थकामरूपान्. भोगान् = राज्यसुखादीन् (लौकिकविषयान्) भुञ्जीय = आस्वादयेयम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महानुभावान्	अ. पुं. द्वि. बहु. (विशेषणम्)	गुरून्	अ. पुं. द्वि. बहु. (विशेष्यम्)
अहत्वा	क्त्वान्तम् अव्ययम्	भैक्ष्यम्	अ. नपुं. द्वि. एक.
भोक्तुम्	तुमुन्नन्तम् अव्ययम्	इह	अव्ययम्

लोके	अ. पुं. स. एक.	श्रेयः	श्रेयस् - सका. नपुं. प्र. एक.
गुरून्	उ. पुं. द्वि. बहु.	हत्वा	क्त्वान्तम् अव्ययम्
इह	अव्ययम्	एव	अव्ययम्
रुधिरप्रदिग्धान्	अ. पुं. द्वि. बहु. (विशेषणम्)	अर्थकामान्	अ. पुं. द्वि. बहु. (विशेषणम्)
भोगान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	भुञ्जीय	भुज् (भुज पालनाभ्यवहारयोः) आत्म. विधिलिङ्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	श्रेयो भोक्तुम्	श्रेयः + भोक्तुम्	विसर्गसन्धिः (सकारः) (रेफः) (उकारः) गुणः ।
	अपीह	अपि + इह	सवर्णदीर्घसन्धिः ।
	इहैव	इह + एव	वृद्धिसन्धिः ।
(ख) समासः	अहत्वा	न हत्वा अहत्वा- नञ्तत्पुरुषः ।	
	महानुभावान्	महान् अनुभावः येषां ते महानुभावाः, तान् - बहुव्रीहिः ।	
	अर्थकामान्	अर्थाः च कामाः च अर्थकामाः, तान् - द्वन्द्वः ।	
	रुधिरप्रदिग्धान्	रुधिरेण प्रदिग्धः रुधिरप्रदिग्धः, तान् - तृतीयातत्पुरुषः ।	
(ग) कृदन्तः	हत्वा	हन् (हन हिंसागत्योः) क्त्वा ।	
	भोक्तुम्	भुज् (भुज + पालनाभ्यवहारयोः) तुमुन् ।	
	लोके	लोक् (लोकृ लोचने) + घञ्, तस्मिन् ।	
	भोगान्	भुज् (भुज पालनाभ्यवहारयोः) + घञ्, तान् ।	
(घ) तद्धितान्तः	श्रेयः	प्रशस्य + ईयसुन् (अतिशये) प्रशस्य-शब्दस्य 'श्र' इति आदेशः ।	
	भैक्ष्यम्	भिक्षा + ष्यञ् (स्वार्थे) ।	

भावस्पष्टीकरणम् -

श्रेयः ।	
किं कर्तुं श्रेयः ?	**भोक्तुं** श्रेयः ।
किं भोक्तुं श्रेयः ?	**भैक्ष्यं** भोक्तुं श्रेयः ।
किं कृत्वा (स्थितस्य मम) भैक्ष्यं भोक्तुं श्रेयः ?	**अहत्वा** (स्थितस्य मम) भैक्ष्यं भोक्तुं श्रेयः ।
कान् अहत्वा स्थितस्य मम भैक्ष्यं भोक्तुं श्रेयः ?	**गुरून्** अहत्वा स्थितस्य मम भैक्ष्यं भोक्तुं श्रेयः ।

कीदृशान् गुरून् अहत्वा स्थितस्य मम भैक्ष्यं भोक्तुं श्रेयः ?	**महानुभावान्** गुरून् अहत्वा स्थितस्य मम भैक्ष्यं भोक्तुं श्रेयः ।
महानुभावान् गुरून् अहत्वा स्थितस्य मम भैक्ष्यं **कुत्र** भोक्तुं श्रेयः ?	महानुभावान् गुरून् अहत्वा स्थितस्य मम भैक्ष्यं **इहैव लोके** भोक्तुं श्रेयः ।
भुञ्जीय ।	
कान् भुञ्जीय ?	**भोगान्** भुञ्जीय ।
कान् भोगान् भुञ्जीय ?	**अर्थकामान्** भोगान् भुञ्जीय ।
कीदृशान् अर्थकामान् भोगान् भुञ्जीय ?	**रुधिरप्रदिग्धान्** अर्थकामान् भोगान् भुञ्जीय ।
कुत्र रुधिरप्रदिग्धान् अर्थकामान् भोगान् भुञ्जीय ?	**इह एव** रुधिरप्रदिग्धान् अर्थकामान् भोगान् भुञ्जीय ।
किं कृत्वा इह एव रुधिरप्रदिग्धान् अर्थकामान् भोगान् भुञ्जीय ?	**हत्वा** इह एव रुधिरप्रदिग्धान् अर्थकामान् भोगान् भुञ्जीय ।
कान् हत्वा इह एव रुधिरप्रदिग्धान् अर्थकामान् भोगान् भुञ्जीय ?	**गुरून्** हत्वा इह एव रुधिरप्रदिग्धान् अर्थकामान् भोगान् भुञ्जीय ।

तात्पर्यम् - एतान् महानुभावान् गुरून् भीष्मद्रोणादीन् अहत्वा भिक्षायाचनेन जीवनम् अपि वरम् । किन्तु एतेषां हननेन प्राप्यमाणाः ये भोगाः रक्तलिप्ताः भविष्यन्ति तेषाम् उपभोगः सर्वथा नोचितः । (एतान् श्रेष्ठान्, अनुभवशालिनः गुरून् भीष्मद्रोणादीन् अर्थात् ज्येष्ठजनान् अमारयित्वा भिक्षां याचित्वा जीवामि चेत् तत् उचितं भवेत् ननु । किन्तु एतान् (भीष्मद्रोणादीन्) मारयामि चेत्, अनन्तरं मया ये भोगाः भोक्तव्याः, यत् सुखं वा भोक्तव्यं तत् (एतेषाम्) रक्तेन अवलिप्तं भविष्यति । अतः कथं वा अहं तान् भोक्तुं शक्नुयाम् ।)

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ।
यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः प्रमुखे धार्तराष्ट्राः ॥२.६॥

पदच्छेदः - न, च, एतत्, विद्मः, कतरत्, नः, गरीयः, यत्, वा, जयेम, यदि, वा, नः, जयेयुः ।
यान्, एव, हत्वा, न, जिजीविषामः, ते, अवस्थिताः, प्रमुखे, धार्तराष्ट्राः ॥

अन्वयः - यान् हत्वा न जिजीविषामः ते एव धार्तराष्ट्राः प्रमुखे अवस्थिताः (तस्मात्) यद् वा जयेम यदि वा नो जयेयुः (अनयोः) कतरत् नः गरीयः (इति) एतत् न विद्मः ।

पदार्थः - न च = न च, एतत् = इदम्, विद्मः = जानीमः, कतरत् = किम्, नः = अस्माकम्, गरीयः = श्रेयः, एव = यान् एव, हत्वा = मारयित्वा, न जिजीविषामः = जीवितुं न इच्छामः, ते धार्तराष्ट्राः = तादृशाः धृतराष्ट्रस्य पुत्राः, प्रमुखे = सम्मुखे, अवस्थिताः = उपस्थिताः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यान्	यद् - द. सर्व. पुं. द्वि. बहु. (विशेषणम्)	हत्वा	क्त्वान्तम् अव्ययम्
न	अव्ययम्	जिजीविषामः	जीव् (जीव प्राणने) (सन्) पर. कर्तरि लट्. उपु. बहु.
ते	तद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)	एव	अव्ययम्
धार्तराष्ट्राः	अ. पुं. प्र. बहु. (विशेषणम्)	प्रमुखे	अ. पुं. स. एक.
अवस्थिताः	अ. पुं. प्र. बहु. (विशेषणम्)	यद्	द. सर्व. नपुं. प्र. एक. (विशेषणम्)
वा	अव्ययम्	जयेम	जि (जि जये) पर. कर्तरि विधिलिङ्. उपु. बहु.
यदि	अव्ययम्	वा	अव्ययम्
नः	अस्मद् - द. सर्व. द्वि. बहु.	जयेयुः	जि (जि जये) पर. कर्तरि वि.लिङ्. प्रपु. बहु.
कतरत्	कतरत्- त. नपुं. प्र. एक.	गरीयः	गरीयस् - सका. नपुं. प्र. एक. (विशेषणम्)
एतत्	एतद् - द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	न	अव्ययम्
विद्मः	विद् (विद ज्ञाने) - पर. कर्तरि लट्. उपु. बहु.		

व्याकरणम् -

(क) सन्धिः

चैतत्	च + एतत्	वृद्धिसन्धिः ।
एतद्विद्मः	एतत् + विद्मः	जश्त्वसन्धिः ।
कतरन्नः	कतरत् + नः	अनुनासिकसन्धिः ।
नो गरीयः	नः + गरीयः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
गरीयो यत्	गरीयः + यत्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
यद्वा	यत् + वा	जश्त्वसन्धिः ।
नो जयेयुः	नः + जयेयुः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
जिजीविषामस्ते	जिजीविषामः + ते	विसर्गसन्धिः (सकारः) ।

	तेऽवस्थिताः	ते + अवस्थिताः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
(ख) कृदन्तः	हत्वा	हन् (हन हिंसागत्योः) + क्त्वा।
	अवस्थिताः	अव + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।
(ग) तद्धितान्तः	कतरत्	किम् + डतरच् (स्वार्थे)।
	गरीयः	गुरु + ईयसुन् (अतिशये)। अतिशयेन गुरुः इत्यर्थः।
	धार्तराष्ट्राः	धृतराष्ट्र + अण् (अपत्यार्थे)। धृतराष्ट्रस्य अपत्यानि पुमांसः।

भावस्पष्टीकरणम् -

न विद्मः।	
किं न विद्मः ?	**एतत्** न विद्मः।
किम् एतत् न विद्मः ?	**यद्वा जयेम यदि वा नो जयेयुः (अनयोः) कतरत् गरीयः** (इति) एतत् न विद्मः।
यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् **केषां** गरीयः इति एतत् न विद्मः ?	यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् **नः** गरीयः इति एतत् न विद्मः।
कुतः यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् नः गरीयः इति एतत् न विद्मः ?	(यतः) **अवस्थिताः** (तस्मात्) यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् नः गरीयः इति एतत् न विद्मः।
के अवस्थिताः यस्मात् यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् नः गरीयः इति एतत् न विद्मः ?	**धार्तराष्ट्राः** अवस्थिताः तस्मात् यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् नः गरीयः इति एतत् न विद्मः।
कीदृशाः धार्तराष्ट्राः अवस्थिताः यस्मात् यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् नः गरीयः इति एतत् न विद्मः ?	**यानेव हत्वा न जिजीविषामः ते** धार्तराष्ट्राः अवस्थिताः यस्मात् यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् नः गरीयः इति एतत् न विद्मः।
यानेव हत्वा न जिजीविषामः ते धार्तराष्ट्राः **कुत्र** अवस्थिताः यस्मात् यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् नः गरीयः इति एतत् न विद्मः ?	यानेव हत्वा न जिजीविषामः ते धार्तराष्ट्राः **प्रमुखे** अवस्थिताः यस्मात् यद्वा जयेम यदि वा नो जयेयुः अनयोः कतरत् नः गरीयः इति एतत् न विद्मः।

तात्पर्यम् - यान् हत्वा वयं जीवितुं न इच्छामः ते दुर्योधनादयः सम्मुखे उपस्थिताः सन्ति। युद्धे कस्यचित् हननं कस्यचित् च जीवनम् इत्येतत् अवश्यम्भावि। तस्मात् यदि वयं जीवनम् इच्छामः तर्हि अवश्यं तेषां मरणं काङ्क्षणीयम्। अथ वयं मरणम् इच्छामः ते कामं जीवन्ति। किन्तु समरे किं भवेत् ? वयं जयेम अथवा ते अस्मान् जयेयुः इति वयं न जानीमः। जयपराजयाभ्यां किं योग्यम् (गरीयः) इत्यपि अस्माकं ज्ञानं नास्ति।

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ।।२.७।।

पदच्छेदः - कार्पण्यदोषोपहतस्वभावः, पृच्छामि, त्वां, धर्मसम्मूढचेताः ।
यत्, श्रेयः, स्यात्, निश्चितम्, ब्रूहि, तत्, मे, शिष्यः, ते, अहम्, शाधि, माम्, त्वाम्, प्रपन्नम् ॥

अन्वयः - कार्पण्यदोषोपहतस्वभावः धर्मसम्मूढचेताः त्वां पृच्छामि - यत् निश्चितं श्रेयः स्यात् तत् मे ब्रूहि । अहं ते शिष्यः । त्वां प्रपन्नं मां शाधि ।

पदार्थः - कार्पण्यदोषोपहतस्वभावः = कृपणतायाः दोषेण नष्टस्वभावः, पृच्छामि = प्रश्नं करोमि, त्वाम् = भवन्तम्, धर्मसम्मूढचेताः = धर्मसम्मूढमनस्कः (अर्जुनः), यत् निश्चितं श्रेयः = यत् निश्चयेन उपकारकम्, स्यात् = भवेत्, तत् ब्रूहि = तत् वद, अहं ते शिष्यः = अहं तव शिष्यः, त्वां प्रपन्नम् = त्वाम् उपगतम्, मां शाधि = माम् उपदिश ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कार्पण्यदोषो-पहतस्वभावः	अ. पुं. प्र. एक. (विशेषणम्)	धर्मसम्मू-ढचेताः	धर्मसम्मूढचेताः - स. पुं. प्र. एक.
त्वाम्	युष्मद् - द. सर्व. द्वि. एक.	पृच्छामि	प्रच्छ् (प्रच्छ ज्ञीप्सायाम्) पर. कर्तरि लट्. उपु. एक.
यत्	यद् - द. सर्व. नपुं. प्र. एक.	निश्चितम्	अ. नपुं. प्र. एक.
श्रेयः	श्रेयस् - सका. नपुं. प्र. एक.	स्यात्	अस् (अस भुवि) पर. कर्तरि विधिलिङ्. प्रपु. एक.
तत्	तद् - द. सर्व. नपुं. प्र.एक.	मे	अस्मद् - द. सर्व. ष. एक.
ब्रूहि	ब्रू (ब्रूञ् व्यक्तायां वाचि) कर्तरि लोट् मपु. एक.	अहम्	अस्मद् - द. सर्व. प्र. एक.
ते	युष्मद् - द. सर्व. ष. एक.	शिष्यः	अ. पुं. प्र. एक.
त्वाम्	युष्मद् - द. सर्व. द्वि. एक.	प्रपन्नम्	अ. पुं. द्वि. एक. (विशेषणम्)
माम्	अस्मद् - द. सर्व. द्वि. एक. (विशेष्यम्)	शाधि	शास् (शासु अनुशिष्टौ) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः यच्छ्रेयः — यत् + श्रेयः — श्चुत्वम्, छत्वसन्धिः ।

स्यान्निश्चितम् — स्यात् + निश्चितम् — अनुनासिकसन्धिः ।

तन्मे — तत् + मे — अनुनासिकसन्धिः ।

शिष्यस्ते — शिष्यः + ते — विसर्गसन्धिः (सकारः) ।

तेऽहम् — ते + अहम् — पूर्वरूपसन्धिः ।

(ख) समासः कार्पण्यदोषोपहतस्वभावः — कार्पण्यं दोषः कार्पण्यदोषः - कर्मधारयः ।

कार्पण्यदोषेण उपहतः कार्पण्यदोषोपहतः - तृतीयातत्पुरुषः ।

कार्पण्यदोषोपहतः स्वभावः यस्य सः - बहुव्रीहिः ।

धर्मसम्मूढचेताः — धर्मेण सम्मूढं धर्मसम्मूढम् - तृतीयातत्पुरुषः ।

धर्मसम्मूढं चेतः यस्य सः धर्मसम्मूढचेताः - बहुव्रीहिः ।

(ग) कृदन्तः दोषः — दुष् (दुष वैकृत्ये) + घञ् (भावार्थे) ।

उपहतः — उप + हन् (हन हिंसागत्योः) + क्त (कर्मणि) ।

सम्मूढः — सम् + मुह् (मुह वैचित्ये) + क्त (कर्मणि) ।

निश्चितम् — निस् + चि (चिञ् चयने) + क्त (कर्मणि) ।

शिष्यः — शास् (शासु अनुशिष्टौ) + क्यप् (कर्मणि) । शासनीयः इत्यर्थः ।

प्रपन्नम् — प्र + पद् (पद गतौ) + क्त (कर्तरि) ।

(घ) तद्धितान्तः कार्पण्यम् — कृपण + ष्यञ् (भावार्थे) ।

भावस्पष्टीकरणम् -

पृच्छामि ।	
कीदृशः अहं पृच्छामि ?	**कार्पण्यदोषोपहतस्वभावः** अहं पृच्छामि ।
कार्पण्यदोषोपहतस्वभावः **पुनश्च कीदृशः** अहं पृच्छामि ?	कार्पण्यदोषोपहतस्वभावः **धर्मसम्मूढचेताः** अहं पृच्छामि ।
धर्मसम्मूढचेताः कार्पण्यदोषोपहतस्वभावः अहं **कं** पृच्छामि ?	धर्मसम्मूढचेताः कार्पण्यदोषोपहतस्वभावः अहं **त्वां** पृच्छामि ।
धर्मसम्मूढचेताः कार्पण्यदोषोपहतस्वभावः अहं त्वां पृच्छामि (तस्मात्) **किं ब्रूहि** ?	धर्मसम्मूढचेताः कार्पण्यदोषोपहतस्वभावः अहं त्वां पृच्छामि तस्मात् **तत् ब्रूहि ।**
धर्मसम्मूढचेताः कार्पण्यदोषोपहतस्वभावः अहं त्वां पृच्छामि तस्मात् **कीदृशं** तत् ब्रूहि ?	धर्मसम्मूढचेताः कार्पण्यदोषोपहतस्वभावः अहं त्वां पृच्छामि तस्मात् **यत् निश्चितं श्रेयः** तत् ब्रूहि ।

शिष्यः ।	
कः शिष्यः ?	**अहं** शिष्यः ।
अहं **कस्य** शिष्यः ?	अहं **ते** शिष्यः ।
अहं ते शिष्यः । **तेन किम्** ?	अहं ते शिष्यः । **शाधि ।**
कं शाधि ?	**मां** शाधि ।
कीदृशं मां शाधि ?	**प्रपन्नं** मां शाधि ।
कं प्रपन्नं मां शाधि ?	**त्वां** प्रपन्नं मां शाधि ।

तात्पर्यम् - एते सर्वे मदीयाः । तस्मात् एतेषां न किञ्चिदपि हानिः भवेत् कृपणतायाः दोषेण इदानीं मम विचारशक्तिः नष्टा अस्ति । धर्मविषये मम चेतः सम्मूढम् अस्ति । अतः पृच्छामि - इदानीं मम यत् निश्चयेन श्रेयः तत् त्वं वद । अहं त्वां शरणं गतः अस्मि । माम् उपदिश ।

नहि प्रपश्यामि ममापनुद्याद् यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यम् ॥२.८॥

पदच्छेदः - न, हि, प्रपश्यामि, मम, अपनुद्यात्, यत्, शोकम्, उच्छोषणम्, इन्द्रियाणाम् ।
अवाप्य, भूमौ, असपत्नम्, ऋद्धम्, राज्यम्, सुराणाम्, अपि, च, आधिपत्यम् ॥

अन्वयः - भूमौ असपत्नम् ऋद्धं महत् राज्यं सुराणाम् आधिपत्यं च अवाप्य अपि (स्थितस्य) मम यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) न हि पश्यामि ।

पदार्थः - भूमौ = पृथिव्याम्, असपत्नम् = शत्रुरहितम्, ऋद्धम् = धनधान्यादिभिः समृद्धम्, राज्यम् = साम्राज्यम्, सुराणाम् = देवानाम्, आधिपत्यम् च = स्वामित्वम्, अवाप्य अपि = प्राप्य अपि, इन्द्रियाणाम् = इन्द्रियाणाम्, उच्छोषणम् = शोषणम्, शोकम् = दुःखम्, यत् अपनुद्यात् = यत् दूरीकुर्यात्, नहि पश्यामि = विशेषतः न पश्यामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भूमौ	इ. स्त्री. स. एक.	असपत्नम्	अ. नपुं. द्वि. एक. (विशेषणम्)
ऋद्धम्	अ. नपुं.द्वि. एक. (विशेषणम्)	राज्यम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
सुराणाम्	अ. पुं. ष. बहु.	आधिपत्यम्	अ. नपुं. द्वि. एक.
च	अव्ययम्	अवाप्य	ल्यबन्तम् अव्ययम्

अपि	अव्ययम्	मम	अस्मद् - द.सर्व. ष. एक.
यत्	यद् - द. सर्व. नपुं. प्र. एक.	इन्द्रियाणाम्	अ. नपुं. ष. बहु.
उच्छोषणम्	अ. पुं. द्वि. एक. (विशेषणम्)	शोकम्	अ. पुं. द्वि. एक. (विशेष्यम्)
अपनुद्यात्	अप + नुद् (णुद प्रेरणे) पर. विधिलिङ्. प्रपु. एक.	न	निषेधार्थकम् अव्ययम्
हि	अव्ययम्	प्रपश्यामि	प्र + पश्य (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः ममापनुद्यात् — मम + अपनुद्यात् — सवर्णदीर्घसन्धिः ।
यच्छोकम् — यत् + शोकम् — श्चुत्वसन्धिः, छत्वसन्धिः ।
भूमावसपत्नम् — भूमौ + असपत्नम् — यान्तावान्तादेशसन्धिः ।
चाधिपत्यम् — च + आधिपत्यम् — सवर्णदीर्घसन्धिः ।

(ख) समासः असपत्नम् — न विद्यते सपत्नः यस्य तत् - नञ्बहुव्रीहिः ।

(ग) कृदन्तः शोकम् — शुच् (शुच शोके) + घञ् ।
ऋद्धम् — ऋध् (ऋध वृद्धौ) + क्त (कर्मणि) ।
उच्छोषणम् — उत् + शुष् (शुष शोषणे) + ल्यु (कर्तरि) ।
अवाप्य — अव + आप् (आप्लृ व्याप्तौ) + ल्यप् ।

(घ) तद्धितान्तः राज्यम् — राजन् + यत् (कर्मार्थे भवार्थे वा) । राज्ञः कर्म भावः वा इत्यर्थः ।
आधिपत्यम् — अधिपति + ष्यञ् (भावे) अधिपतित्वम् इत्यर्थः ।

भावस्पष्टीकरणम् -

नहि प्रपश्यामि ।	
किं नहि प्रपश्यामि ?	**(तत् कर्म)** नहि प्रपश्यामि ।
कीदृशं (तत् कर्म) नहि प्रपश्यामि ?	**यद् अपनुद्यात्** (तत् कर्म) नहि प्रपश्यामि ।
तत् **किम्** अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ?	**यत् शोकम्** अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ।
तत् **कीदृशं** शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ?	यत् **उच्छोषणं** शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ।
तत् **केषाम्** उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ?	यत् **इन्द्रियाणाम्** उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ।

किं कृत्वापि स्थितस्य तत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ?'	**अवाप्य अपि स्थितस्य** यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि।
अवाप्य अपि स्थितस्य **कस्य** यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि।	अवाप्य अपि स्थितस्य **मम** यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ?
किं किम् अवाप्य अपि स्थितस्य मम यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ?	**राज्यम् आधिपत्यं च** अवाप्य अपि स्थितस्य मम यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि।
कीदृशं राज्यम्, **केषाम्** आधिपत्यं च अवाप्य अपि मम यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ?	**असपत्नं** राज्यं **सुराणाम्** आधिपत्यं च अवाप्य अपि मम यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि।
पुनश्च कीदृशम् असपत्नं राज्यं सुराणां चाधिपत्यं च अवाप्य अपि मम यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ?	**ऋद्धम्** असपत्नं राज्यं सुराणां चाधिपत्यं च अवाप्य अपि मम यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि।
कुत्र ऋद्धम् असपत्नं राज्यं सुराणां चाधिपत्यं च अवाप्य अपि मम यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि ?	**भूमौ** ऋद्धम् असपत्नं राज्यं सुराणां चाधिपत्यं च अवाप्य अपि मम यत् इन्द्रियाणाम् उच्छोषणं शोकम् अपनुद्यात् (तत् कर्म) नहि प्रपश्यामि।

तात्पर्यम् - मया अस्यां भूमौ शत्रुरहितं समृद्धं राज्यं प्राप्येत, देवानाम् आधिपत्यं च लभ्येत, तथापि गुरुबान्धवादीनां हननस्य भावनया समुत्पन्नः यः मम इन्द्रियाणाम् उच्छोषकः शोकः अस्ति तस्य निराकरणस्य उपायम् अहं न पश्यामि। (अतः युद्धं कर्तुं न इच्छामि।)

सञ्जय उवाच - **एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तप।**
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह॥२.९॥

पदच्छेदः -

सञ्जय, उवाच - एवम्, उक्त्वा, हृषीकेशम्, गुडाकेशः, परन्तप।
न, योत्स्ये, इति, गोविन्दम्, उक्त्वा, तूष्णीम्, बभूव, ह॥

अन्वयः - परन्तप ! हृषीकेशम् एवम् उक्त्वा गुडाकेशः 'न योत्स्ये' इति गोविन्दम् उक्त्वा तूष्णीं बभूव ह।

पदार्थः - परन्तप = हे धृतराष्ट्र, हृषीकेशम् = श्रीकृष्णम्, एवम् = अनेन प्रकारेण, उक्त्वा = कथयित्वा, गुडाकेशः = अर्जुनः, न योत्स्ये = युद्धं न करिष्यामि इति, गोविन्दम् = श्रीकृष्णम्, उक्त्वा = कथयित्वा, तूष्णीम् = मौनी, बभूव ह = अभवत् किल।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
परन्तप	अ. पुं. सम्बो. एक.	हृषीकेशम्	अ. पुं. द्वि. एक.
एवम्	अव्ययम्	उक्त्वा	क्त्वान्तम् अव्ययम्
गुडाकेशः	अ. पुं. प्र. एक.	न	अव्ययम्
योत्स्ये	युध् (युध सम्प्रहारे) आत्म. कर्तरि लृट्. उपु. एक.	इति	अव्ययम्
गोविन्दम्	अ. पुं. द्वि. एक.	तूष्णीम्	अव्ययम्
बभूव	भू (भू सत्तायाम्) पर. कर्तरि लिट्. प्रपु. एक.	ह	अव्ययम्

व्याकरणम् -

(क) सन्धिः योत्स्य इति — योत्स्ये + इति यान्तवान्तादेशसन्धिः, यलोपः प्रकृतिभावश्च ।

(ख) समासः हृषीकेशम् — हृषीकाणाम् ईशः हृषीकेशः, तम् - षष्ठीतत्पुरुषः ।

गुडाकेशः — गुडाकायाः निद्रायाः ईशः गुडाकेशः - षष्ठीतत्पुरुषः ।

परन्तप — परान् तापयति इति परन्तपः, कर्तरि खच् उपपदसमासः तत्सम्बुद्धौ ।

(ग) कृदन्तः उक्त्वा — वच् (वच परिभाषणे) + क्त्वा ।

गोविन्दम् — गो + विन्द (विद्लृ लाभे) + श + (कर्तरि) । गाः विन्दति इति गोविन्दः,तम् । धेनूः प्राप्नोति इत्यर्थः ।

भावस्पष्टीकरणम् -

बभूव ।	
कः बभूव ?	**गुडाकेशः** बभूव ।
गुडाकेशः **कथं** बभूव ?	गुडाकेशः **तूष्णीं** बभूव ।
किं कृत्वा गुडाकेशः तूष्णीं बभूव ?	**उक्त्वा** गुडाकेशः तूष्णीं बभूव ।
किम् उक्त्वा गुडाकेशः तूष्णीं बभूव ?	**एवम्** उक्त्वा गुडाकेशः तूष्णीं बभूव ।
कम् एवम् उक्त्वा गुडाकेशः तूष्णीं बभूव ?	**हृषीकेशम्** एवम् उक्त्वा गुडाकेशः तूष्णीं बभूव ।
हृषीकेशम् एवम् उक्त्वा गुडाकेशः **किं कृत्वा** तूष्णीं बभूव ?	हृषीकेशम् एवम् उक्त्वा गुडाकेशः **उक्त्वा** तूष्णीं बभूव ।

हृषीकेशम् एवम् उक्त्वा गुडाकेशः **किमिति** उक्त्वा तूष्णीं बभूव ?	हृषीकेशम् एवम् उक्त्वा गुडाकेशः **'न योत्स्ये'** इति उक्त्वा तूष्णीं बभूव।
हृषीकेशम् एवम् उक्त्वा गुडाकेशः 'न योत्स्ये' इति **कम्** उक्त्वा तूष्णीं बभूव ?	हृषीकेशम् एवम् उक्त्वा गुडाकेशः 'न योत्स्ये' इति **गोविन्दम्** उक्त्वा तूष्णीं बभूव।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**परन्तप !**

तात्पर्यम् - अर्जुनः अनेन प्रकारेण कृष्णम् उक्त्वा अहं युद्धं न करिष्यामि इति स्वाशयं च निवेद्य तूष्णीम् अभवत् इति सञ्जयः धृतराष्ट्रम् अवदत्।

तमुवाच हृषीकेशः प्रहसन्निव भारत।
सेनयोरुभयोर्मध्ये विषीदन्तमिदं वचः ॥२.१०॥

पदच्छेदः - तम्, उवाच, हृषीकेशः, प्रहसन्, इव, भारत।
सेनयोः, उभयोः, मध्ये, विषीदन्तम्, इदम्, वचः ॥

अन्वयः - भारत ! हृषीकेशः प्रहसन् इव उभयोः सेनयोः मध्ये विषीदन्तं तम् इदं वचः उवाच।

पदार्थः - भारत = हे भरतकुलोद्भव धृतराष्ट्र ! हृषीकेशः = श्रीकृष्णः, प्रहसन् इव = हासं कुर्वन् इव, उभयोः = द्वयोः, सेनयोः मध्ये = सैन्ययोः मध्ये, विषीदन्तम् = दुःखम् अनुभवन्तम्, तम् = अर्जुनम्, इदं वचः = एतत् वचनम्, उवाच = उक्तवान्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	हृषीकेशः	अ. पुं. प्र. एक. (विशेष्यम्)
प्रहसन्	प्रहसत् - त. पुं. प्र. एक. (विशेषणम्)	इव	अव्ययम्
उभयोः	उभ- सर्व. आ.स्त्री. ष. द्विव. (विशेषणम्)	सेनयोः	आ. स्त्री. ष. द्विव. (विशेष्यम्)
मध्ये	अव्ययम्	विषीदन्तम्	विषीदत् - त. पुं. द्वि. एक. (विशेषणम्)
तम्	तद् - द्. सर्व. पुं. द्वि. एक. (विशेषणम्)	इदम्	इदम् - म. सर्व. नपुं. द्वि. एक. (विशेषणम्)
वचः	वचस् - सका. नपुं. द्वि. एक.	उवाच	वच् (वच परिभाषणे) पर. कर्तरि लिट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	प्रहसन्निव	प्रहसन् + इव	ङमुडागमसन्धिः ।
	सेनयोरुभयोर्मध्ये	सेनयोः + उभयोः + मध्ये	विसर्गसन्धिः (रेफः)
(ख) समासः	हृषीकेशः	हृषीकाणाम् ईशः हृषीकेशः - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	प्रहसन्	प्र + हस् (हसे हसने) + शतृ ।	
	विषीदन्तम्	वि + सीद् (षदॢ गत्यवसादनेषु) + शतृ, तम् ।	
(घ) तद्धितान्तः	भारत	भरत + अण् (अपत्यार्थे) भरतस्य अपत्यं पुमान्, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

उवाच ।	
कः उवाच ?	**हृषीकेशः** उवाच ।
हृषीकेशः **किं कुर्वन् इव** उवाच ?	हृषीकेशः **प्रहसन् इव** उवाच ।
हृषीकेशः प्रहसन्निव **कम्** उवाच ?	हृषीकेशः प्रहसन् इव **तम्** उवाच ।
हृषीकेशः प्रहसन्निव **किं कुर्वन्तं** तम् उवाच ?	हृषीकेशः प्रहसन्निव मध्ये **विषीदन्तं** तम् उवाच ।
हृषीकेशः प्रहसन्निव **कयोः** मध्ये विषीदन्तं तम् उवाच ?	हृषीकेशः प्रहसन्निव **सेनयोः** मध्ये विषीदन्तं तम् उवाच ।
हृषीकेशः प्रहसन्निव **कयोः** सेनयोः मध्ये विषीदन्तं तम् उवाच ?	हृषीकेशः प्रहसन्निव **उभयोः** सेनयोः मध्ये विषीदन्तं तम् उवाच ।
हृषीकेशः प्रहसन्निव उभयोः सेनयोः मध्ये विषीदन्तं तं **किम्** उवाच ?	हृषीकेशः प्रहसन्निव उभयोः सेनयोः मध्ये विषीदन्तं तं **वचः** उवाच ।
हृषीकेशः प्रहसन्निव उभयोः सेनयोः मध्ये विषीदन्तं तं **किं** वचः उवाच ?	हृषीकेशः प्रहसन् इव उभयोः सेनयोः मध्ये विषीदन्तं तम् **इदं** वचः उवाच ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - हे धृतराष्ट्र ! अनेन प्रकारेण अर्जुनः सैन्ययोः मध्ये दुःखम् अनुभवन् अतिष्ठत् । तदा भगवान् श्रीकृष्णः तम् उद्दिश्य प्रहसन् इव एतत् वचनम् अवदत् ।

श्रीभगवानुवाच - **अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।**
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ॥२.११॥

पदच्छेदः -

श्रीभगवान्, उवाच - अशोच्यान्, अन्वशोचः, त्वम्, प्रज्ञावादान्, च, भाषसे।
गतासून्, अगतासून्, च, न, अनुशोचन्ति, पण्डिताः ॥

अन्वयः - त्वम्, अशोच्यान्, अन्वशोचः। प्रज्ञावादान् च भाषसे। पण्डिताः गतासून् अगतासून् च न अनुशोचन्ति।

पदार्थः - त्वम् = त्वम्, अशोच्यान् = येषु शोकः न करणीयः तान्, अन्वशोचः = शोकं करोषि, प्रज्ञावादान् = बुद्धियुक्तानि वचनानि च, भाषसे = वदसि, पण्डिताः = विवेकिनः, गतासून् = मृतान्, अगतासून् = जीवितान् च, न अनुशोचन्ति = शोकं न कुर्वन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
त्वम्	युष्मद् - द. सर्व. प्र. एक.	अशोच्यान्	अ. पुं. द्वि. बहु.
अन्वशोचः	अनु+ शुच् (शुच् शोके) पर. कर्तरि लुङ्. मपु. एक.	प्रज्ञावादान्	अ. पुं. द्वि. बहु.
भाषसे	भाष् आ (भाष व्यक्तायां वाचि) आत्म. कर्तरि लट्. मपु. एक.	पण्डिताः	अ. पुं. प्र. बहु.
गतासून्	उ. पुं. द्वि. बहु. (विशेषणम्)	मृतान्	अ. पुं. द्वि. बहु.
अगतासून्	उ. पुं. द्वि. बहु. (विशेषणम्)	न	अव्ययम्
पण्डिताः	अ. पुं. प्र. बहु.	अनुशोचन्ति	अनु+ शुच् (शुच शोके) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः अन्वशोचस्त्वम् — अन्वशोचः + त्वम् — विसर्गसन्धिः (सकारः)।
प्रज्ञावादांश्च — प्रज्ञावादान् + च — सत्वसन्धिः, रुत्वम्, अनुस्वारागमः, विसर्गः, सत्वम्, श्चुत्वम्।
गतासूंश्च — गतासून् + च — सत्वसन्धिः, रुत्वम्, अनुस्वारागमः, विसर्गः, सत्वम्, श्चुत्वम्।
नानुशोचन्ति — न + अनुशोचन्ति — सवर्णदीर्घसन्धिः।

(ख) समासः अशोच्यान् — न शोच्याः अशोच्याः, तान् - नञ्तत्पुरुषः।

प्रज्ञावादान्	प्रज्ञापूर्वकाः वादाः प्रज्ञावादाः, तान् - मध्यमपदलोपी तत्पुरुषः ।
गतासून्	गताः असवः येभ्यः ते गतासवः, तान् - बहुव्रीहिः ।
अगतासून्	गताः असवः येभ्यः ते गतासवः - बहुव्रीहिः । न गतासवः अगतासवः तान् - नञ्तत्पुरुषः ।

(ग) कृदन्तः शोच्यान् — शुच् (शुच शोके) + ण्यत् (कर्मणि), तान् ।

भावस्पष्टीकरणम् -

त्वम् अन्वशोचः।	
त्वं **कान्** अन्वशोचः ?	त्वं **अशोच्यान्** अन्वशोचः ।
त्वं अशोच्यान् अन्वशोचः । **पुनश्च किं करोषि** ?	त्वं अशोच्यान् अन्वशोचः । त्वं **भाषसे ।**
त्वं अशोच्यान् अन्वशोचः । त्वं **कान्** भाषसे ?	त्वं अशोच्यान् अन्वशोचः । त्वं **प्रज्ञावादान्** च भाषसे ।
अनुशोचन्ति ।	
के न अनुशोचन्ति ?	**पण्डिताः** न अनुशोचन्ति ।
पण्डिताः **कान्** न अनुशोचन्ति ?	पण्डिताः **गतासून्** न अनुशोचन्ति ।
पण्डिताः गतासून् **पुनश्च कान्** न अनुशोचन्ति ?	पण्डिताः **गतासून् अगतासून् च** न अनुशोचन्ति ।

तात्पर्यम् - हे अर्जुन ! येषु शोकः न करणीयः तेषु (विषयेषु) त्वं शोकं करोषि । बुद्धियुक्तानि वचनानि च भाषसे। वस्तुतः विवेकिनः मृतानां जीवितानां च विषये शोकं न कुर्वन्ति ।

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः ।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥२.१२॥

पदच्छेदः - न, तु, एव, अहम्, जातु, न, आसम्, न, त्वम्, न, इमे, जनाधिपाः ।
न, च, एव, न, भविष्यामः, सर्वे, वयम्, अतः, परम् ॥

अन्वयः - अहं जातु न आसम्, न तु एव त्वम् (आसीः), न इमे जनाधिपाः आसन्, न अतः परं वयं सर्वे न च एव भविष्यामः ।

पदार्थः - अहम् = अहम्, जातु = कदाचिद् अपि, न तु एव न आसम् = अवश्यम् आसम्, त्वं न तु एव न आसीः = त्वम् अपि अवश्यम् आसीः, इमे = एते, जनाधिपाः = राजानः, न तु एव नासन् = अवश्यम् आसन्, अतः परम् = इतः अग्रे, सर्वे वयम् = वयं समस्ताः, न च एव न भविष्यामः = अवश्यं भविष्यामः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहं	अस्मद् - द. सर्व. प्र. एक.	जातु	अव्ययम्
न	अव्ययम्	आसम्	अस् (अस भुवि) पर. कर्तरि लङ्. उपु. एक.
तु	अव्ययम्	एव	अव्ययम्
त्वम्	युष्मद् - द. सर्व. प्र. एक.	इमे	इदम् - म. सर्व. प्र. बहु. (विशेषणम्)
जनाधिपाः	अ. पुं. प्र. बहु. (विशेष्यम्)	आसन्	अस् (अस भुवि) पर. कर्तरि लङ्. प्रपु. बहु.
अतः	अव्ययम्	परम्	अव्ययम्
वयम्	अस्मद् - द. सर्व. प्र. बहु. (विशेष्यम्)	सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
च	अव्ययम्	भविष्यामः	भू (भू सत्तायाम्) कर्तरि लृट्. उपु. बहु.

व्याकरणम् -

(क) सन्धिः	त्वेवाहम्	तु + एव	यण्सन्धिः ।
	एवाहम्	एव + अहम्	सवर्णदीर्घसन्धिः ।
	नासम्	न + आसम्	सवर्णदीर्घसन्धिः ।
	नेमे	न + इमे	गुणसन्धिः ।
	चैव	च + एव	वृद्धिसन्धिः ।
(ख) समासः	जनाधिपाः	जनानाम् अधिपाः जनाधिपाः - षष्ठीतत्पुरुषः ।	

भावस्पष्टीकरणम् -

अहम् आसम् ।	
अहं **कथम्** आसम् ?	अहं **जातु न तु एव न आसम् ।**
त्वं **कथम् (आसीः)** ?	त्वं **जातु न तु एव न आसीः ।**
जनाधिपाः **कथम् (आसन्)** ?	जनाधिपाः **न तु एव न (आसन्) ।**
के जनाधिपाः न तु एव न आसम् ?	**इमे** न तु एव न आसन् ।
वयं न चैव न भविष्यामः ।	
कति वयं न चैव न भविष्यामः ?	**सर्वे** वयं न चैव न भविष्यामः ।
कदा सर्वे वयं न चैव न भविष्यामः ?	**अतः परं** सर्वे वयं न चैव न भविष्यामः ।

तात्पर्यम् - अहं सर्वदा आसम्। त्वं सर्वदा आसीः। एते राजानः अपि सर्वदा आसन्। इतः परमपि वयं सर्वे सर्वदा भविष्यामः। आत्मा शाश्वतः इत्यतः वयं सर्वे सर्वदा अवश्यं भविष्यामः इति अभिप्रायः।

देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिः धीरस्तत्र न मुह्यति॥२.१३॥

पदच्छेदः - देहिनः, अस्मिन्, यथा, देहे, कौमारम्, यौवनम्,जरा।
तथा, देहान्तरप्राप्तिः, धीरः, तत्र, न, मुह्यति॥

अन्वयः - देहिनः अस्मिन् देहे यथा कौमारं यौवनं जरा (च) तथा देहान्तरप्राप्तिः! तत्र धीरः न मुह्यति।

पदार्थः - देहिनः = शरीरधारिणः (पुरुषस्य), अस्मिन् = एतस्मिन्, देहे = शरीरे, यथा = येन प्रकारेण, कौमारम् = बाल्यावस्था, यौवनम् = तारुण्यावस्था, जरा = वृद्धत्वम्, तथा तेन प्रकारेण, देहान्तरप्राप्तिः = अन्यशरीरस्य प्राप्तिः, तत्र = तस्मिन् विषये, धीरः = धैर्यवान् पुरुषः, न मुह्यति = मुग्धः न भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
देहिनः	देहिन् - न. पुं. ष. एक.	अस्मिन्	इदम् - म. सर्व. स. एक. (विशेषणम्)
देहे	अ. पुं. स. एक. (विशेष्यम्)	यथा	अव्ययम्
कौमारम्	अ. नपुं. प्र. एक.	यौवनम्	अ. नपुं. प्र. एक.
जरा	आ. स्त्री. प्र. एक.	तथा	अव्ययम्
देहान्तरप्राप्तिः	इ. स्त्री. प्र. एक.	तत्र	अव्ययम्
धीरः	अ पुं. प्र. एक.	न	अव्ययम्
मुह्यति	मुह् (मुह वैचित्ये) लट्. प्र. पु. एक.		

व्याकरणम् -

(क) सन्धिः देहिनोऽस्मिन् — देहिनः + अस्मिन् — विसर्गसन्धिः (सकारः) रेफः, उकारः गुणः पूर्वरूपमसन्धिः।

देहान्तरप्राप्तिर्धीरः — देहान्तरप्राप्तिः + धीरः — विसर्गसन्धिः (सकारः) रेफः।

देहान्तरप्राप्तिर्धीरः + तत्र — विसर्गसन्धिः(सकारः)।

(ख) समासः देहान्तरप्राप्तिः — अन्यः देहः देहान्तरम् - कर्मधारयः।

देहान्तरस्य प्राप्तिःदेहान्तरप्राप्तिः - षष्ठीतत्पुरुषः।

(ग) कृदन्तः प्राप्तिः — प्र + आप् (आप्लृ व्याप्तौ) + क्तिन्।

(घ) तद्धितान्तः देहिनः — देह + इनि (मतुबर्थे) तस्य। देहः अस्य अस्मिन् वा अस्ति इति।
कौमारम् — कुमार + अण् (भावे)। कुमारस्य भावः इत्यर्थः।
यौवनम् — युवन् + अण् (भावे)। यूनः भावः इत्यर्थः।

भावस्पष्टीकरणम् -

कौमारम्।	
कौमारं **पुनश्च किम्** ?	कौमारं **यौवनं च।**
कौमारं यौवनं **पुनश्च का** ?	कौमारं यौवनं **जरा च।**
कुत्र कौमारं यौवनं जरा च ?	**देहे** कौमारं यौवनं जरा च।
कस्मिन् देहे कौमारं यौवनं जरा च ?	**अस्मिन्** देहे कौमारं यौवनं जरा च।
कस्य अस्मिन् देहे कौमारं यौवनं जरा च ?	**देहिनः** अस्मिन् देहे कौमारं यौवनं जरा च।
देहिनः अस्मिन् देहे कौमारं यौवनं जरा च तथा **का** ?	देहिनः अस्मिन् देहे कौमारं यौवनं जरा च तथा **देहान्तरप्राप्तिः।**
देहिनः अस्मिन् देहे कौमारं यौवनं जरा च तथा देहान्तरप्राप्तिः। **तेन किम्** ?	देहिनः अस्मिन् देहे कौमारं यौवनं जरा च तथा देहान्तरप्राप्तिः। **न मुह्यति।**
देहिनः अस्मिन् देहे कौमारं यौवनं जरा च तथा देहान्तरप्राप्तिः। **कः** न मुह्यति ?	देहिनः अस्मिन् देहे कौमारं यौवनं जरा च तथा देहान्तरप्राप्तिः। **धीरः** न मुह्यति।
देहिनः अस्मिन् देहे कौमारं यौवनं जरा च तथा देहान्तरप्राप्तिः। धीरः **कुत्र** न मुह्यति ?	देहिनः अस्मिन् देहे कौमारं यौवनं जरा च तथा देहान्तरप्राप्तिः। धीरः **तत्र** न मुह्यति।

तात्पर्यम् - जीवात्मनः अस्मिन् देहे शैशवावस्थातः कौमारावस्था, ततः कौमारावस्थातः यौवनावस्था भवति, ततश्च जरावस्था भवति तत्र अवस्थापरिवर्तनस्य यथा किमपि भानं न भवति तथैव देहान्तरस्य परिवर्तने विवेकी मोहं न गच्छति।

मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ॥२.१४॥

पदच्छेदः - मात्रास्पर्शाः, तु, कौन्तेय, शीतोष्णसुखदुःखदाः।
आगमापायिनः, अनित्याः, तान्, तितिक्षस्व, भारत ॥

अन्वयः - कौन्तेय ! मात्रास्पर्शाः तु शीतोष्णसुखदुःखदाः आगमापायिनः अनित्याः। भारत ! तान् तितिक्षस्व।

पदार्थः - कौन्तेय = हे कुन्तीपुत्र ! मात्रास्पर्शाः तु = सांसारिकविषयाणां संयोगः तु, शीतोष्णसुखदुःखदाः = शीतम् उष्णं सुखं दुःखं ये ददति ते, आगमापायिनः = उत्पत्तिविनाशशीलाः, अनित्याः = न नित्याः, भारत = हे भरतकुलोद्भव ! तान् तितिक्षस्व = तान् सहस्व ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	मात्रास्पर्शाः	अ. पुं. प्र. बहु. (विशेषणम्)
तु	अव्ययम्	शीतोष्ण-सुखदुःखदाः	अ. पुं. प्र. बहु. (विशेषणम्)
आगमापायिनः	आगमापायिन् - न. पुं. प्र. बहु. (विशेषणम्)	अनित्याः	अ. पुं. प्र. बहु. (विशेषणम्)
भारत	अ. पुं. सम्बो. एक.	तान्	तद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)
तितिक्षस्व	तिज् (तिज निशाने) + सन् (स्वार्थे) आत्म. लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः

मात्रास्पर्शास्तु	मात्रास्पर्शाः + तु	विसर्गसन्धिः (सकारः) ।
आगमापायिनोऽनित्याः	आगमापायिनः + अनित्याः	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः पूर्वरूपं च ।
तांस्तितिक्षस्व	तान् + तितिक्षस्व	सत्वसन्धिः (रेफः, विसर्गः, अनुस्वारः, सकारश्च) ।

(ख) समासः

मात्रास्पर्शाः — मात्राणां स्पर्शाः - षष्ठीतत्पुरुषः ।

शीतोष्णसुखदुःखदाः — शीतं च उष्णं च शीतोष्णम् - द्वन्द्वः ।
सुखं च दुःखं च सुखदुःखे - द्वन्द्वः ।
शीतोष्णं सुखदुःखे च शीतोष्णसुखदुःखानि - द्वन्द्वः ।
शीतोष्णसुखदुःखानि ददति इति शीतोष्णसुखदुःखदाः - कर्तरि कः उपपदसमासश्च ।

अनित्याः — न नित्याः अनित्याः - नञ्तत्पुरुषः ।

(ग) कृदन्तः

स्पर्शाः — स्पृश् + घञ् (स्पृश् संस्पर्शने) (भावे) ।

तितिक्षस्व — तिज् + सन् (तिज निशाने) (स्वार्थे) आत्म. लोट्. मपु. एक. ।

(घ) तद्धितान्तः

भारत — भरत + अण् (अपत्यार्थे) भरतस्य अपत्यं पुमान् इत्यर्थः ।

भावस्पष्टीकरणम् -

तितिक्षस्व।	
कान् तितिक्षस्व ?	**तान् तितिक्षस्व।**
ते के ?	**ते मात्रास्पर्शाः।**
मात्रास्पर्शाः तु **कीदृशाः** ?	मात्रास्पर्शाः तु **शीतोष्णसुखदुःखदाः।**
मात्रास्पर्शाः तु शीतोष्णसुखदुःखदाः **पुनश्च कीदृशाः** ?	मात्रास्पर्शाः तु शीतोष्णसुखदुःखदाः **आगमापायिनः।**
मात्रास्पर्शाः तु शीतोष्णसुखदुःखदाः आगमापायिनः **पुनश्च कीदृशाः** ?	मात्रास्पर्शाः तु शीतोष्णसुखदुःखदाः आगमापायिनः **अनित्याः।**
अस्मिन् श्लोके सम्बोधनपदे के ?	**कौन्तेय ! भारत !**

तात्पर्यम् - यथा चन्दनस्पर्शेन शीतलभावः अग्निस्पर्शेन उष्णभावः च उत्पद्यते, तथैव सांसारिकविषयाणां संयोगकरणेन सुखं दुःखं वा जायते एव। अर्थात् सांसारिकविषयाणां संयोगाः शीतोष्णादिभावान्, सुख-दुःखादीन् च जनयन्ति। यतः तादृशाः भावाः उत्पत्तिविनाशशीलाः, अतः ते अनित्याः भवन्ति इति ज्ञातव्यम्। अतः हे भरतकुलोत्पन्न ! अर्जुन ! त्वं तेषां सहनं कुरु।

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ।
समदुःखसुखं धीरं सोऽमृतत्वाय कल्पते॥२.१५॥

पदच्छेदः - यम्, हि, न, व्यथयन्ति, एते, पुरुषम्, पुरुषर्षभ।
समदुःखसुखम्, धीरम्, सः, अमृतत्वाय, कल्पते॥

अन्वयः - पुरुषर्षभ ! एते यं समदुःखसुखं धीरं पुरुषं न व्यथयन्ति सः अमृतत्वाय, कल्पते।

पदार्थः - पुरुषर्षभ = हे पुरुषश्रेष्ठ ! एते = मात्रास्पर्शाः, यम् = यम्, समदुःखसुखम् =सुखं दुःखं च यस्य कृते समानं भवति तम्, धीरम् = धैर्यशालिनम्, पुरुषम् = जनम्, न व्यथयन्ति = न पीडयन्ति, सः =जनः, अमृतत्वाय = मोक्षाय, कल्पते = योग्यः भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पुरुषर्षभ	अ. पुं. सम्बो. एक.	एते	एतद् - द. सर्व. पुं. प्र. बहु. (विशेषणम्)
यम्	यद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	समदुःखसुखम्	अ. पुं. द्वि. एक. (विशेषणम्)

धीरम्	अ. पुं. द्वि. एक. (विशेषणम्)	पुरुषम्	अ. पुं. द्वि. एक. (विशेष्यम्)
न	अव्ययम्	व्यथयन्ति	व्यथ् (व्यथ भयसञ्चलनयोः) णिच्-पर. कर्तरि लट्. प्रपु. बहु.
सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	अमृतत्वाय	अ. नपुं. च. एक.
कल्पते	कृप् (कृपू सामर्थ्ये) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः व्यथयन्त्येते — व्यथयन्ति + एते — यण्सन्धिः ।
सोऽमृतत्वाय — सः + अमृतत्वाय — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः पुरुषर्षभः — पुरुषः ऋषभः इव - कर्मधारय ।
समदुःखसुखम् — सुखं च दुःखं च सुखदुःखे - द्वन्द्वः ।
समे सुखदुःखे यस्य सः समदुःखसुखः, तम् - बहुव्रीहिः ।

(ग) तद्धितान्तः अमृतत्वाय — अमृत + त्व (भावे), तस्मै । मोक्षाय इत्यर्थः ।

भावस्पष्टीकरणम् -

कल्पते ।	
कः कल्पते ?	**यं न व्यथयन्ति सः** कल्पते ।
यं न व्यथयन्ति सः **कस्मै** कल्पते ?	यं न व्यथयन्ति सः **अमृतत्वाय** कल्पते ।
के यं न व्यथयन्ति सः अमृतत्वाय कल्पते ?	**एते** यं न व्यथयन्ति सः अमृतत्वाय कल्पते ।
एते तं **कं** न व्यथयन्ति यः अमृतत्वाय कल्पते ?	एते यं **पुरुषं** न व्यथयन्ति सः अमृतत्वाय कल्पते ।
एते तं **कीदृशं** पुरुषं न व्यथयन्ति यः अमृतत्वाय कल्पते ?	एते तं **समदुःखसुखं** पुरुषं न व्यथयन्ति सः अमृतत्वाय कल्पते ?
एते तं समदुःखसुखं **पुनश्च कीदृशं** पुरुषं न व्यथयन्ति यः अमृतत्वाय कल्पते ?	एते तं समदुःखसुखं **धीरं** पुरुषं न व्यथयन्ति यः अमृतत्वाय कल्पते ।

तात्पर्यम् - यः जनः सुखं दुःखं च समं मन्यते तं शीतोष्णसुखदुःखकराः विषयसम्बन्धाः किञ्चिदपि न व्यथयन्ति। सोऽयं द्वन्द्वसहिष्णुः जनः मोक्षं प्राप्तुं योग्यः भवति ।

(जगति विद्यमानाः सर्वेऽपि इन्द्रियैः आस्वाद्यमानाः पदार्थाः 'विषयाः' इति उच्यन्ते । तेषां सम्बन्धेन

शीत-उष्ण-सुख-दुःखादयाः अनुभवाः प्राप्यन्ते अतः ते शीतोष्णसुखदुःखकराः भवन्ति । यः जनः सुखं दुःखं च समं मन्यते तम् एते विषयाः किञ्चिदपि न व्यथयन्ति । सः जनः मोक्षं प्राप्तुं योग्यः भवति ।)

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥२.१६॥

पदच्छेदः - न, असतः, विद्यते, भावः, न, अभावः, विद्यते, सतः ।
उभयोः, अपि, दृष्टः, अन्तः, तु, अनयोः, तत्त्वदर्शिभिः ॥

अन्वयः - असतः भावः न विद्यते, सतः अभावः न विद्यते । अनयोः उभयोः (सदसतोः) अपि अन्तः तत्त्वदर्शिभिः दृष्टः ।

पदार्थः - असतः = असत्पदार्थस्य, भावः = अस्तिता, न विद्यते = न भवति, सतः = सत्पदार्थस्य, अभावः = अस्तित्वराहित्यम्, न विद्यते = न भवति, अनयोः उभयोः= सदसतोः अपि पदार्थयोः, अन्तः= शिखरम्, तत्त्वदर्शिभिः = ब्रह्मविद्भिः, दृष्टः= वीक्षितः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
असतः	असत् - त. पुं. ष. एक. (विशेषणम्)	भावः	अ. पुं. प्र. एक.
न	अव्ययम्	विद्यते	विद् (विद सत्तायाम्) आत्म.कर्तरि लट्. प्रपु. एक.
सतः	सत् - त. पुं. ष. एक. (विशेषणम्)	अभावः	अ. पुं. प्र. एक.
अपि	अव्ययम्	अनयोः	इदम्- म. सर्व. पुं. ष. द्वि. (विशेषणम्)
उभयोः	अ. सर्व. पुं. ष. द्विव. (विशेषणम्)	तत्त्वदर्शिभिः	तत्त्वदर्शिन्- न. पुं. तृ. बहु.
अन्तः	अ. पुं. प्र. एक.	दृष्टः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः

नासतः	न + असतः	सवर्णदीर्घसन्धिः ।
असतो विद्यते	असतः + विद्यते	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
भावो न	भावः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
नाभावः	न + अभावः	सवर्णदीर्घसन्धिः ।

अभावो विद्यते	अभावः + विद्यते	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
उभयोरपि	उभयोः + अपि	विसर्गसन्धिः (सकारः) रेफः।
दृष्टोऽन्तः	दृष्टः + अन्तः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
अन्तस्तु	अन्तः + तु	विसर्गसन्धिः (सकारः)
त्वनयोः	तु + अनयोः	यण्सन्धिः
अनयोस्तत्त्वदर्शिभिः	अनयोः + तत्त्वदर्शिभिः	विसर्गसन्धिः (सकारः)

(ख) समासः

असतः	न सत् असत्, तस्य - नञ्तत्पुरुषः।
अभावः	न भावः - नञ्तत्पुरुषः।

(ग) कृदन्तः

सतः	अस् (अस भुवि) + शतृ (कर्तरि)
भावः	भू (भू सत्तायाम्) + णिच् + अच् (भावयति पदार्थान् इति)
दृष्टः	दृश् (दृशिर् प्रेक्षणे) + क्त (कर्मणि)
तत्त्वदर्शिभिः	तत्त्व + दृश् (दृशिर् प्रेक्षणे) + इनि (ताच्छीलिके कर्तरि) तैः। तत्त्वं पश्यन्ति तच्छीलाः इति तत्त्वदर्शिनः, तैः।

भावस्पष्टीकरणम् -

न विद्यते।	
कः न विद्यते ?	भावः न विद्यते।
कस्य भावः न विद्यते ?	**असतः** भावः न विद्यते।
असतः भावः न विद्यते। **पुनश्च कः** न विद्यते ?	असतः भावः न विद्यते। **अभावः** न विद्यते।
असतः भावः न विद्यते। इतोऽपि **कस्य** अभावः न विद्यते ?	असतः भावः न विद्यते। **सतः** अभावः अपि न विद्यते।
अन्तः दृष्टः।	
कैः अन्तः दृष्टः ?	**तत्त्वदर्शिभिः** अन्तः दृष्टः।
तत्त्वदर्शिभिः **कयोः** अन्तः दृष्टः ?	तत्त्वदर्शिभिः **अनयोः** अन्तः दृष्टः।
तत्त्वदर्शिभिः अनयोः **कयोः** अन्तः दृष्टः ?	तत्त्वदर्शिभिः अनयोः **उभयोः** अपि अन्तः दृष्टः।

तात्पर्यम् - असत्पदार्थः कदापि न भवति। यथा शशशृङ्गादिः। सत्पदार्थः सर्वदा भवति, यथा आत्मा। अनयोः उभयोः अपि सदसत्पदार्थयोः स्वरूपे निर्णयः केवलं तत्त्वज्ञानिनामेव भवति, न तु अन्येषाम्।

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम्।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ॥२.१७॥

पदच्छेदः - अविनाशि, तु, तत्, विद्धि, येन, सर्वम्, इदम्, ततम्।
विनाशम्, अव्ययस्य, अस्य, न, कश्चित्, कर्तुम्, अर्हति ॥

अन्वयः - येन इदं सर्वं ततं तत् तु अविनाशि विद्धि। अस्य अव्ययस्य विनाशं कर्तुं कश्चित् अपि न अर्हति।

पदार्थः - येन = येन, इदं सर्वम् = एतत् सर्वमपि जगत्, ततम् = व्याप्तम्, तत् तु = तत्त्वं तु, अविनाशि = विनाशरहितम्, विद्धि = जानीहि, अस्य अव्ययस्य = एतस्य तत्त्वस्य, विनाशं कर्तुम् = नाशं कर्तुम्, कश्चित् अपि = कोऽपि, न अर्हति = न हि शक्नोति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
येन	यद्- द. सर्व. पुं. तृ. एक. (विशेषणम्)	इदम्	इदम्- म. सर्व. नपुं. प्र. एक. (विशेषणम्)
सर्वम्	अ. सर्व. नपुं. प्र. एक. (विशेषणम्)	ततम्	अ. नपुं. प्र. एक.
तत्	तद्- द. सर्व. नपुं. द्वि. एक (विशेषणम्)	तु	अव्ययम्
अविनाशि	अविनाशिन्- न. नपुं. प्र. एक. (विशेष्यम्)	विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्, मपु. एक.
अस्य	इदम्- म. सर्व. नपुं. ष. एक. (विशेषणम्)	अव्ययस्य	अ. नपुं. ष. एक. (विशेष्यम्)
विनाशम्	अ. पुं. द्वि. एक.	कर्तुम्	तुमुन्नन्तम् अव्ययम्
कश्चित्	अव्ययम्	अपि	अव्ययम्
न	अव्ययम्	अर्हति	अर्ह् (अर्ह पूजायम्) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः अव्ययस्यास्य — अव्ययस्य + अस्य — सवर्णदीर्घसन्धिः

(ख) समासः अविनाशि — न विनाशि - नञ्तत्पुरुषः।
अव्ययस्य — न विद्यते व्ययः यस्य तत्, तस्य - नञ्बहुव्रीहिः

(ग) कृदन्तः ततम् — तन् + क्त (तनु विस्तारे)।
विनाशम् — वि + नश् (णश् अदर्शने) घञ् (भावे) तम्।
कर्तुम् — कृ (डुकृञ् करणे) + तुमुन्।

(घ) तद्धितान्तः विनाशि — विनाश + इनि (मतुबर्थे) विनाशः अस्य अस्मिन् वा अस्ति इति विनाशि।

भावस्पष्टीकरणम् -

विद्धि ।	
किं विद्धि ?	**तत्** विद्धि ।
कीदृशं तत् विद्धि ?	**येन इदं सर्वं ततं** तत् विद्धि ।
येन इदं सर्वं ततं तत् **कीदृशं** विद्धि ?	येन इदं सर्वं ततं तत् **अविनाशि** विद्धि ।
न अर्हति ।	
कः न अर्हति ?	**कश्चित् अपि** न अर्हति ।
कश्चित् अपि **किं कर्तुं** न अर्हति ?	कश्चित् अपि **विनाशं कर्तुं** न अर्हति ।
कश्चित् अपि **कस्य** विनाशं कर्तुं न अर्हति ?	कश्चित् अपि **अस्य अव्ययस्य** विनाशं कर्तुं न अर्हति ।

तात्पर्यम् - तत् तत्त्वं तु सर्वदा अविनाशि इति जानीहि । तेन तत्त्वेन सर्वमपि इदं जगत् व्याप्तम् अस्ति । तादृशस्य अविनाशिनः तत्त्वस्य विनाशं कर्तुं कोऽपि नैव शक्नोति ।

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥२.१८॥

पदच्छेदः - अन्तवन्तः, इमे, देहाः, नित्यस्य उक्ताः शरीरिणः ।
अनाशिनः, अप्रमेयस्य, तस्मात्, युध्यस्व, भारत ॥

अन्वयः - अनाशिनः अप्रमेयस्य नित्यस्य च शरीरिणः इमे देहाः अन्तवन्तः उक्ताः । भारत ! तस्मात् युध्यस्व ।

पदार्थः - अनाशिनः = नाशरहितस्य, अप्रमेयस्य = ज्ञातुम् अशक्यस्य, नित्यस्य = शाश्वतस्य, शरीरिणः = आत्मनः, इमे देहाः = एतानि शरीराणि, अन्तवन्तः उक्ताः = नाशसहितानि उक्तानि, भारत = अर्जुन, तस्मात् = तस्मात् कारणात्, युध्यस्व = युद्धं कुरु ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनाशिनः	अनाशिन् - न. पुं. ष. एक. (विशेषणम्)	अप्रमेयस्य	अ. पुं. ष. एक. (विशेषणम्)
नित्यस्य	अ. पुं. ष. एक. (विशेषणम्)	शरीरिणः	शरीरिन् - न. पुं. ष. एक. (विशेष्यम्)
इमे	इदम् - म. सर्व. पुं. प्र. बहु. (विशेषणम्)	देहाः	अ. पुं. प्र. बहु. (विशेष्यम्)
अन्तवन्तः	अन्तवत् - त. पुं. प्र. बहु. (विशेषणम्)	उक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)

भारत	अ. पुं. सम्बो. एक.	तस्मात्	तद् - द. सर्व. पुं. पं. एक. (विशेषणम्)
युध्यस्व	युध् (युध सम्प्रहारे) आत्म. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	अन्तवन्त इमे	अन्तवन्तः + इमे	विसर्गसन्धिः (लोपः)।
	देहा नित्यस्य	देहाः + नित्यस्य	विसर्गसन्धिः (लोपः)।
	नित्यस्योक्ताः	नित्यस्य + उक्ताः	गुणसन्धिः।
	अनाशिनोऽप्रमेयस्य	अनाशिनः + अप्रमेयस्य	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च।
	तस्माद्युध्यस्व	तस्मात् + युध्यस्व	जश्त्वसन्धिः।
(ख) समासः	अनाशिनः	न नाशी अनाशी, तस्य - नञ्तत्पुरुषः।	
	अप्रमेयस्य	न प्रमेयः अप्रमेयः, तस्य - नञ्तत्पुरुषः।	
(ग) कृदन्तः	देहाः	दिह् (उपचये) + घञ्।	
	उक्ताः	वच् (वच परिभाषणे) + क्त (कर्मणि)	
	प्रमेयः	प्र + मा (माङ् माने शब्दे च) + यत्।	
(घ) तद्धितान्तः	अन्तवन्तः	अन्तः + मतुप्। अन्तः एषाम् एषु वा अस्ति।	
	शरीरिणः	शरीर + इनि (मतुबर्थे)। शरीरम् अस्य अस्मिन् वा अस्ति, तस्याः।	
	नाशी	नाश + इनि (मतुबर्थे)। नाशः अस्य अस्मिन् वा अस्ति।	

भावस्पष्टीकरणम् -

युध्यस्व।	
कस्मात् युध्यस्व ?	**उक्ताः**, तस्मात् युध्यस्व।
के उक्ताः, तस्मात् युध्यस्व ?	**देहाः** उक्ताः, तस्मात् युध्यस्व।
के देहाः उक्ताः, तस्मात् युध्यस्व ?	**इमे** देहाः उक्ताः, तस्मात् युध्यस्व।
इमे देहाः **कीदृशाः** उक्ताः, तस्मात् युध्यस्व ?	इमे देहाः **अन्तवन्तः** उक्ताः, तस्मात् युध्यस्व।
कस्य इमे देहाः अन्तवन्तः उक्ताः, तस्मात् युध्यस्व ?	**शरीरिणः** इमे देहाः अन्तवन्तः उक्ताः, तस्मात् युध्यस्व।
कीदृशस्य शरीरिणः इमे देहाः अन्तवन्तः उक्ताः, तस्मात् युध्यस्व ?	**नित्यस्य** शरीरिणः इमे देहाः अन्तवन्तः उक्ताः, तस्मात् युध्यस्व।

नित्यस्य **पुनश्च कीदृशस्य** शरीरिणः इमे देहाः अन्तवन्तः उक्ताः, तस्मात् युध्यस्व ?	नित्यस्य **अनाशिनः** शरीरिणः इमे देहाः अन्तवन्तः उक्ताः, तस्मात् युध्यस्व।
नित्यस्य अनाशिनः **पुनश्च कीदृशस्य** शरीरिणः इमे देहाः अन्तवन्तः उक्ताः, तस्मात् युध्यस्व ?	नित्यस्य अनाशिनः **अप्रमेयस्य** शरीरिणः इमे देहाः अन्तवन्तः उक्ताः, तस्मात् युध्यस्व।
अत्र श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - अयं च आत्मा अविनाशी, प्रत्यक्षादिप्रमाणैः ज्ञातुम् अशक्यः, शाश्वतश्च। तस्य एतानि शरीराणि तु नाशसहितानि इति उक्तानि सन्ति, यस्मात् अयम् आत्मा नित्यः, शरीरं च विनाशि तस्मात् हे भारत ! त्वं युद्धं कुरु।

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते॥२.१९॥

पदच्छेदः - यः, एनम्, वेत्ति, हन्तारम्, यः, च, एनम्, मन्यते, हतम्।
उभौ, तौ, न, विजानीतः, न, अयम्, हन्ति, न, हन्यते॥

अन्वयः - यः एनं हन्तारं वेत्ति, यः च एनं हतं मन्यते तौ उभौ न विजानीतः। (यतः) अयं न हन्ति, न हन्यते।

पदार्थः - यः = यः, एनम् = आत्मानम्, हन्तारं वेत्ति = मारकं जानाति , यः = यः, च एनम् = च आत्मानम्, हतं मन्यते = मारितं मन्यते, तौ उभौ = तौ द्वौ अपि, न विजानीतः = नैव अवगच्छतः, अयम् = आत्मा, न हन्ति = न मारयति, न हन्यते = नापि मारितो भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. . (विशेषणम्)	एनम्	एतद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)
हन्तारम्	हन्तृ - ऋ. पुं. द्वि. एक. (विशेष्यम्)	वेत्ति	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.
च	अव्ययम्	हतम्	अ. पुं. द्वि. एक.
मन्यते	मन् (मन ज्ञाने) आत्म. कर्मणि लट्. प्रपु. एक.	तौ	तद् - द. सर्व. पुं. प्र. द्विव. (विशेषणम्)
उभौ	उभ - अ. सर्व. पुं. प्र. द्विव. . (विशेषणम्)	न	अव्ययम्
विजानीतः	वि + ज्ञा (ज्ञा अवबोधने) पर. कर्तरि लट्. प्रपु. द्विव.	अयम्	इदम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)

हन्ति	हन् (हन हिंसागत्योः) पर. कर्तरि लट्. प्रपु. एक.	हन्यते	हन् (हन हिंसागत्योः) आत्म. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	य एनम्	यः + एनम्	विसर्गसन्धिः (लोपः)।
	यश्च	यः + च	विसर्गसन्धिः (सकारः) श्चुत्वं च।
	चैनम्	च + एनम्	वृद्धिसन्धिः।
	विजानीतो न	विजानीतः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	नायम्	न + अयम्	सवर्णदीर्घसन्धिः।
(ख) कृदन्तः	हन्तारम्	हन् (हिंसागत्योः) + तृच् (कर्तरि), तम्।	
	हतम्	हन् (हिंसागत्योः) + क्त (कर्मणि), तम्।	

भावस्पष्टीकरणम् -

न विजानीतः।	
कौ न विजानीतः ?	**तौ** न विजानीतः।
तौ **कौ** न विजानीतः ?	तौ **उभौ** न विजानीतः।
कौ तौ उभौ न विजानीतः ?	**यः च वेत्ति यः च मन्यते** तौ उभौ न विजानीतः।
सः **कं** वेत्ति, स च **कं** मन्यते, यौ उभौ न विजानीतः ?	यः **एनं** वेत्ति, यः च **एनं** मन्यते तौ उभौ न विजानीतः।
सः एनं **कीदृशं** वेत्ति, स च एनं **कीदृशं** मन्यते यौ उभौ न विजानीतः ?	य एनं **हन्तारं** वेत्ति, यः च एनं **हतं** मन्यते तौ उभौ न विजानीतः।
य एनं हन्तारं वेत्ति, यः च एनं हतं मन्यते तौ उभौ न विजानीतः। **कस्मात्** ?	य एनं हन्तारं वेत्ति, यः च एनं हतं मन्यते तौ उभौ न विजानीतः। **(यतः) नायं हन्ति न हन्यते।**

तात्पर्यम् - यः जनः 'आत्मा कञ्चित् पुरुषं मारयति' इति जानाति यश्च जनः 'आत्मा केनापि पुरुषेण मार्यते' इति जानाति तौ द्वौ अपि वस्तुतः अज्ञानिनौ। यतः आत्मा कञ्चित् न हन्ति, न वा केनापि हन्यते।

न जायते म्रियते वा कदाचिन्नायम्भूत्वा भविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥२.२०॥

पदच्छेदः - न, जायते, म्रियते, वा, कदाचित्, न, अयम्, भूत्वा, भविता, वा, न, भूयः,।
अजः, नित्यः, शाश्वतः, अयम्, पुराणः, न, हन्यते, हन्यमाने, शरीरे॥

अन्वयः - अयं कदाचित् न जायते न वा म्रियते। अयं भूत्वा भूयः भविता वा न। अयम् अजः नित्यः शाश्वतः पुराणः शरीरे हन्यमाने न हन्यते।

पदार्थः - अयम् = एषः आत्मा, कदाचित् = कदापि, न जायते = न उत्पद्यते, न वा म्रियते = न वा मृतः भवति, अयम् = एषः आत्मा, भूत्वा भूयः भविता वा न = उत्पद्य पुनः न उत्पत्स्यते, अयम् = एषः आत्मा, अजः = जन्मरहितः, नित्यः = निर्विकारः, शाश्वतः = क्षयरहितः, पुराणः = पुरातनः, शरीरे हन्यमाने = शरीरे नश्यति, न हन्यते = न नश्यति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अयम्	इदम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)	कदाचित्	अव्ययम्
न	अव्ययम्	जायते	जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.
वा	अव्ययम्	म्रियते	मृ (मृङ् प्राणत्यागे) आत्म. कर्तरि लट्. प्रपु. एक.
भूत्वा	क्त्वान्तम् अव्ययम्	भूयः	अव्ययम्
भविता	भू (भू सत्तायाम्) पर. कर्तरि लुट्. प्रपु. एक.	अजः	अ. पुं. प्र. एक. (विशेषणम्)
नित्यः	अ. पुं. प्र. एक. (विशेषणम्)	शाश्वतः	अ. पुं. प्र. एक. (विशेषणम्)
पुराणः	अ. पुं. प्र. एक. (विशेषणम्)	शरीरे	अ. नपुं. स. एक. (विशेष्यम्)
हन्यमाने	अ. नपुं. स. एक. (विशेषणम्)	हन्यते	हन् (हन हिंसागत्योः) आत्म. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः

कदाचिन्न	कदाचित् + न	अनुनासिकसन्धिः।
अजो नित्यः	अजः + नित्यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
शाश्वतोऽयम्	शाश्वतः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
पुराणो न	पुराणः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः अजः — न जायते इति अजः। कर्तरि डप्रत्ययः उपपदसमासश्च।

(ग) कृदन्तः
भूत्वा — भू (भू सत्तायाम्) + क्त्वा।
हन्यमाने — हन् (हन हिंसागत्योः) + शानच् (कर्मणि), तस्मिन्।

(घ) तद्धितान्तः शाश्वतः — शश्वत् + अण् (भवार्थे)। सदा भवः इत्यर्थः।

भावस्पष्टीकरणम् -

अयम् ।	
अयम् **कीदृशः** ?	अयं **न जायते ।**
अयं न जायते, **पुनश्च कीदृशः** ?	अयं न जायते, **न वा म्रियते ।**
अयं न जायते, न वा म्रियते, **पुनश्च कीदृशः** ?	अयं न जायते, न वा म्रियते **अयं न वा भूयः भविता ।**
अयं न जायते, न वा म्रियते अयं **किं कृत्वा** न वा भूयः भविता ?	अयं न जायते, न वा म्रियते अयं **भूत्वा** न वा भूयः भविता ।
अयं **कदा** न जायते, न वा म्रियते अयं भूत्वा न वा भूयः भविता ?	अयं **कदाचित्** न जायते, न वा म्रियते अयं भूत्वा न वा भूयः भविता ।
अयम् ।	
अयं **कीदृशः** ?	अयम् **अजः ।**
अयम् अजः, **पुनश्च कीदृशः** ?	अयम् **अजः**, **नित्यश्च ।**
अयम् अजः नित्यः **पुनश्च कीदृशः** ?	अयम् अजः, नित्यः, **शाश्वतश्च ।**
अयम् अजः नित्यः शाश्वतः **पुनश्च कीदृशः** ?	अयम् अजः, नित्यः, शाश्वतः, **पुराणश्च ।**
अयम् अजः, नित्यः, शाश्वतः, पुराणश्च **पुनश्च कीदृशः** ?	अयम् अजः, नित्यः, शाश्वतः, **पुराणः न च हन्यते ।**
अयम् अजः, नित्यः, शाश्वतः, पुराणः, **कदा** न च हन्यते ?	अयम् अजः, नित्यः, शाश्वतः, पुराणः, **शरीरे हन्यमाने अपि** न च हन्यते ।

तात्पर्यम् - अयम् आत्मा कदापि न जायते न म्रियते वा, उत्पद्य पुनरपि उत्पत्स्यते इत्यपि वक्तुं न शक्यते, यतः अयम् आत्मा जन्मरहितः, सनातनः, पुरातनश्च । शरीरे नष्टेऽपि सः न नश्यति ।

वेदाविनाशिनं नित्यं य एनमजमव्ययम् ।
कथं स पुरुषः पार्थ कं घातयति हन्ति कम् ॥२.२१॥

पदच्छेदः - वेद, अविनाशिनम्, नित्यम्, यः, एनम्, अजम्, अव्ययम् ।
कथम्, सः, पुरुषः, पार्थ, कम्, घातयति, हन्ति, कम् ॥

अन्वयः - पार्थ ! यः एनम् अविनाशिनं नित्यम् अजम् अव्ययं च वेद सः पुरुषः कं कथं घातयति ? कं हन्ति ?

पदार्थः - पार्थ = हे अर्जुन ! यः = यः पुरुषः, एनम् = एनम् (आत्मानम्), अविनाशिनम् = नाशरहितम्, नित्यम् = शाश्वतम्, अजम् = जन्मरहितम्, अव्ययम् = क्षयरहितम्, वेद = जानाति, सः पुरुषः = सः जनः, कम् = पुरुषम्, कथम् = केन प्रकारेण, घातयति = नाशयति, कं हन्ति = कं मारयति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
एनम्	एतद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)	अविनाशिनम्	अविनाशिन् - न. पुं. द्वि. एक. (विशेषणम्)
नित्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	अजम्	अ. पुं. द्वि. एक. (विशेषणम्)
अव्ययम्	अ. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
वेद	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
पुरुषः	अ. पुं. प्र. एक. (विशेष्यम्)	कम्	किम् - म. सर्व. पुं. द्वि. एक.
कथम्	अव्ययम्	घातयति	हन् (हन हिंसागत्योः) णिच् पर. कर्तरि लट्. प्रपु. एक.
हन्ति	हन् (हन हिंसागत्योः) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	वेदाविनाशिनम्	वेद + अविनाशिनम्	सवर्णदीर्घसन्धिः ।
	य एनम्	यः + एनम्	विसर्गसन्धिः (लोपः) ।
	स पुरुषः	सः + पुरुषः	विसर्गसन्धिः (लोपः) ।
(ख) समासः	अविनाशिनम्	न विनाशि अविनाशि, तम् - नञ्तत्पुरुषः ।	
	अजम्	न विद्यते जन्म यस्य सः अजः, तम् - नञ्बहुव्रीहिः ।	
	अव्ययम्	न विद्यते व्ययः यस्य सः अव्ययः, तम् - नञ्बहुव्रीहिः ।	
(ग) तद्धितान्तः	विनाशि	वि + नश् (णश अदर्शने) + णिच् + इनि (मत्वर्थे) विनाशः अस्य वा अस्मिन् अस्ति इति ।	
	पार्थ	पृथा + अण् (अपत्यार्थे) पृथायाः अपत्यं पुमान् इत्यर्थः ।	

भावस्पष्टीकरणम् -

घातयति, हन्ति ।	
कः घातयति, हन्ति ?	**पुरुषः** घातयति, हन्ति ।
पुरुषः **इत्थं** घातयति, हन्ति ?	पुरुषः **कथं** घातयति, हन्ति !

पुरुषः इत्थं **एनम्** घातयति, हन्ति ?	पुरुषः कथं **कं** घातयति, तं हन्ति !
कः पुरुषः इत्थं कथं तं घातयति, तं हन्ति ?	**यः वेद सः** पुरुषः कथं कं घातयति, तं हन्ति ?
सः **कं** यः वेद पुरुषः इत्थं तं घातयति, तं हन्ति ?	यः **एनं** वेद सः पुरुषः कथं कं घातयति, तं हन्ति ?
सः एनं **कीदृशं** वेद पुरुषः इत्थं तं घातयति, तं हन्ति ?	यः एनम् **अविनाशिनं** वेद सः पुरुषः कथं कं घातयति, तं हन्ति ।
यः एनम् अविनाशिनं **पुनश्च कीदृशं** वेद सः पुरुषः इत्थं कं घातयति, तं हन्ति ?	यः एनम् अविनाशिनम् नित्यं वेद सः पुरुषः कथं कं घातयति, तं हन्ति ?
यः एनम् अविनाशिनं नित्यं **पुनश्च कीदृशं** वेद सः पुरुषः इत्थं कं घातयति, तं हन्ति ?	यः एनम् अविनाशिनम् नित्यम् **अजं** वेद सः पुरुषः कथं कं घातयति, तं हन्ति ?

तात्पर्यम् - अयम् आत्मा विनाशरहितः, नित्यः, जन्मरहितः, क्षयरहितश्च अस्ति इति यः जानाति सः ज्ञानी एव। तादृशज्ञानवान् पुरुषः अन्यं कथं वा हन्ति ? कथं वा हननाय अन्यं प्रेरयति ?

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही॥२.२२॥

पदच्छेदः - वासांसि, जीर्णानि, यथा, विहाय, नवानि, गृह्णाति, नरः, अपराणि।
तथा, शरीराणि, विहाय, जीर्णानि, अन्यानि, संयाति, नवानि, देही॥

अन्वयः - नरः, यथा जीर्णानि वासांसि विहाय अपराणि नवानि गृह्णाति तथा देही जीर्णानि शरीराणि विहाय अन्यानि नवानि संयाति।

पदार्थः - नरः = पुरुषः, जीर्णानि = पुरातनानि, वासांसि = वस्त्राणि, विहाय = त्यक्त्वा, अपराणि = इतराणि, नवानि = नूतनानि, यथा = येन प्रकारेण, गृह्णाति = धरति, तथा = तेन प्रकारेण, देही = आत्मा, जीर्णानि = पुरातनानि, शरीराणि = देहान्, विहाय = विसृज्य, अन्यानि = इतराणि, नवानि = नूतनानि, संयाति = प्राप्नोति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
नरः	अ. पुं. प्र. एक.	जीर्णानि	अ. नपुं. द्वि. बहु. (विशेषणम्)
वासांसि	वासस् - सका. नपुं. द्वि. बहु. (विशेष्यम्)	विहाय	ल्यबन्तम् अव्ययम्
अपराणि	अ. नपुं. द्वि. बहु. (विशेषणम्)	नवानि	अ. नपुं. द्वि. बहु. (विशेषणम्)

गृह्णाति	ग्रह् (ग्रह उपादाने) पर. कर्तरि लट्.प्रपु. एक.	तथा	अव्ययम्
देही	देहिन् - न. पुं. प्र. एक.	शरीराणि	अ. नपुं. द्वि. बहु.(विशेष्यम्)
अन्यानि	अ. सर्व. नपुं. द्वि. बहु. (विशेषणम्)	संयाति	सम् - या (या प्रापणे) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	नरोऽपराणि	नरः + अपराणि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	जीर्णान्यानि	जीर्णानि + अन्यानि	यण्सन्धिः।
(ख) कृदन्तः	जीर्णानि	जॄ (जॄ वयोहानौ) + क्त (कर्तरि)।	
	विहाय	वि + हा (ओ हाक् त्यागे) + ल्यप्।	
(ग) तद्धितान्तः	देही	देह + इनि (मतुबर्थे) देहः अस्य वा अस्मिन् अस्ति इत्यर्थः।	

भावस्पष्टीकरणम् -

गृह्णाति।	
कः गृह्णाति ?	**नरः** गृह्णाति।
नरः **कानि** गृह्णाति ?	नरः **वासांसि** गृह्णाति।
नरः **कीदृशानि** वासांसि गृह्णाति ?	नरः **नवानि** वासांसि गृह्णाति।
नरः **कानि** नवानि वासांसि गृह्णाति ?	नरः **अपराणि** नवानि वासांसि गृह्णाति।
नरः **किं कृत्वा** नवानि अपराणि वासांसि गृह्णाति ?	नरः **विहाय** नवानि अपराणि वासांसि गृह्णाति।
नरः **कानि** विहाय नवानि अपराणि वासांसि गृह्णाति ?	नरः **वासांसि** विहाय नवानि अपराणि वासांसि गृह्णाति।
नरः **कीदृशानि** वासांसि विहाय नवानि अपराणि वासांसि गृह्णाति ?	नरः **जीर्णानि** वासांसि विहाय नवानि अपराणि वासांसि गृह्णाति।
यथा नरः जीर्णानि वासांसि विहाय नवानि अपराणि वासांसि गृह्णाति **तथा किं भवति** ?	**यथा** नरः जीर्णानि वासांसि विहाय नवानि अपराणि वासांसि गृह्णाति **तथा संयाति।**
तथा **कः** संयाति ?	तथा **देही** संयाति।
तथा देही **कानि** संयाति ?	तथा देही **नवानि** (शरीराणि) संयाति।
तथा देही **कीदृशानि** नवानि (शरीराणि) संयाति ?	तथा देही **अन्यानि** नवानि (शरीराणि) संयाति।

तथा देही **किं कृत्वा** अन्यानि नवानि (शरीराणि) संयाति ?	तथा देही **विहाय** अन्यानि नवानि (शरीराणि) संयाति।
तथा देही **कानि** विहाय अन्यानि नवानि (शरीराणि) संयाति ?	तथा देही **शरीराणि** विहाय अन्यानि नवानि (शरीराणि) संयाति।
तथा देही **कीदृशानि** शरीराणि विहाय अन्यानि नवानि (शरीराणि) संयाति ?	तथा देही **जीर्णानि** शरीराणि विहाय अन्यानि नवानि (शरीराणि) संयाति।

तात्पर्यम् - मनुष्यः वस्त्राणि धरति। परन्तु सः सर्वदा समानमेव वस्त्रं न धरति। धृतानि वस्त्राणि यदा जीर्णानि भवन्ति तदा तानि विहाय नूतनानि अन्यानि वस्त्राणि धरति। एवम् आत्मा अपि जीर्णानि शरीराणि परित्यज्य अभिनवानि शरीराणि आश्रयते।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥२.२३॥

पदच्छेदः - न, एनम्, छिन्दन्ति, शस्त्राणि, न, एनम्, दहति, पावकः।
न, च, एनम्, क्लेदयन्ति, आपः, न, शोषयति, मारुतः॥

अन्वयः - शस्त्राणि एनं न छिन्दन्ति। पावकः एनं न दहति। आपः एनं न क्लेदयन्ति। मारुतः न शोषयति।

पदार्थः - शस्त्राणि = आयुधानि, एनम् = एनम् आत्मानम्, न छिन्दन्ति = न खण्डयन्ति, पावकः = अग्निः, एनम् = एनम् आत्मानम्, न दहति = न भस्मीकरोति, आपः = उदकानि, एनम् = एनम् आत्मानम्, न क्लेदयन्ति च = न आर्द्रीकुर्वन्ति अपि, मारुतः = वायुः, न शोषयति = न शुष्कं करोति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
शस्त्राणि	अ. नपुं. प्र. बहु.	एनम्	एतद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)
न	अव्ययम्	छिन्दन्ति	छिद् (छिदिर् द्वैधीकरणे) पर. कर्तरि लट्. प्रपु. बहु.
पावकः	अ. पुं. प्र. एक.	दहति	दह् (दह भस्मीकरणे) पर. कर्तरि लट्. प्रपु. एक.
आपः	अप् - प. स्त्री. प्र. बहु.	क्लेदयन्ति	क्लिद् (क्लिदू आर्द्रीभावे) (णिच्) पर. कर्तरि लट्. प्रपु. बहु.
मारुतः	अ. पुं. प्र. एक.	शोषयति	शुष् (शुष शोषणे) (णिच्) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	नैनम्	न + एनम्	वृद्धिसन्धिः ।
	क्लेदयन्त्यापो	क्लेदयन्ति + आपः	यण्-सन्धिः ।
	आपो न	आपः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) कृदन्तः	शस्त्राणि	शस् (शसु हिंसायाम्) + ष्ट्रन्, तानि ।	
	पावकः	पू (पूङ् पवने) + ण्वुल् ।	
(ग) तद्धितान्तः	मारुतः	मरुत् + अण् (अपत्यार्थे), मरुतः अपत्यं पुमान् इत्यर्थः ।	

भावस्पष्टीकरणम् -

एषः कीदृशः ?	
न छिन्दन्ति ।	
कानि न छिन्दन्ति ?	**शस्त्राणि** न छिन्दन्ति ।
शस्त्राणि **कं** न छिन्दन्ति ?	शस्त्राणि **एनं** न छिन्दन्ति ।
शस्त्राणि एनं न छिन्दन्ति, **पुनश्च कीदृशः** ?	शस्त्राणि एनं न छिन्दन्ति, **न दहति ।**
शस्त्राणि एनं न छिन्दन्ति, **कः** न दहति ?	शस्त्राणि एनं न छिन्दन्ति, **पावकः** न दहति ।
शस्त्राणि एनं न छिन्दन्ति, पावकः एनं न दहति । **पुनश्च कीदृशः** ?	शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, **न क्लेदयन्ति ।**
शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, **काः** न क्लेदयन्ति ?	शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, **आपः** न क्लेदयन्ति ।
शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, आपः **कं** न क्लेदयन्ति ?	शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, आपः **एनं** न क्लेदयन्ति ।
शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, आपः एनं न क्लेदयन्ति **पुनश्च कीदृशः** ?	शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, आपः एनं न क्लेदयन्ति, **न च शोषयति ।**
शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, आपः न एनं क्लेदयन्ति, **कः** न च शोषयति ?	शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, आपः एनं न क्लेदयन्ति, **मारुतः** न च शोषयति ।
शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, आपः एनं न क्लेदयन्ति, मारुतः **कं** न च शोषयति ?	शस्त्राणि एनं न छिन्दन्ति, पावकः न दहति, आपः एनं न क्लेदयन्ति, मारुतः **एनं** न च शोषयति ।

तात्पर्यम् - एनम् आत्मानं शस्त्राणि छेत्तुं न प्रभवन्ति । अग्निः एतस्य दहनं कर्तुं न शक्नोति । जलम् एनं नैव आर्द्रीकर्तुं प्रभवति । वायुः अपि एनं शोषयितुं न शक्नोति । (अतः सः अविकारी अस्ति ।)

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥२.२४॥

पदच्छेदः - अच्छेद्यः, अयम्, अदाह्यः, अयम्, अक्लेद्यः, अशोष्यः, एव, च।
नित्यः, सर्वगतः, स्थाणुः, अचलः, अयम्, सनातनः ॥

अन्वयः - अयम् अच्छेद्यः। अयम् अदाह्यः। अयम् अक्लेद्यः अशोष्यः एव च। अयं नित्यः सर्वगतः स्थाणुः अचलः सनातनः (च)।

पदार्थः - अयम् = एषः आत्मा, अच्छेद्यः = छेत्तुम् अयोग्यः, अयम् = एषः आत्मा, अदाह्यः = दग्धुम् अयोग्यः, अक्लेद्यः = क्लेदयितुम् अशक्यः। अशोष्यः = शोषयितुम् अयोग्यः एव च। अयम् = एषः आत्मा, नित्यः = शाश्वतः, सर्वगतः = सर्वव्यापी, स्थाणुः = स्थिरः, अचलः = कम्परहितः, सनातनः = सदाभवः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)	अच्छेद्यः	अ. पुं. प्र. एक. (विशेषणम्)
अदाह्यः	अ. पुं. प्र. एक. (विशेषणम्)	अक्लेद्यः	अ. पुं. प्र. एक. (विशेषणम्)
अशोष्यः	अ. पुं. प्र. एक. (विशेषणम्)	एव	अव्ययम्
च	अव्ययम्	नित्यः	अ. पुं. प्र. एक. (विशेषणम्)
सर्वगतः	अ. पुं. प्र. एक. (विशेषणम्)	स्थाणुः	उ. पुं. प्र. एक. (विशेषणम्)
अचलः	अ. पुं. प्र. एक. (विशेषणम्)	सनातनः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	अच्छेद्योऽयम्	अच्छेद्यः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अदाह्योऽयम्	अदाह्यः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अक्लेद्योऽशोष्यः	अक्लेद्यः + अशोष्यः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अशोष्य एव	अशोष्यः + एव	विसर्गसन्धिः (लोपः)।
	स्थाणुरचलः	स्थाणुः + अचलः	विसर्गसन्धिः (रेफः)।
	अचलोऽयम्	अचलः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।

(ख) समासः	अच्छेद्यः	न छेद्यः - नञ्तत्पुरुषः ।
	अदाह्यः	न दाह्यः - नञ्तत्पुरुषः ।
	अक्लेद्यः	न क्लेद्यः - नञ्तत्पुरुषः ।
	अशोष्यः	न शोष्यः - नञ्तत्पुरुषः ।
	अचलः	न चलः - नञ्तत्पुरुषः ।
	सर्वगतः	सर्वं गतः - द्वितीयातत्पुरुषः ।
(ग) कृदन्तः	छेद्यः	छिद् (छिदिर् द्वैधीकरणे) + ण्यत् (कर्मणि) ।
	दाह्यः	दह् (दह भस्मीकरणे) + ण्यत् (कर्मणि) ।
	क्लेद्यः	क्लिद् (क्लिदू आर्द्रीभावे) + ण्यत् (कर्मणि) ।
	शोष्यः	शुष् (शुष शोषणे) + ण्यत् (कर्मणि) ।
	गतः	गम् (गम्लृ गतौ) + क्त (कर्तरि) ।

भावस्पष्टीकरणम् -

अयं कीदृशः ?	**अयम् अच्छेद्यः ।**
अयम् अच्छेद्यः । **अयं पुनश्च कीदृशः ?**	अयम् अच्छेद्यः । **अयम् अदाह्यः।**
अयम् अच्छेद्यः । अयम् अदाह्यः । **अयं पुनश्च कीदृशः ?**	अयम् अच्छेद्यः । अयम् अदाह्यः । **अयम् अक्लेद्यः ।**
अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः । **अयं पुनश्च कीदृशः ?**	अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः **अशोष्यः एव च ।**
अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः अशोष्यः एव च । **अयं पुनश्च कीदृशः ?**	अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः अशोष्यः एव च । **अयं नित्यः।**
अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः अशोष्यः एव च । अयं नित्यः । **अयं पुनश्च कीदृशः ?**	अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः अशोष्यः एव च । अयं नित्यः, **सर्वगतः ।**
अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः अशोष्यः एव च । अयं नित्यः, सर्वगतः । **अयं पुनश्च कीदृशः ?**	अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः अशोष्यः एव च । अयं नित्यः, सर्वगतः, **स्थाणुः ।**
अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः अशोष्यः एव च । अयं नित्यः,सर्वगतः, स्थाणुः, **पुनश्च कीदृशः ?**	अयम् अच्छेद्यः । अयम् अदाह्यः । अयम् अक्लेद्यः अशोष्यः एव च । अयं नित्यः, सर्वगतः, स्थाणुः **अचलश्च ।**

अयम् अच्छेद्यः। अयम् अदाह्यः। अयम् अक्लेद्यः अशोष्यः एव च। अयं नित्यः,सर्वगतः, स्थाणुः अचलः **पुनश्च कीदृशः ?**	अयम् अच्छेद्यः। अयम् अदाह्यः। अयम् अक्लेद्यः अशोष्यः एव च। अयं नित्यः, सर्वगतः, स्थाणुः अचलः **सनातनः च।**

तात्पर्यम् - अयम् आत्मा केनापि शस्त्रेण छेत्तुम् अशक्यः। अग्निना भस्मीकर्तुम् अपि न शक्यः। अस्य जलादिना क्लेदनम् आतपादिना शोषणं वा न शक्यम्। अयं सर्वदा भवति। सर्वत्रापि भवति। अयं निश्चलः स्थिरः सनातनश्च वर्तते। (आत्मा अविकारी भवति इति कारणेन जन्मादयः तु शरीरस्य विकाराः एव, अतः द्रोणादीनां मारणस्य विषये भवान् अधिकं मा चिन्तयतु, तेषां देहः मृतः चेदपि आत्मा तु चिरं भविष्यति एव।)

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२.२५॥

पदच्छेदः - अव्यक्त, अयम्, अचिन्त्यः, अयम्, अविकार्यः अयम् उच्यते।
तस्मात्, एवम्, विदित्वा, एनम्, न, अनुशोचितुम्, अर्हसि ॥

अन्वयः अयम् अव्यक्तः। अयम् अचिन्त्यः। अयम् अविकार्यः उच्यते। तस्मात् एवम् एनं (देहिनम्) विदित्वा अनुशोचितुं न अर्हसि।

पदार्थः - अयम् = एषः आत्मा, अव्यक्तः = अप्रकटः, अयम् = एषः आत्मा, अचिन्त्यः = चिन्तयितुम् अयोग्यः, अयम् = एषः आत्मा, अविकार्यः = अपरिणामी, उच्यते = कथ्यते, तस्मात् = अतः, एवम् = अनेन प्रकारेण, एनं = एनम्, देहिनम् = आत्मानम्, विदित्वा = ज्ञात्वा, अनुशोचितुम् = शोकं कर्तुम्, न अर्हसि = न योग्यः भवसि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अयम्	इदम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)	अव्यक्तः	अ. पुं. प्र. एक. (विशेषणम्)
अचिन्त्यः	अ. पुं. प्र. एक.	अविकार्यः	अ. पुं. प्र. एक. (विशेषणम्)
उच्यते	वच् (वच् परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.	तस्मात्	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
एवम्	अव्ययम्	एनम्	एतद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)

विदित्वा	क्त्वान्तम् अव्ययम्	अनुशोचितुम्	तुमुन्नन्तम् अव्ययम्
न	अव्ययम्	अर्हसि	अर्ह् (अर्ह पूजायाम्) पर. कर्तरि लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः

अव्यक्तोऽयम्	अव्यक्तः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
अचिन्त्योऽयम्	अचिन्त्यः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
अविकार्योऽयम्	अविकार्यः + अयम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
तस्मादेवम्	तस्मात् + एवम्	जश्त्वसन्धिः ।
विदित्वैनम्	विदित्वा + एनम्	वृद्धिसन्धिः ।
नानुशोचितुम्	न + अनुशोचितुम्	सवर्णदीर्घसन्धिः ।

(ख) समासः

अव्यक्तः	न व्यक्तः - नञ्तत्पुरुषः ।
अचिन्त्यः	न चिन्त्यः - नञ्तत्पुरुषः ।
अविकार्यः	न विकार्यः - नञ्तत्पुरुषः ।

(ग) कृदन्तः

व्यक्तः	वि + अञ्ज (अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु) + क्त (कर्मणि) ।
चिन्त्यः	चिन्त् (चिति स्मृत्याम्) + ण्यत् (कर्मणि) ।
विकार्यः	वि + कृ (डुकृञ् करणे) + ण्यत् (कर्मणि) ।
विदित्वा	विद् (विद ज्ञाने) + क्त्वा ।
अनुशोचितुम्	अनु + शुच् (शुच शोके) + तुमुन् ।

भावस्पष्टीकरणम् -

उच्यते ।	
कः उच्यते ?	**अयम्** उच्यते ।
अयं **कीदृशः** उच्यते ?	अयम् **अव्यक्तः** उच्यते ।
अयम् अव्यक्तः । अयं **कीदृशः** उच्यते ?	अयम् अव्यक्तः । अयम् **अचिन्त्यः** उच्यते ।
अयम् अव्यक्तः । अयम् अचिन्त्यः । अयं पुनः **कीदृशः** उच्यते ?	अयम् अव्यक्तः । अयम् अचिन्त्यः । अयम् **अविकार्यः** उच्यते ।

अयम् अव्यक्तः। अयम् अचिन्त्यः। अयम् अविकार्यः उच्यते। **तस्मात् किम्** ?	अयम् अव्यक्तः। अयम् अचिन्त्यः। अयम् अविकार्यः उच्यते। **तस्मात् त्वं न अर्हसि।**
त्वं न **किं कर्तुम्** अर्हसि।	त्वं न **अनुशोचितुम्** अर्हसि।
कथं त्वं न अनुशोचितुम् अर्हसि ?	**एवं** त्वं न अनुशोचितुम् अर्हसि।
एवं **किं कृत्वा** त्वं न अनुशोचितुम् अर्हसि ?	एवं **विदित्वा** त्वं न अनुशोचितुम् अर्हसि।
एवं **कं** विदित्वा त्वं न अनुशोचितुम् अर्हसि ?	एवम् **एनं** विदित्वा त्वं न अनुशोचितुम् अर्हसि।

तात्पर्यम् - एषः आत्मा इन्द्रियाणाम् अगोचरः अस्ति इति हेतोः अचिन्त्यः अस्ति। अस्य कोऽपि विकारः न भवति। अस्य आत्मनः एतादृशं स्वरूपं ज्ञात्वा त्वं दुःखम् अनुभवितुं नार्हसि।

अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्।
तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥२.२६॥

पदच्छेदः - अथ, च, एनम्, नित्यजातम्, नित्यम्, वा, मन्यसे, मृतम्।
तथा, अपि, त्वम्, महाबाहो, न, एवम्, शोचितुम्, अर्हसि ॥

अन्वयः - महाबाहो ! अथ च एनं नित्यजातं नित्यं वा मृतं मन्यसे तथापि त्वम् एवं शोचितुं न अर्हसि।

पदार्थः - महाबाहो = दीर्घबाहो ! (अर्जुन!) अथ च = यदि पुनः, एनम् = एनम् आत्मानम्, नित्यजातम् = सर्वदा जायमानम्, नित्यं वा = सदा वा, मृतम् = नष्टम्, मन्यसे = चिन्तयसि, तथापि = एवमपि, शोचितुम् = शोकं कर्तुम्, न अर्हसि = न योग्यः भवसि।

पदपरिचयः -

पदम्	**परिचयः**	**पदम्**	**परिचयः**
महाबाहो	उ. पुं. सम्बो. एक. (विशेषणम्)	अथ	अव्ययम्
च	अव्ययम्	एनम्	एतद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)
नित्यजातम्	अ. पुं. द्वि. एक. (विशेषणम्)	नित्यम्	अ. नपुं. द्वि. एक. (क्रियाविशेषणम्)
वा	अव्ययम्	मृतम्	अ. पुं. द्वि. एक. (विशेषणम्)
मन्यसे	मन (मन ज्ञाने) आत्म. कर्तरि लट्. मपु. एक.	त्वम्	युष्मद्- द. सर्व.प्र. एक.
एवम्	अव्ययम्	शोचितुम्	अव्ययम्

न	अव्ययम्	अर्हसि	अर्ह् (अर्ह पूजायाम्) पर. कर्तरि लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	चैनम्	च + एनम्	वृद्धिसन्धिः ।
	तथापि	तथा + अपि	सवर्णदीर्घसन्धिः ।
(ख) समासः	नित्यजातम्	नित्यं जातः नित्यजातः, तम् - सुप्समासः ।	
(ग) कृदन्तः	जातम्	जन् (जनी प्रादुर्भावे) + क्त (कर्तरि) जातः, तम् ।	
	मृतम्	मृ (मृङ् प्राणत्यागे) + क्त (कर्तरि), मृतः, तम् ।	

भावस्पष्टीकरणम् -

मन्यसे ।	
कं मन्यसे ?	**एनं** मन्यसे ।
एनं **कीदृशं** मन्यसे ?	एनं **नित्यजातं** मन्यसे ।
एनं नित्यजातं **पुनश्च कीदृशं** मन्यसे ?	एनं नित्यजातं **नित्यं वा मृतं** मन्यसे ।
अथ च एनं नित्यजातं नित्यं वा मृतं मन्यसे **तथापि एवं** न अर्हसि ।	
तथापि एवम् **किं कर्तुं** न अर्हसि ?	तथापि एवं **शोचितुं** न अर्हसि ?
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो !**

तात्पर्यम् - हे अर्जुन ! यदि पुनः त्वम् अयम् आत्मा सर्वदा जायते इति सर्वदा म्रियते इति वा मन्यसे तथापि एवं शोकम् अनुभवितुं नार्हसि । (यतो हि तत्सर्वं स्वाभाविकम् अस्ति ।)

जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥२.२७॥

पदच्छेदः - जातस्य, हि, ध्रुवः, मृत्युः, ध्रुवम्, जन्म, मृतस्य, च ।
तस्मात्, अपरिहार्ये, अर्थे, न, त्वम्, शोचितुम्, अर्हसि ॥

अन्वयः - जातस्य हि मृत्युः ध्रुवः । मृतस्य च जन्म ध्रुवम् । तस्मात् अपरिहार्ये अर्थे त्वं शोचितुं न अर्हसि ।

पदार्थः - जातस्य = उत्पन्नस्य, हि = एव, मृत्युः = मरणम्, ध्रुवः = निश्चितम्, मृतस्य च = नष्टस्य च, जन्म =

उत्पत्तिः, ध्रुवम् = निश्चिता, तस्मात् = ततः, अपरिहार्ये = परिहर्तुम् अयोग्ये, अर्थे = विषये, त्वम् = त्वम्, शोचितुम् = दुःखितुम्, न अर्हसि = न योग्यः भवसि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जातस्य	अ. पुं. ष. एक. (विशेषणम्)	हि	अव्ययम्
मृत्युः	उ. पुं. प्र. एक.	ध्रुवः	अ. पुं. प्र. एक. (विशेषणम्)
मृतस्य	अ. पुं. ष. एक. (विशेषणम्)	च	अव्ययम्
जन्म	जन्मन् - न. नपुं. प्र. एक. (विशेष्यम्)	ध्रुवम्	अ. नपुं. प्र. एक. (विशेषणम्)
तस्मात्	तद् - द. सर्व. पं. एक.	अपरिहार्ये	अ. पुं. स. एक. (विशेषणम्)
अर्थे	अ. पुं. स. एक. (विशेष्यम्)	त्वम्	युष्मद्- द. सर्व. प्र. एक.
शोचितुम्	तुमुन्नन्तम् अव्ययम्	न	अव्ययम्
अर्हसि	अर्ह् (अर्ह पूजायाम्) पर. कर्तरि लट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः

ध्रुवो मृत्युः	ध्रुवः + मृत्युः	विसर्गसन्धिः, रेफः, उकारः, गुणः।
मृत्युर्ध्रुवम्	मृत्युः + ध्रुवम्	विसर्गसन्धिः (रेफः)।
तस्मादपरिहार्ये	तस्मात् + अपरिहार्ये	जश्त्वसन्धिः।
अपरिहार्येऽर्थे	अपरिहार्ये + अर्थे	पूर्वरूपसन्धिः।

(ख) समासः अपरिहार्ये — न परिहार्यः अपरिहार्यः, तस्मिन् - नञ्तत्पुरुषः।

(ग) कृदन्तः

जातस्य	जन् (जनी प्रादुर्भावे) + क्त (कर्तरि), तस्य।
मृतस्य	मृ (मृङ् प्राणत्यागे) क्त (कर्तरि), तस्य।
परिहार्ये	परि + हृ (हृञ् हरणे) + ण्यत् (कर्मणि) तस्मिन् ।
शोचितुम्	शुच् (शुच शोके) + तुमुन्।

भावस्पष्टीकरणम् -

त्वं न अर्हसि ?	
त्वं **किं कर्तुं** न अर्हसि ?	त्वं **शोचितुं** न अर्हसि।
कस्मिन् त्वं शोचितुं न अर्हसि ?	**अर्थे** त्वं शोचितुं न अर्हसि।

कीदृशे अर्थे त्वं शोचितुं न अर्हसि ?	**अपरिहार्ये अर्थे** त्वं शोचितुं न अर्हसि ।
कस्मात् अपरिहार्ये अर्थे त्वं शोचितुं न अर्हसि ?	**तस्मात्** अपरिहार्ये अर्थे त्वं शोचितुं न अर्हसि ।
मृत्युः ध्रुवः, जन्म ध्रुवम्, तस्मात् अपरिहार्ये अर्थे त्वं शोचितुं न अर्हसि ।	
कस्य मृत्युः ध्रुवः? **कस्य च** जन्म ध्रुवम्? यस्मात् अपरिहार्ये अर्थे त्वं शोचितुं न अर्हसि ?	**जातस्य** मृत्युः ध्रुवः, **मृतस्य च** जन्म ध्रुवम्, तस्मात् अपरिहार्ये अर्थे त्वं शोचितुं न अर्हसि ।

तात्पर्यम् - यः जायते तस्य मरणं निश्चितम् । एवं यः म्रियते तस्यापि पुनः जन्म निश्चितम् । एवं सति अस्मिन् विषये त्वं शोचितुं न अर्हसि । (कस्यचिदपि जननमरणयोः विषये चिन्तयित्वा शोकं मा कुरु । त्वं तान् न मारयसि चेदपि तेषां मृत्युः, अपरयोन्यां तेषां जन्म च निश्चिते एव स्तः । अतः एतत् तु अपरिहार्यम् अस्ति इति ज्ञात्वा युद्धं कुरु ।)

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥२.२८॥

पदच्छेदः - अव्यक्तादीनि, भूतानि, व्यक्तमध्यानि, भारत ।
अव्यक्तनिधनानि, एव, तत्र, का, परिदेवना ॥

अन्वयः - भारत ! भूतानि अव्यक्तादीनि व्यक्तमध्यानि अव्यक्तनिधनानि एव । तत्र का परिदेवना ?

पदार्थः - भारत = अर्जुन ! भूतानि = प्राणिनः, अव्यक्तादीनि = अप्रकटमूलानि, व्यक्तमध्यानि = प्रकटमध्यानि, अव्यक्तनिधनानि एव = अप्रकटान्तानि एव, तत्र = तस्मिन् विषये, का परिदेवना = किं वा आक्रन्दनम् ?

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	भूतानि	अ. नपुं. प्र. बहु. (विशेषणम्)
अव्यक्तादीनि	इ. नपुं. प्र. बहु. (विशेषणम्)	व्यक्तमध्यानि	अ. नपुं. प्र. बहु. (विशेषणम्)
अव्यक्तनिधनानि	अ. नपुं. प्र. बहु. (विशेषणम्)	एव	अव्ययम्
तत्र	अव्ययम्	का	किम् - म. सर्व. स्त्री. प्र. एक. (विशेषणम्)
परिदेवना	आ. स्त्री. प्र. एक. (विशेषणम्)		

व्याकरणम् -

(क) सन्धिः अव्यक्तनिधनान्येव अव्यक्तनिधनानि + एव यण्सन्धिः ।

(ख) समासः अव्यक्तादीनि — अव्यक्तः आदिः येषां तानि - बहुव्रीहिः ।
व्यक्तमध्यानि — व्यक्तं मध्यं येषां तानि - बहुव्रीहिः ।
अव्यक्तनिधनानि — अव्यक्तं निधनं येषां तानि - बहुव्रीहिः ।

(ग) कृदन्तः परिदेवना — परि + दिव् (देवृ देवने) + णिच् + युच् (भावे) ।
भूतानि — भू (भू सत्तायाम्) + क्त, तानि (कर्तरि) ।

भावस्पष्टीकरणम् -

भूतानि ।	
भूतानि **कीदृशानि** ?	भूतानि **अव्यक्तादीनि ।**
भूतानि अव्यक्तादीनि **पुनश्च कीदृशानि** ?	भूतानि अव्यक्तादीनि **व्यक्तमध्यानि ।**
भूतानि अव्यक्तादीनि व्यक्तमध्यानि **पुनश्च कीदृशानि एव** ?	भूतानि अव्यक्तादीनि व्यक्तमध्यानि **अव्यक्तनिधनानि एव ।**
भूतानि अव्यक्तादीनि व्यक्तमध्यानि अव्यक्तनिधनानि एव । (अतः) **का परिदेवना** ?	
कुत्र का परिदेवना ?	**तत्र** का परिदेवना ?

तात्पर्यम् - भूतानाम् आदिः अव्यक्तः वर्तते । अन्तः अपि अव्यक्तः वर्तते । इहलोके अनुभवगोचराणि भवन्ति इति हेतोः मध्यमात्रं तु व्यक्तं दृश्यते । एवं सति तादृशेषु भूतेषु आक्रन्दनेन किं प्रयोजनम् ?

आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥२.२९॥

पदच्छेदः - आश्चर्यवत्, पश्यति, कश्चित्, एनम्, आश्चर्यवत्, वदति, तथा, एव, च, अन्यः ।
आश्चर्यवत्, च, एनम्, अन्यः, शृणोति, श्रुत्वा, अपि, एनम्, वेद, न, च, एव, कश्चित् ॥

अन्वयः कश्चित् एनम् आश्चर्यवत् पश्यति तथा एव अन्यः च आश्चर्यवत् वदति, अन्यः च एनम् आश्चर्यवत् शृणोति । कश्चित् एनं श्रुत्वा अपि न च एव वेद ।

पदार्थः - कश्चित् = कोऽपि पुरुषः, एनम् = आत्मानम्, आश्चर्यवत् = अद्भुतम् इव, पश्यति = वीक्षते, तथा एव = एवम्, अन्यः च = अपरः पुरुषोऽपि, आश्चर्यवत् = अद्भुतम् इव, वदति = कथयति, अन्यः च = अपरः पुरुषोऽपि, एनम् = आत्मानम्, आश्चर्यवत् = अद्भुतम् इव, शृणोति = आकर्णयति, कश्चित् = कोऽपि, एनम् = आत्मानम्, श्रुत्वा अपि = आकर्ण्य अपि, न च एव वेद = न जानाति एव ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कश्चित्	अव्ययम्	एनम्	एतद्- द. सर्व. पुं.द्वि. एक. (विशेषणम्)
आश्चर्यवत्	अव्ययम्	पश्यति	दृश् (दृशिर् प्रेक्षणे) पर. कर्तरि लट्. प्रपु. एक.
तथा	अव्ययम्	एव	अव्ययम्
अन्यः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)	च	अव्ययम्
वदति	वद् (वद व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. एक.	एनम्	एतद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)
शृणोति	श्रु (श्रु श्रवणे) पर. कर्तरि लट्. प्रपु.	श्रुत्वा	क्त्वान्तम् अव्ययम्
अपि	अव्ययम्	न	अव्ययम्
वेद	विद् (विद ज्ञाने) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	कश्चिदेनम्	कश्चित् + एनम्	जश्त्वसन्धिः ।
	आश्चर्यवद्वदति	आश्चर्यवत् + वदति	जश्त्वसन्धिः ।
	तथैव	तथा + एव	वृद्धिसन्धिः ।
	चान्यः	च + अन्यः	सवर्णदीर्घसन्धिः ।
	आश्चर्यवच्च	आश्चर्यवत् + च	श्चुत्वसन्धिः ।
	चैनम्	च + एनम्	वृद्धिसन्धिः ।
	श्रुत्वापि	श्रुत्वा + अपि	सवर्णदीर्घसन्धिः ।
	अप्येनम्	अपि + एनम्	यण्सन्धिः ।
	चैव	च + एव	वृद्धिसन्धिः ।
(ख) कृदन्तः	श्रुत्वा	श्रु (श्रु श्रवणे) + क्त्वा ।	
(ग) तद्धितान्तः	आश्चर्यवत्	आश्चर्य + वति । आश्चर्येण तुल्यं पश्यति इत्यर्थे ।	

भावस्पष्टीकरणम् -

पश्यति ।	
कः पश्यति ?	**कश्चित् पश्यति ।**

कश्चित् **कं** पश्यति ?	कश्चित् **एनं** पश्यति।
कश्चित् एनं **कथं** पश्यति ?	कश्चित् एनम् **आश्चर्यवत्** पश्यति।
तथा एव वदति।	
तथा एव **कः** वदति ?	तथा एव **अन्यः** वदति।
तथा एव अन्यः च **कथं** वदति ?	तथा एव अन्यः च **आश्चर्यवत्** वदति।
शृणोति।	
कः शृणोति ?	**अन्यः** शृणोति।
अन्यः **कं** शृणोति ?	अन्यः **एनं** शृणोति।
तथा एव अन्यः च एनं **कथं** शृणोति ?	अन्यः च एनम् **आश्चर्यवत्** शृणोति।
न वेद।	
कः न वेद ?	**कश्चित्** न वेद।
कश्चित् **कं** न वेद ?	कश्चित् **एनं** न वेद।
कश्चित् **किं** कृत्वा एनं न वेद ?	कश्चित् **श्रुत्वा** अपि एनं न वेद।

तात्पर्यम् - कश्चित् एनम् आत्मानम् अद्भुतम् इव पश्यति। अन्यः कश्चन एनम् अद्भुतम् इव वदति। अपरः एनम् अद्भुतम् इव शृणोति। अन्यस्तु श्रुत्वा अपि एनं नैव जानाति।

देही नित्यमवध्योऽयं देहे सर्वस्य भारत।
तस्मात्सर्वाणि भूतानि न त्वं शोचितुम् अर्हसि॥२.३०॥

पदच्छेदः - देही, नित्यम्, अवध्यः, अयम्, देहे, सर्वस्य, भारत।
तस्मात्, सर्वाणि, भूतानि, न, त्वम्, शोचितुम्, अर्हसि॥

अन्वयः - भारत ! अयं देही सर्वस्य देहे नित्यम् अवध्यः। तस्मात् सर्वाणि भूतानि त्वं शोचितुं न अर्हसि।

पदार्थः - भारत = अर्जुन ! अयम् = एषः, देही = आत्मा, सर्वस्य = समग्रस्य, देहे = शरीरे, नित्यम् = सर्वदा, अवध्यः = हन्तुम् अशक्यः, तस्मात् = ततः हेतोः, सर्वाणि = सकलानि, भूतानि = प्राणिनः, त्वं शोचितुम् = त्वं दुःखं कर्तुम्, न अर्हसि = न शक्नोषि॥

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	अयम्	इदम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)
देही	देहिन् - न. पुं. प्र. एक. (विशेष्यम्)	सर्वस्य	अ. सर्व. पुं. ष. एक.
देहे	अ. पुं. स. एक.	नित्यम्	अ. नपु. द्वि. एक. (क्रियाविशेषणम्)
अवध्यः	अ. पुं. प्र. एक. (विशेषणम्)	तस्मात्	तद् - द. सर्व. पं. एक. (विशेषणम्)
सर्वाणि	अ. सर्व. नपुं. द्वि. बहु. (विशेषणम्)	भूतानि	अ. नपुं. द्वि. बहु. (विशेष्यम्)
त्वम्	युष्मद् - द. सर्व. प्र. एक.	शोचितुम्	तुमुन्नन्तम् अव्ययम्
अर्हसि	अर्ह् (अर्ह पूजायाम्) पर. कर्तरि लट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः अवध्योऽयम् — अवध्यः + अयम् — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः अवध्यः — न + वध्यः अवध्यः - नञ्तत्पुरुषसमासः ।

(ग) कृदन्तः देहे — दिह् (दिह उपचये) + घञ्, देहः, तस्मिन् ।

भूतानि — भू (भू सत्तायाम्) + क्त (कर्तरि) भूतम्, तानि ।

शोचितुम् — शुच् (शुच शोके) + तुमुन् ।

(घ) तद्धितान्तः वध्यः — वध + यत् (वधम् अर्हति इति)

भारत — भरत+ अण् (अपत्यार्थे), भरतस्य अपत्यं पुमान् भारतः, तत्सम्बुद्धौ ।

देही — देह + इनि (मतुबर्थे) देहः अस्य अस्मिन् वा अस्ति ।

भावस्पष्टीकरणम् -

अवध्यः ।	
कः अवध्यः ?	**देही** अवध्यः ।
कः देही अवध्यः ?	**अयं** देही अवध्यः ।
अयं देही **कदा** अवध्यः?	अयं देही **नित्यम्** अवध्यः ।
अयं देही नित्यं **कुत्र** अवध्यः ?	अयं देही नित्यं **देहे** अवध्यः ।
अयं देही नित्यं **कस्य** देहे अवध्यः ?	अयं देही नित्यं **सर्वस्य** देहे अवध्यः ।

अयं देही नित्यं सर्वस्य देहे अवध्यः । **तस्मात् त्वं न अर्हसि ।**	
तस्मात् त्वं **किं कर्तुं** न अर्हसि ?	तस्मात् त्वं **शोचितुं** न अर्हसि ।
तस्मात् त्वं **कानि** शोचितुं न अर्हसि ?	तस्मात् त्वं **भूतानि** शोचितुं न अर्हसि ।
तस्मात् त्वं **कानि** भूतानि शोचितुं न अर्हसि ?	तस्मात् त्वं **सर्वाणि** भूतानि शोचितुं न अर्हसि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत !**

तात्पर्यम् - अयम् आत्मा सर्वासु अपि अवस्थासु अवध्यः । परन्तु सः नित्यं स्थावरादिषु सर्वेषु अपि स्थितः । देहे वध्यमानेऽपि सः देही अवध्यः इत्यतः त्वम् एतानि भूतानि प्रति शोचितुं नार्हसि ।

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥२.३१॥

पदच्छेदः - स्वधर्मम्, अपि, च, अवेक्ष्य, न, विकम्पितुम्, अर्हसि ।
धर्म्यात्, हि, युद्धात्, श्रेयः, अन्यत्, क्षत्रियस्य, न, विद्यते ॥

अन्वयः - स्वधर्मं च अवेक्ष्य अपि विकम्पितुं न अर्हसि । क्षत्रियस्य हि धर्म्यात् युद्धात् अन्यत् श्रेयः न विद्यते ।

पदार्थः - स्वधर्मं च = स्वस्य कर्तव्यं च, अवेक्ष्य अपि = विलोक्य अपि, विकम्पितुम् = चलितुम्, न अर्हसि = न अर्हसि, क्षत्रियस्य = क्षत्रियकुलोद्भवस्य, धर्म्यात् = धर्मानुकूलात्, युद्धात् = रणात्, अन्यत् श्रेयः = अपरं हितम्, न विद्यते = नास्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
स्वधर्मम्	अ. पुं. द्वि. एक.	च	अव्ययम्
अवेक्ष्य	ल्यबन्तम् अव्ययम्	अपि	अव्ययम्
विकम्पितुम्	तुमुन्नन्तम् अव्ययम्	न	अव्ययम्
अर्हसि	अर्ह् (अर्ह पूजायाम्) पर. कर्तरि लट् मपु. एक.	क्षत्रियस्य	अ. पुं. ष. एक.
हि	अव्ययम्	धर्म्यात्	अ. नपुं. पं. एक. (विशेषणम्)
युद्धात्	अ. नपुं. पं. एक. (विशेष्यम्)	अन्यत्	अ. सर्व. नपुं. प्र. एक.

श्रेयः	श्रेयस् - स. नपुं. प्र. एक.	विद्यते	विद् (विद सत्तायाम्) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	चावेक्ष्य	च + अवेक्ष्य	सवर्णदीर्घसन्धिः ।
	धर्म्याद्धि	धर्म्यात् + हि	पूर्वसवर्णसन्धिः ।
	युद्धाच्छ्रेयः	युद्धात् + श्रेयः	श्चुत्वम्, छत्वसन्धिः ।
	युद्धाच्छ्रेयोऽन्यत्	युद्धाच्छ्रेयः + अन्यत्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।
(ख) समासः	स्वधर्मम्	स्वस्य धर्मः स्वधर्मः, तम्, षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	अवेक्ष्य	अव + ईक्ष् (ईक्ष दर्शने) + ल्यप् ।	
	विकम्पितुम्	वि + कम्प (कपि चलने) + तुमुन् ।	
(घ) तद्धितान्तः	धर्म्यात्	धर्म + यत् (अनपेतार्थे) धर्मात् अनपेतम्, धन्यम्, तस्मात् । धर्मयुक्तम् इत्यर्थः	
	क्षत्रियस्य	क्षत्र + घ (जातौ अपत्यार्थे) क्षत्रस्य अपत्यम्, क्षत्रियः, तस्य ।	
	श्रेयः	प्रशस्य + ईयसुन् (अतिशयार्थे) प्रशस्यतरम् इत्यर्थः ।	

भावस्पष्टीकरणम् -

न अर्हसि ।	
किं कर्तुं न अर्हसि ?	**विकम्पितुं** न अर्हसि ।
किं कृत्वा विकम्पितुं न अर्हसि ?	**अवेक्ष्य** विकम्पितुं न अर्हसि ।
कम् अवेक्ष्य विकम्पितुं न अर्हसि ?	**स्वधर्मम्** अवेक्ष्य विकम्पितुं न अर्हसि ।
न विद्यते ।	
किं न विद्यते ?	**श्रेयः** हि न विद्यते ।
किं श्रेयः हि न विद्यते ?	**अन्यत्** श्रेयः हि न विद्यते ।
कस्मात् अन्यत् श्रेयः न विद्यते ?	**युद्धात्** अन्यत् श्रेयः न विद्यते ।
कस्य युद्धात् अन्यत् श्रेयः न विद्यते ?	**क्षत्रियस्य** युद्धात् अन्यत् श्रेयः न विद्यते ।

तात्पर्यम् - स्वधर्मः चिन्त्यते चेदपि त्वया न भेत्तव्यम् । यतः क्षत्रियस्य धर्म्यात् युद्धात् अन्यत् श्रेयः न विद्यते । अतः स्वस्य हितम् इच्छता त्वया युद्धम् अवश्यं कर्तव्यम् ।

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम्।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम्॥२.३२॥

पदच्छेदः - यदृच्छया, च, उपपन्नम्, स्वर्गद्वारम्, अपावृतम्।
सुखिनः, क्षत्रियाः, पार्थ, लभन्ते, युद्धम्, ईदृशम्॥

अन्वयः - पार्थ ! यदृच्छया उपपन्नम् अपावृतं च स्वर्गद्वारम् ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते।

पदार्थः - पार्थ = अर्जुन ! यदृच्छया = स्वेच्छया, उपपन्नम् = प्राप्तम्, अपावृतं च = उद्घाटितं च, स्वर्गद्वारम् = स्वर्गस्य द्वारम्, ईदृशम् = एतादृशम्, युद्धम् = संग्रामम्, सुखिनः = सुखशालिनः, क्षत्रियाः = राजानः, लभन्ते = प्राप्नुवन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	यदृच्छया	आ. स्त्री. तृ. एक.
उपपन्नम्	अ. नपुं. द्वि. एक. (विशेषणम्)	अपावृतम्	अ. नपुं. द्वि. एक. (विशेषणम्)
च	अव्ययम्	स्वर्गद्वारम्	अ. नपुं. द्वि. एक. (विशेषणम्)
ईदृशम्	अ. नपुं. द्वि. एक. (विशेषणम्)	युद्धम्	अ. नपुं. द्वि. एक. (विशेषणम्)
सुखिनः	सुखिन् - न. पुं. प्र. बहु. (विशेषणम्)	क्षत्रियाः	अ. पुं. प्र. बहु. (विशेष्यम्)
लभन्ते	लभ् (डुलभष् प्राप्तौ) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः चोपपन्नम् — च + उपपन्नम् - गुणसन्धिः।

(ख) समासः स्वर्गद्वारम् — स्वर्गस्य द्वारं स्वर्गद्वारम्, तत् - षष्ठीतत्पुरुषः।

(ग) कृदन्तः उपपन्नम् — उप + पद् (पद गतौ) + क्त (कर्तरि)।
अपावृतम् — अप + आ + वृ (वृञ् वरणे) + क्त (कर्मणि)।

(घ) तद्धितान्तः सुखिनः — सुख + इन् (मतुबर्थे) सुखम् अस्य अस्मिन् वा अस्ति इति।
क्षत्रियाः — क्षत्र + घञ् (जातौ अपत्यार्थे) क्षत्रस्य अपत्यानि पुमांसः, ते।
पार्थ — पृथा + अण् (अपत्यार्थे) पृथायाः अपत्यम् पुमान् पार्थः, तत्सम्बुद्धौ।

भावस्पष्टीकरणम् -

लभन्ते।	
के लभन्ते ?	**क्षत्रियाः** लभन्ते।
कीदृशाः क्षत्रियाः लभन्ते ?	**सुखिनः** क्षत्रियाः लभन्ते।
किं सुखिनः क्षत्रियाः लभन्ते ?	**युद्धं** सुखिनः क्षत्रियाः लभन्ते।
कीदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते ?	**ईदृशं** युद्धं सुखिनः क्षत्रियाः लभन्ते।
किंरूपम् ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते ?	**स्वर्गद्वारम्** ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते ?
कीदृशं स्वर्गद्वारम् ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते ?	**अपावृतं** स्वर्गद्वारम् ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते।
किम्भूतम् अपावृतं स्वर्गद्वारम् ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते ?	**उपपन्नम्** अपावृतं स्वर्गद्वारम् ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते।
कथम् उपपन्नम् अपावृतं स्वर्गद्वारम् ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते ?	**यदृच्छया** उपपन्नम् अपावृतं स्वर्गद्वारम् ईदृशं युद्धं सुखिनः क्षत्रियाः लभन्ते।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - हे अर्जुन ! इदं युद्धं त्वया यदृच्छया प्राप्तम् अस्ति। वस्तुतः इदं युद्धं नहि, अपि तु उद्घाटितं स्वर्गद्वारम् इति भावय। ईदृशं युद्धं पुण्यशालिनः एव प्राप्नुवन्ति।

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥२. ३३॥

पदच्छेदः - अथ चेत्, त्वम्, इमम्, धर्म्यम्, संग्रामम्, न, करिष्यसि।
ततः, स्वधर्मम्, कीर्तिम्, च, हित्वा, पापम्, अवाप्स्यसि ॥

अन्वयः - अथ चेत् त्वम् इमं धर्म्यं संग्रामं न करिष्यसि ततः स्वधर्मं कीर्तिं च हित्वा पापम् अवाप्स्यसि।

पदार्थः - अथ = युद्धारम्भानन्तरम्, चेत् = यदि, त्वम् इमम् = त्वम् एनम्, धर्म्यम् = धर्मयुक्तम्, संग्रामम् = युद्धम्, न करिष्यसि = न आचरिष्यसि, ततः = तर्हि, स्वधर्मम् = स्वकीयं धर्मम्, कीर्तिं च = यशः च. हित्वा = त्यक्त्वा, पापम् = किल्बिषम्, अवाप्स्यसि = प्राप्स्यसि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अथ	अव्ययम्	चेत्	अव्ययम्
त्वम्	युष्मद् - द. सर्व. प्र. एक.	इमम्	इदम् - म. सर्व. पुं. द्वि. एक. (विशेषणम्)
धर्म्यम्	अ. पुं. द्वि. एक. (विशेषणम्)	संग्रामम्	अ. पुं. द्वि. एक. (विशेष्यम्)
न	अव्ययम्	करिष्यसि	कृ (डुकृञ् करणे) पर. कर्तरि लृट्. मपु. एक.
ततः	अव्ययम्	स्वधर्मम्	अ. पुं. द्वि. एक.
कीर्तिम्	इ. स्त्री. द्वि. एक.	च	अव्ययम्
हित्वा	क्त्वान्तम् अव्ययम्	पापम्	अ. नपुं. द्वि. एक.
अवाप्स्यसि	अव् + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लृट्. मपु. एक.		

व्याकरणम् -

(क) समासः स्वधर्मम् — स्वस्य धर्मः स्वधर्मः, तम् - षष्ठीतत्पुरुषः ।

(ख) कृदन्तः कीर्तिम् — कीर्त् (कॄ विक्षेपे) + क्तिन्, ताम् ।

हित्वा — हा (ओहाक् त्यागे) + क्त्वा ।

(ग) तद्धितान्तः धर्म्यम् — धर्म + यत् (अनपेतार्थे) धर्मात् अनपेतः धर्म्यः, तम् । धर्मयुक्तम् इत्यर्थः ।

भावस्पष्टीकरणम् -

न करिष्यसि ।	
कं न करिष्यसि ?	**संग्रामं** न करिष्यसि ।
कं संग्रामं न करिष्यसि ?	**इमं** संग्रामं न करिष्यसि ।
इमं **कीदृशं** संग्रामं न करिष्यसि ?	इमं **धर्म्यं** संग्रामं न करिष्यसि ।
कः इमं धर्म्यं संग्रामं न करिष्यसि ?	**त्वम्** इमं धर्म्यं संग्रामं न करिष्यसि ।
अथ चेत् त्वम् इमं धर्म्यं संग्रामं न करिष्यसि **ततः किं भवति** ?	**अथ चेत्** त्वम् इमं धर्म्यं संग्रामं न करिष्यसि **ततः अवाप्स्यसि ।**
ततः **किम्** अवाप्स्यसि ?	ततः **पापम्** अवाप्स्यसि ।
ततः **किं कृत्वा** पापम् अवाप्स्यसि ?	ततः **हित्वा** पापम् अवाप्स्यसि ।

ततः **कं** हित्वा पापम् अवाप्स्यसि ?	ततः **स्वधर्मं** हित्वा पापम् अवाप्स्यसि ।
ततः स्वधर्मं **पुनश्च कां** हित्वा पापम् अवाप्स्यसि ?	ततः स्वधर्मं **कीर्तिं च** हित्वा पापम् अवाप्स्यसि ।

तात्पर्यम् - हे अर्जुन ! इदानीं तव धर्म्यं युद्धं प्राप्तमस्ति । यदि त्वम् एतद् युद्धं न करिष्यसि तर्हि आत्मधर्मात् च्युतः भविष्यसि । तव अपकीर्तिः भविष्यति । एतेन त्वं पापमपि अवाप्स्यसि ।

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥२.३४॥

पदच्छेदः - अकीर्तिम्, च, अपि, भूतानि, कथयिष्यन्ति, ते, अव्ययाम् ।
सम्भावितस्य, च, अकीर्तिः, मरणाद्, अतिरिच्यते ॥

अन्वयः - भूतानि ते अव्ययाम् अकीर्तिं चापि कथयिष्यन्ति । सम्भावितस्य च अकीर्तिः मरणात् अतिरिच्यते ।

पदार्थः - भूतानि = जनाः, ते = तव, अव्ययाम् = अनश्वरीम्, अकीर्तिं च अपि = दुष्कीर्तिं च, कथयिष्यन्ति = वर्णयिष्यन्ति, सम्भावितस्य = मान्यस्य जनस्य च, अकीर्तिः = दुष्कीर्तिः, मरणात् = मृत्योः अपि, अतिरिच्यते = श्रेष्ठः भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भूतानि	अ. नपुं. प्र. बहु.	ते	तद् - द. सर्व. ष. एक.
अव्ययाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	अकीर्तिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
च	अव्ययम्	अपि	अव्ययम्
कथयिष्यन्ति	कथ (कथ वाक्यप्रबन्धे) पर. कर्तरि लृट्. प्रपु. बहु.	सम्भावितस्य	अ. पुं. ष. एक.
अकीर्तिः	इ. स्त्री. प्र. एक.	मरणात्	अ. पुं. पं. एक.
अतिरिच्यते	अति + रिच् (रिचिर् विरेचने) आत्म. कर्मकर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	चापि	च + अपि	सवर्णदीर्घसन्धिः ।
	तेऽव्ययाम्	ते + अव्ययाम्	पूर्वरूपसन्धिः ।
	चाकीर्तिः	च + अकीर्तिः	सवर्णदीर्घसन्धिः ।

	अकीर्तिर्मरणात्	अकीर्तिः + मरणात्	विसर्गसन्धिः(रेफः)।
	मरणादतिरिच्यते	मरणात् + अतिरिच्यते	जश्त्वसन्धिः ।
(ख) समासः	अव्ययाम्	न व्ययः यस्याः सा अव्यया, ताम् - बहुव्रीहिः।	
	अकीर्तिः	न कीर्तिः अकीर्तिः - नञ्-तत्पुरुषः	
(ग) कृदन्तः	भूतानि	भू (भू सत्तायाम्) + क्त (कर्तरि), तानि।	
	सम्भावितस्य	सम् + भू (भू सत्तायाम्) + णिच् + क्त (कर्मणि), तस्य।	
	कीर्तिः	कीर्त् (कृत संशब्दने) + क्तिन्।	
	मरणात्	मृ (मृङ् प्राणत्यागे) + ल्युट्, तस्मात्।	

भावस्पष्टीकरणम् -

कथयिष्यन्ति।	
कां कथयिष्यन्ति ?	**अकीर्तिं** कथयिष्यन्ति।
कीदृशीम् अकीर्तिं कथयिष्यन्ति ?	**अव्ययाम्** अकीर्तिं कथयिष्यन्ति।
कानि अव्ययाम् अकीर्तिं कथयिष्यन्ति ?	**भूतानि** अव्ययाम् अकीर्तिं कथयिष्यन्ति।
भूतानि **कस्य** अव्ययाम् अकीर्तिं कथयिष्यन्ति ?	भूतानि **ते** अव्ययाम् अकीर्तिं कथयिष्यन्ति।
अतिरिच्यते।	
का अतिरिच्यते ?	**अकीर्तिः** अतिरिच्यते।
अकीर्तिः **कस्मात्** अपि अतिरिच्यते ?	अकीर्तिः **मरणात्** अपि अतिरिच्यते।
कस्य अकीर्तिः मरणात् अपि अतिरिच्यते ?	**सम्भावितस्य** च अकीर्तिः मरणात् अपि अतिरिच्यते।

तात्पर्यम् - यदि त्वं युद्धं न करिष्यसि तर्हि जनाः दीर्घकालं यावत् तव अकीर्तिं कथयिष्यन्ति। (तव निन्दनं करिष्यन्ति, तेन भवतः अपकीर्तिः भविष्यति)। सर्वैरपि प्रशंसनीयस्य मानिनः च जनस्य अपकीर्तिः मरणादपि अधिकां पीडां जनयति।

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम्॥२.३५॥

पदच्छेदः - भयात्, रणात्, उपरतम्, मंस्यन्ते, त्वाम्, महारथाः।
येषां च त्वम् बहुमतः भूत्वा यास्यसि लाघवम्॥

अन्वयः - येषां त्वं च बहुमतः भूत्वा लाघवं यास्यसि (तादृशाः) महारथाः च त्वां भयात् रणात् उपरतं मंस्यन्ते।

पदार्थः - येषाम् = येषां राज्ञाम्, त्वं बहुमतः = त्वं सम्मानितः, भूत्वा = भूत्वा, लाघवम् = अगौरवम्,

यास्यसि = प्राप्स्यसि, महारथाः च = ते महारथाः च, त्वाम् = त्वाम्, भयात् = भीतेः कारणात्, रणात् = युद्धात्, उपरतम् = विरतम्, मंस्यन्ते = चिन्तयिष्यन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
येषाम्	यद् - द. सर्व. ष. बहु. (विशेषणम्)	त्वम्	युष्मद् - द. सर्व. प्र. एक.
बहुमतः	अ. पुं. प्र. एक.	भूत्वा	क्त्वान्तम् अव्ययम्
लाघवम्	अ. नपुं. द्वि. एक.	यास्यसि	या (या प्रापणे) पर. कर्तरि लृट्. मपु. एक.
महारथाः	अ. पुं. प्र. बहु.	च	अव्ययम्
भयात्	अ. नपुं. पं. एक.	रणात्	अ. नपुं. पं. एक.
उपरतम्	अ. पुं. द्वि. एक.	मंस्यन्ते	मन् (मन ज्ञाने) आत्म. कर्तरि लृट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः	भयाद्रणादुपरतम्	भयात् + रणात्	जश्त्वसन्धिः ।
		रणात् + उपरतम्	जश्त्वसन्धिः ।
	बहुमतो भूत्वा		विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	महारथाः	महान्तः रथाः येषां ते बहुव्रीहिः ।	
	बहुमतः	बहूनां मतः - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	उपरतम्	उप + रम् (रमु क्रीडायाम्) + क्त (कर्तरि) ।	
	भूत्वा	भू (भू सत्तायाम्) + क्त्वा ।	
(घ) तद्धितान्तः	लाघवम्	लघु + अण् (भावे) । लघोः भावः इत्यर्थः ।	

भावस्पष्टीकरणम् -

त्वं यास्यसि ।	
त्वं **किं** यास्यसि ?	त्वं **लाघवं** यास्यसि ।
त्वं **किं कृत्वा** लाघवं यास्यसि ?	त्वं **भूत्वा** लाघवं यास्यसि ।
त्वं **कीदृशः** भूत्वा लाघवं यास्यसि ?	त्वं **बहुमतः** भूत्वा लाघवं यास्यसि ।
केषां त्वं बहुमतः भूत्वा लाघवं यास्यसि ?	**येषां** त्वं बहुमतः भूत्वा लाघवं यास्यसि ।
येषां त्वं बहुमतः भूत्वा लाघवं यास्यसि (तादृशाः) **किं कुर्वन्ति** ?	येषां त्वं बहुमतः भूत्वा लाघवं यास्यसि

(तादृशाः) **मंस्यन्ते ।**	
तादृशाः **के** मंस्यन्ते ?	तादृशाः **महारथाः** मंस्यन्ते ।
तादृशाः **कं** महारथाः मंस्यन्ते ?	तादृशाः **त्वां** महारथाः मंस्यन्ते ।
तादृशाः त्वां **कीदृशं** महारथाः मंस्यन्ते ?	तादृशाः त्वाम् **उपरतं** महारथाः मंस्यन्ते ।
तादृशाः त्वां **कस्मात्** उपरतं महारथाः मंस्यन्ते ?	तादृशाः त्वां **रणात्** उपरतं महारथाः मंस्यन्ते ।
तादृशाः त्वां **कस्मात् कारणात्** रणात् उपरतं महारथाः मंस्यन्ते ?	तादृशाः त्वां **भयात्** रणात् उपरतं महारथाः मंस्यन्ते ।

तात्पर्यम् - अद्य यावत् भवान् येषां महारथानां गौरवास्पदम् आसीत्, अधुना भवान् तेषां मध्ये लाघवं यास्यति । भवान् भयकारणेन रणात् निवर्तनं कृतवान् इति च ते भवतः विषये चिन्तयिष्यन्ति । (तस्मात् युद्धं कुरु ।)

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥२.३६॥

पदच्छेदः - अवाच्यवादान् च, बहून्, वदिष्यन्ति, तव, अहिताः ।
निन्दन्तः, तव, सामर्थ्यम्, ततः, दुःखतरम्, नु, किम् ॥

अन्वयः - तव अहिताः तव सामर्थ्यं निन्दन्तः बहून् अवाच्यवादान् वदिष्यन्ति । ततः दुःखतरं नु किम् ?

पदार्थः - तव = भवतः, अहिताः च = शत्रवः, तव = ते, सामर्थ्यम् = शक्तिम्, निन्दन्तः = दूषयन्तः, बहून् = नाना, अवाच्यवादान् = अवक्तव्यानि वचनानि, वदिष्यन्ति = कथयिष्यन्ति, ततः = तस्मात्, दुःखतरम् = क्लेशकारकम्, किम् नु = किम् अस्ति ?

पदपरिचयः -

पदम्	**विवरणम्**	**पदम्**	**विवरणम्**
तव	युष्मद् - द. सर्व. ष. एक.	अहिताः	अ. पुं. प्र. बहु.
सामर्थ्यम्	अ. नपुं. द्वि. एक.	निन्दन्तः	निन्दत् - त. पुं. प्र. बहु.
बहून्	उ. पुं. द्वि. बहु. (विशेषणम्)	अवाच्यवादान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
वदिष्यन्ति	वद् (वद व्यक्तायां वाचि) पर. कर्तरि लृट्. प्रपु. बहु.	ततः	अव्ययम्
दुःखतरम्	अ. नपुं. प्र. एक.	नु	अव्ययम्
किम्	किम् - म. सर्व. नपुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः	अवाच्यवादांश्च	अवाच्यवादान् + च	रुत्वम्, विसर्गः, अनुस्वारागमः, सत्वसन्धिः, श्चुत्वं च ।
	तवाहिताः	तव + अहिताः	सवर्णदीर्घसन्धिः ।
	निन्दन्तस्तव	निन्दन्तः + तव	विसर्गसन्धिः, सकारः ।
	ततो दुःखतरम्	ततः + दुःखतरम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	अवाच्यवादान्	न वाच्यः अवाच्यः - नञ्तत्पुरुषः । अवाच्याः वादाः अवाच्यवादाः, तान् - कर्मधारयः ।	
	अहिताः	न हिताः अहिताः - नञ् तत्पुरुषः ।	
(ग) कृदन्तः	निन्दन्तः	निन्द् (णिदि कुत्सायाम्) + शतृ (कर्तरि) ।	
	वादाः	वद (वद व्यक्तायां वाचि) + घञ् ।	
(घ) तद्धितान्तः	दुःखतरम्	दुःख + तरप् (अतिशये) ।	
	सामर्थ्यम्	समर्थ + ष्यञ् (भावार्थे) । समर्थस्य भावः इत्यर्थः ।	

भावस्पष्टीकरणम् -

वदिष्यन्ति ।	
के वदिष्यन्ति ?	**अहिताः** वदिष्यन्ति ।
कस्य अहिताः वदिष्यन्ति ?	**तव** अहिताः वदिष्यन्ति ।
तव अहिताः **कान्** वदिष्यन्ति ?	तव अहिताः **अवाच्यवादान्** वदिष्यन्ति ।
तव अहिताः **कियतः** अवाच्यवादान् वदिष्यन्ति ।	तव अहिताः **बहून्** अवाच्यवादान् वदिष्यन्ति ।
तव अहिताः **किं कुर्वन्तः** बहून् अवाच्यवादान् वदिष्यन्ति ?	तव अहिताः **निन्दन्तः** बहून् अवाच्यवादान् वदिष्यन्ति ।
तव अहिताः **किं** निन्दन्तः बहून् अवाच्यवादान् वदिष्यन्ति ?	तव अहिताः **सामर्थ्यं** निन्दन्तः बहून् अवाच्यवादान् वदिष्यन्ति ।
तव अहिताः **कस्य** सामर्थ्यं निन्दन्तः बहून् अवाच्यवादान् वदिष्यन्ति ?	तव अहिताः **तव** सामर्थ्यं निन्दन्तः बहून् अवाच्यवादान् वदिष्यन्ति ।
तव अहिताः तव सामर्थ्यं निन्दन्तः बहून् अवाच्यवादान् वदिष्यन्ति । इति उक्त्वा **श्रीकृष्णः अर्जुनं किं वदति ?**	तव अहिताः तव सामर्थ्यं निन्दन्तः बहून् अवाच्यवादान् वदिष्यन्ति । इति उक्त्वा श्रीकृष्णः अर्जुनं **ततो दुःखतरं नु किम्** ? इति वदति ।

तात्पर्यम् - श्रीकृष्णः तव अहिताः शत्रवः तव सामर्थ्यं निन्दन्तः बहूनि अवाच्यानि वचनानि तव विषये वदिष्यन्ति । ततः दुःखतरम् अन्यत् किं भवेत् ? इति वदति ।

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥२.३७॥

पदच्छेदः - हतः, वा, प्राप्स्यसि, स्वर्गम्, जित्वा, वा, भोक्ष्यसे, महीम्।
तस्मात्, उत्तिष्ठ, कौन्तेय, युद्धाय, कृतनिश्चयः ॥

अन्वयः - कौन्तेय ! हतः वा स्वर्गं प्राप्स्यसि। जित्वा वा (स्थितः) महीं भोक्ष्यसे। तस्मात् युद्धाय कृतनिश्चयः उत्तिष्ठ।

पदार्थः - कौन्तेय = अर्जुन ! हतः वा = मृतः चेत्, स्वर्गम् = स्वर्गलोकम्, प्राप्स्यसि = लप्स्यसे, जित्वा वा = जयं प्राप्य वा, महीम् = भूमिम्, भोक्ष्यसे = अनुभविष्यसि, तस्मात् = अतः, युद्धाय = योद्धुम्, कृतनिश्चयः = निश्चयं कृत्वा, उत्तिष्ठ = सन्नद्धो भव।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	हतः	अ. पुं. प्र. एक. (विशेषणम्)
वा	अव्ययम्	स्वर्गम्	अ. पुं. द्वि. एक.
प्राप्स्यसि	प्र + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लृट्. मपु. एक.	जित्वा	क्त्वान्तम् अव्ययम्
महीम्	ई. स्त्री. द्वि. एक.	भोक्ष्यसे	भुज् (भुज पालनाभ्यवहारयोः) आत्म. कर्तरि लृट्. मपु. एक.
तस्मात्	तद् - द. सर्व. पुं. पं. एक. (विशेषणम्)	युद्धाय	अ. नपुं. च. एक.
कृतनिश्चयः	अ. पुं. प्र. एक.	उत्तिष्ठ	उद् + स्था (ष्ठा गतिनिवृत्तौ) पर. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	हतो वा	हतः + वा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	तस्मादुत्तिष्ठ	तस्मात् + उत्तिष्ठ	जश्त्वसन्धिः।
(ख) समासः	कृतनिश्चयः	कृतः निश्चयः येन सः - बहुव्रीहिः।	
	हतः	हन् (हन हिंसागत्योः) + क्त (कर्मणि)।	
(ग) कृदन्तः	जित्वा	जि (जि जये) + त्वा।	
	महीम्	मह् + अच् +ङीष् (स्त्रीत्वे)।	
	युद्धाय	युध् (युध सम्प्रहारे) + क्त (कर्मणि)।	

	निश्चयः	निस् + चि (चिञ् चयने) + अप् (कर्तरि) ।
(घ) तद्धितम्	कौन्तेय	कुन्ती + ढक् (अपत्यार्थे) कुन्त्याः अपत्यं पुमान्, तत्सम्बुधौ ।

भावस्पष्टीकरणम् -

श्रीकृष्णः अर्जुनं **किं किं** वदति ?	श्रीकृष्णः अर्जुनं **हतो वा स्वर्गं प्राप्स्यसि, जित्वा वा अत्र स्थितः सन् महीं भोक्ष्यसे तस्मात् युद्धाय कृतनिश्चयः** त्वम् उत्तिष्ठ इति वदति
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - हे कुन्तीपुत्र ! युद्धे त्वं यदि म्रियसे तर्हि चिन्ता न कर्तव्या । यतः तेन त्वं स्वर्गं प्राप्स्यसि । यदि वा जयं प्राप्स्यसि तदा तु भूम्याः आधिपत्यं तव भविष्यति । उभयथापि तव श्रेयः एव भविष्यति । तस्मात् युद्धं करिष्यामि एव इति निश्चयं कृत्वा तदर्थं सन्नद्धो भव ।

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥२.३८॥

पदच्छेदः - सुखदुःखे, समे, कृत्वा, लाभालाभौ, जयाजयौ ।
ततः, युद्धाय, युज्यस्व, न, एवम्, पापम्, अवाप्स्यसि ॥

अन्वयः - सुखदुःखे लाभालाभौ जयाजयौ समे कृत्वा ततः युद्धाय युज्यस्व एवं (कृतं चेत्) पापं न अवाप्स्यसि ।

पदार्थः - सुखदुःखे = सन्तोषविषादौ, लाभालाभौ = लाभालाभौ, जयाजयौ = विजयपराजयौ, समे = समाने, कृत्वा = सम्भाव्य, ततः = तत्पश्चात्, युद्धाय = रणाय, युज्यस्व = सन्नद्धो भव, एवम् = इत्थं कृतं चेत्, पापम् = दोषम्, न = न, अवाप्स्यसि = प्राप्स्यसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सुखदुःखे	अ. नपुं. द्वि. द्विव. (विशेष्यम्)	समे	अ. नपुं. द्वि. द्विव. (विशेषणम्)
कृत्वा	क्त्वान्तम् अव्ययम्	लाभालाभौ	अ. पुं. द्वि. द्विव.
जयाजयौ	अ. पुं. द्वि. द्विव.	ततः	अव्ययम्
युद्धाय	अ. नपुं. च. एक.	युज्यस्व	युज् (युजिर् योगे) आत्म. कर्तरि लोट्. मपु. एक.
न	अव्ययम्	एवम्	अव्ययम्

पापम्	अ. नपुं. द्वि. एक.	अवाप्स्यसि	अव + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लृट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	ततो युद्धाय	ततः + युद्धाय	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	नैवम्	न + एवम्	वृद्धिसन्धिः।
(ख) समासः	सुखदुःखे	सुखं च दुःखं च सुखदुःखे - द्वन्द्वः।	
	लाभालाभौ	लाभः च अलाभः च, लाभालाभौ - द्वन्द्वः।	
	जयाजयौ	जयः च अजयः च जयाजयौ - द्वन्द्वः।	
(ग) कृदन्तः	कृत्वा	कृ (डुकृञ् करणे) + क्त्वा।	
	लाभः	लभ् (डुलभष् प्राप्तौ) + घञ्।	
	जयः	जि (जि जये) + अच्।	

भावस्पष्टीकरणम् -

न अवाप्स्यसि।	
किं न अवाप्स्यसि ?	**पापं** न अवाप्स्यसि।
कथं पापं न अवाप्स्यसि ?	**एवं** (कृतं चेत्) पापं न अवाप्स्यसि।
कुतः, एवं (कृतं चेत्) पापं न अवाप्स्यसि ?	**ततः युज्यस्व**, एवं कृतं चेत् पापं न अवाप्स्यसि।
ततः **कस्मै** युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि ?	ततः **युद्धाय** युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि ?
किं कृत्वा ततः युद्धाय युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि ?	**समे कृत्वा** ततः युद्धाय युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि।
के समे कृत्वा ततः युद्धाय युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि ?	**सुखदुःखे** समे कृत्वा ततः युद्धाय युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि।
सुखदुःखे **पुनश्च कौ** समे कृत्वा ततः युद्धाय युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि ?	सुखदुःखे **लाभालाभौ** समे कृत्वा ततः युद्धाय युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि।
सुखदुःखे लाभालाभौ **पुनश्च कौ** समे कृत्वा ततः युद्धाय युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि ?	सुखदुःखे लाभालाभौ **जयाजयौ** समे कृत्वा ततः युद्धाय युज्यस्व, एवं कृतं चेत् पापं न अवाप्स्यसि।

तात्पर्यम् - सुखदुःखे लाभालाभौ जयाजयौ च समे मत्त्वा ततः युद्धाय सन्नद्धो भव। एवं कृते सति त्वं पापं न अवाप्स्यसि। अर्थात् त्वम् अनासक्तभावेन न्याय्यं युद्धं कुरु तेन त्वं पापभाक् न भविष्यसि।

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥२.३९॥

पदच्छेदः - एषा, ते, अभिहिता, साङ्ख्ये, बुद्धिः, योगे, तु, इमाम्, शृणु।
बुद्ध्या, युक्तः, यया, पार्थ, कर्मबन्धम्, प्रहास्यसि ॥

अन्वयः - पार्थ ! एषा बुद्धिः ते साङ्ख्ये अभिहिता। योगे इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि।

पदार्थः - पार्थ = हे अर्जुन ! एषा = इयम्, बुद्धिः = मतिः, ते = भवते, साङ्ख्ये = ब्रह्मरूपे तत्त्वे, अभिहिता = निरूपिता, (अस्याः) योगे = अस्याः कर्मयोगे तु, इमाम् = एताम् (बुद्धिम्), शृणु = आकर्णय, यया = यया, बुद्ध्या = धिया, युक्तः = सहितः, कर्मबन्धम् = कर्मरूपबन्धनम्, प्रहास्यसि = त्यक्ष्यसि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	एषा	एतद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)
बुद्धिः	इ. स्त्री. प्र. एक. (विशेष्यम्)	ते	युष्मद्- द. सर्व. च. एक.
साङ्ख्ये	अ. नपुं. स. एक.	अभिहिता	आ. स्त्री. प्र. एक. (विशेषणम्)
योगे	अ. पुं. स. एक.	इमाम्	इदम्- म. सर्व. स्त्री. द्वि. एक. (विशेषणम्)
शृणु	श्रु (श्रु श्रवणे) पर. कर्तरि लोट्. मपु. एक.	यया	यद् - द. सर्व. स्त्री. तृ. एक. (विशेषणम्)
बुद्ध्या	इ. स्त्री. तृ. एक. (विशेष्यम्)	युक्तः	अ. पुं. प्र. एक. (विशेषणम्)
कर्मबन्धम्	अ. पुं. द्वि. एक.	प्रहास्यसि	प्र + हा (ओहाक् त्यागे) पर. कर्तरि लृट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	तेऽभिहिता	ते + अभिहिता	पूर्वरूपसन्धिः।
	बुद्धिर्योगे	बुद्धिः + योगे	विसर्गसन्धिः (रेफः)।
	त्विमाम्	तु + इमाम्	यण्सन्धिः।
	युक्तो मया	युक्तः + मया	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
(ख) समासः	कर्मबन्धम्	कर्म एव बन्धः कर्मबन्धः, तम् - कर्मधारयः।	
(ग) कृदन्तः	अभिहिता	अभि + धा + क्त (कर्मणि)।	
	साङ्ख्ये	सङ्ख्या + अण्, तस्मिन्।	

	बुद्धिः	बुध् (बुध अवगमने) + क्तिन् ।
	योगे	युज् (युजिर् योगे) + घञ्, तस्मिन् ।
	युक्तः	युजिर् + क्त (कर्तरि) ।
	बन्धः	बन्ध् (बन्ध बन्धने) + घञ् ।
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे) तत्सम्बुद्धौ । (पृथायाः अपत्यं पुमान् इत्यर्थः ।)

भावस्पष्टीकरणम् -

प्रहास्यसि ।	
कीदृशः प्रहास्यसि ?	**युक्तः** प्रहास्यसि ।
कया युक्तः प्रहास्यसि ?	**बुद्ध्या** युक्तः प्रहास्यसि ।
बुद्ध्या युक्तः **कं** प्रहास्यसि ?	बुद्ध्या युक्तः **कर्मबन्धं** प्रहास्यसि ।
शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ।	
कां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ?	**इमां** शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ?
कस्मिन् इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ?	**योगे तु** इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ?
कस्याः योगे तु इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ?	**बुद्धिः अभिहिता, (अस्याः)** योगे तु इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ।
का बुद्धिः अभिहिता, अस्याः योगे तु इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ?	**एषा** बुद्धिः अभिहिता, अस्याः योगे तु इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ।
एषा बुद्धिः **कस्मिन्** अभिहिता, अस्याः योगे तु इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ?	एषा बुद्धिः **साङ्ख्ये** अभिहिता, अस्याः योगे तु इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ।
एषा बुद्धिः साङ्ख्ये **कस्मै** अभिहिता, अस्याः योगे तु इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि?	एषा बुद्धिः साङ्ख्ये **ते** अभिहिता, अस्याः योगे तु इमां शृणु, यया बुद्ध्या युक्तः कर्मबन्धं प्रहास्यसि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - हे अर्जुन ! परमार्थवस्तुनि विषये एषः मार्गः मया तुभ्यम् उक्तः अस्ति । तत्प्राप्त्युपाये योगे तु ऊर्ध्वम् उपायं सूचयिष्यामि । यदि तां बुद्धिम् आश्रयसे तर्हि कर्मबन्धनात् मुक्तो भवितुम् अर्हसि ।

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात्॥२.४०॥

पदच्छेदः - न, इह, अभिक्रमनाशः, अस्ति, प्रत्यवायः न, विद्यते।
स्वल्पम्, अपि, अस्य, धर्मस्य, त्रायते, महतः, भयात्॥

अन्वयः - इह अभिक्रमनाशः न अस्ति, प्रत्यवायः न विद्यते, अस्य धर्मस्य स्वल्पमपि महतः भयात् त्रायते।

पदार्थः - इह = अत्र, अभिक्रमनाशः = प्रारम्भस्य हानिः (बीजस्य नाशः), न अस्ति = न विद्यते, प्रत्यवायः = विपरीतफलस्वरूपदोषः (विघ्नः), न विद्यते = न भवति, अस्य = एतस्य, धर्मस्य = धर्मस्य (कर्ममार्गस्य), स्वल्पमपि = किञ्चिदपि, महतः = अधिकात्, भयात् = भीतेः, त्रायते = रक्षति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
इह	अव्ययम्	अभिक्रमनाशः	अ. पुं. प्र. एक.
अस्ति	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.	प्रत्यवायः	अ. पुं. प्र. एक.
न	अव्ययम्	विद्यते	विद् (विद सत्तायाम्) आत्म. कर्तरि लट्. प्रपु. एक.
स्वल्पम्	अ. नपुं. प्र. एक.	अपि	अव्ययम्
अस्य	इदम् - म. सर्व. पुं. ष. एक. (विशेषणम्)	धर्मस्य	अ. पुं. ष. एक. (विशेष्यम्)
त्रायते	त्रै (त्रैङ् पालने) आत्म. कर्तरि लट्. प्रपु. एक.	महतः	महत् - त. पुं. पं. एक. (विशेषणम्)
भयात्	अ. पुं. पं. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः

नेहाभिक्रमनाशोऽस्ति	न + इहाभिक्रमनाशः	गुणसन्धिः।
	नेह + अभिक्रमनाशः	सवर्णदीर्घसन्धिः।
	नेहाभिक्रमनाशः + अस्ति	विसर्गसन्धिः (सकारः) रेफः उकारः, गुणः, पूर्वरूपं च।
प्रत्यवायो न	प्रत्यवायः + न	विसर्गसन्धिः (सकारः) रेफः उकारः, गुणः।
स्वल्पमप्यस्य	स्वल्पमपि + अस्य	यण्-सन्धिः।
महतो भयात्	महतः + भयात्	विसर्गसन्धिः (सकारः) रेफः उकारः, गुणः।

(ख) समासः अभिक्रमनाशः — अभिक्रमस्य नाशः अभिक्रमनाशः - षष्ठीतत्पुरुषः।

(ग) कृदन्तः अभिक्रमः — अभि + क्रम् (क्रमु पादविक्षेपे) + घञ्।
प्रत्यवायः — प्रति + अव + अय् (अय गतौ) + घञ्।
भयात् — भी (ञिभी भये) + अच् (अपादानार्थे)।

भावस्पष्टीकरणम् -

त्रायते।	
कस्मात् त्रायते ?	**भयात्** त्रायते।
कीदृशात् भयात् त्रायते ?	**महतः** भयात् त्रायते।
किं महतः भयात् त्रायते ?	**स्वल्पमपि** महतः भयात् त्रायते।
कस्य स्वल्पमपि महतः भयात् त्रायते ?	**अस्य धर्मस्य** स्वल्पमपि महतः भयात् त्रायते।
न विद्यते।	
कः न विद्यते ?	**प्रत्यवायः** न विद्यते।
न अस्ति।	
कः न अस्ति ?	**अभिक्रमनाशः** न अस्ति।
कुत्र अभिक्रमनाशः न अस्ति ?	**इह** अभिक्रमनाशः न अस्ति।

तात्पर्यम् - अस्य कर्मयोगस्य आचरणे अभिक्रमस्य (प्रारम्भस्य बीजरूपस्य) नाशः न भवति। अवश्यं फलं लभ्यते इत्यर्थः। दोषोऽपि (विघ्नोऽपि) न सम्भवति। अस्य धर्मस्य किञ्चिन्मात्रेण अनुसरणमपि महतः भयात् अस्मान् रक्षति।

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम्॥२.४१॥

पदच्छेदः - व्यवसायात्मिका, बुद्धिः, एका, इह, कुरुनन्दन।
बहुशाखाः, हि, अनन्ताः, च, बुद्धयः, अव्यवसायिनाम्॥

अन्वयः - कुरुनन्दन ! इह व्यवसायात्मिका बुद्धिः एका (भवति किन्तु) अव्यवसायिनां च बुद्धयः हि बहुशाखाः च अनन्ताः।

पदार्थः - कुरुनन्दन = हे अर्जुन ! इह = अत्र (अस्मिन् कर्मयोगे), व्यवसायात्मिका = निश्चयात्मिका, बुद्धिः = मतिः, एका = एका, अव्यवसायिनाम् = निश्चयरहितानाम् (विवेकहीनानां सकाममनुष्याणाम्), हि = निश्चयेन एव , बुद्धयः = मतयः, बहुशाखाः = अनेकविधाः, अनन्ताः = अन्तरहिताः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कुरुनन्दन	अ. पुं. सम्बो. एक.	व्यवसायात्मिका	आ. स्त्री. प्र. एक. (विशेषणम्)
बुद्धिः	इ. स्त्री. प्र. एक. (विशेष्यम्)	एका	आ. स्त्री. प्र. एक. (विशेषणम्)
इह	अव्ययम्	बहुशाखाः	आ. स्त्री. प्र. बहु. (विशेषणम्)
अनन्ताः	आ. स्त्री. प्र. बहु. (विशेषणम्)	बुद्धयः	इ. स्त्री. प्र. बहु. (विशेष्यम्)
अव्यवसायिनाम्	अव्यवसायिन् - न. पुं. ष. बहु.	च	अव्ययम्
हि	अव्ययम्		

व्याकरणम् -

(क) सन्धिः	बुद्धिरेकेह	बुद्धिः + एकेह	विसर्गसन्धिः (रेफः) ।
	एकेह	एका + इह	गुणसन्धिः ।
	बहुशाखा हि	बहुशाखाः + हि	विसर्गसन्धिः (लोपः) ।
	ह्यनन्ताः	हि + अनन्ताः	यण्सन्धिः ।
	अनन्ताश्च	अनन्ताः + च	विसर्गसन्धिः (सकारः) श्चुत्वम् ।
	बुद्धयोऽव्यवसायिनाम्	बुद्धयः + अव्यवसायिनाम्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।

(ख) समासः	व्यवसायात्मिका	व्यवसायः एव आत्मा यस्याः सा व्यवसायात्मिका - बहुव्रीहिः ।
	कुरुनन्दन	कुरूणां नन्दनः, कुरुनन्दनः तत्सम्बुद्धौ - षष्ठीतत्पुरुषः ।
	बहुशाखाः	बह्व्यः शाखाः यासां ताः बहुशाखाः - बहुव्रीहिः ।
	अनन्ताः	न विद्यते अन्तः यासां ताः अनन्ताः - बहुव्रीहिः ।
(ग) कृदन्तः	व्यवसायः	वि + अव + सो (षो अन्तकर्मणि) + घञ् ।
	बुद्धिः	बुध् (बुध अवगमने) + क्तिन् ।
	नन्दनः	नन्द + ल्युट् (कर्तरि) । नन्दयति इति नन्दनः ।
(घ) तद्धितान्तः	व्यवसायिनाम्	व्यवसाय + इनि (मतुबर्थे), तेषाम् ।

भावस्पष्टीकरणम् -

एका ।	
का एका ?	बुद्धिः एका ।

कीदृशी बुद्धिः एका ?	**व्यवसायात्मिका** बुद्धिः एका।
कुत्र व्यवसायात्मिका बुद्धिः एका ?	**इह** व्यवसायात्मिका बुद्धिः एका।
(किन्तु) बुद्धयः।	
बुद्धयः **कीदृश्यः** ?	बुद्धयः **बहुशाखाः।**
बुद्धयः बहुशाखाः, **पुनश्च कीदृश्यः** ?	बुद्धयः बहुशाखाः **अनन्ताः च।**
केषां बुद्धयः बहुशाखाः अनन्ताः च ?	**अव्यवसायिनां** बुद्धयः बहुशाखाः अनन्ताः च।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कुरुनन्दन !**

तात्पर्यम् - हे अर्जुन ! अस्मिन् लोके कर्मयोगे प्रवृत्तिशीला बुद्धिः एका एव। परन्तु अप्रवृत्तिशीलानां पुरुषाणां बुद्धयस्तु बहुभेदाः अनन्ताश्च भवन्ति। अर्थात् निश्चयात्मिका बुद्धिः एका एव भवति। परन्तु अस्थिरचित्तानाम् अव्यवसायिनां सकामपुरुषाणां बुद्धयः बहुविधाः अनन्ताः च भवन्ति।

यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ॥२.४२॥
कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ॥२.४३॥

पदच्छेदः - याम्, इमाम्, पुष्पिताम्, वाचम्, प्रवदन्ति, अविपश्चितः।
वेदवादरताः, पार्थ, न, अन्यत्, अस्ति, इति, वादिनः ॥
कामात्मानः, स्वर्गपराः, जन्मकर्मफलप्रदाम्।
क्रियाविशेषबहुलाम्, भोगैश्वर्यगतिम्, प्रति ॥

अन्वयः - पार्थ! कामात्मानः स्वर्गपराः वेदवादरताः अन्यत् नास्ति इति वादिनः अविपश्चितः जन्मकर्मफलप्रदां भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलाम् इमां पुष्पितां यां वाचं प्रवदन्ति।

पदार्थः - पार्थ = हे अर्जुन ! कामात्मानः = विषयासक्ताः, स्वर्गपराः = स्वर्गासक्ताः, वेदवादरताः = वेदवाक्यानि विचारयन्तः, न = न, अन्यत् = इतरत्, अस्ति = विद्यते, इति = एवम्, वादिनः = वदन्तः, अविपश्चितः = अविद्वांसः मूढाः, जन्मकर्मफलप्रदाम् = जननं सुखरूपं कर्मफलं च प्रयच्छन्तीम्, भोगैश्वर्यगतिं प्रति = गृहवाहनादिविषयेषु स्वामित्वस्य प्राप्तिं प्रति, क्रियाविषेशबहुलाम् = विविधकर्मप्रचुराम्, इमाम् = एताम्, पुष्पिताम् = कुसुमिताम्, यां वाचम् = यद् वाक्यम्, प्रवदन्ति = कथयन्ति...

पदपरिचयः -

पदम्	विवणम्	पदम्	विवरणम्
याम्	यद्- द. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	इमाम्	इदम् - म. सर्व. स्त्री. द्वि. एक. (विशेषणम्)
पुष्पिताम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	वाचम्	वाच्- च. स्त्री. द्वि. एक. (विशेष्यम्)
प्रवदन्ति	प्र + वद् (वद व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.	अविपश्चितः	अविपश्चित्- त. पुं. प्र. बहु.
वेदवादरताः	अ. पुं. प्र. बहु. (विशेषणम्)	पार्थ	अ. पुं. सम्बो. एक.
न	अव्ययम्	अन्यत्	अव्ययम्
अस्ति	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.	इति	अव्ययम्
वादिनः	वादिन् - न. पुं. प्र. बहु.	कामात्मानः	कामात्मन् - न. पुं. प्र. बहु.
स्वर्गपराः	अ. पुं. प्र. बहु.	जन्मकर्मफलप्रदाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)
क्रियावि-शेषबहुलाम्	आ. स्त्री. द्वि. एक. (विशेषणम्)	भोगैश्वर्यगतिम्	इ. स्त्री. द्वि. एक. (विशेष्यम्)
प्रति	अव्ययम्		

व्याकरणम् -

(क) सन्धिः

यामिमां पुष्पिताम्	यामिमाम् + पुष्पिताम्	अनुस्वारसन्धिः ।
पुष्पितां वाचम्	पुष्पिताम् + वाचम्	अनुस्वारसन्धिः ।
वाचं प्रवदन्ति	वाचम् + प्रवदन्ति	अनुस्वारसन्धिः ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिम्	क्रियाविशेषबहुलाम् + भोगैश्वर्यगतिम्	अनुस्वारसन्धिः ।
भोगैश्वर्यगतिं प्रति	भोगैश्वर्यगतिम् + प्रति	अनुस्वारसन्धिः ।
प्रवदन्त्यविपश्चितः	प्रवदन्ति + अविपश्चितः	यण्सन्धिः ।
नान्यत्	न + अन्यत्	सवर्णदीर्घसन्धिः ।
अन्यदस्ति	अन्यत् + अस्ति	जश्त्वसन्धिः ।
अस्तीति	अस्ति + इति	सवर्णदीर्घसन्धिः ।
स्वर्गपरा जन्म	स्वर्गपराः + जन्म	विसर्गसन्धिः लोपः ।

(ख) समासः	अविपश्चितः	न विपश्चितः अविपश्चितः - नञ्तत्पुरुषः।
	विपश्चितः	विप्रकृष्टं चिन्वन्ति चेतन्ति चिन्तयन्ति वा विपश्चितः कर्तरि क्विप् उपपदसमासश्च।
	वेदवादरताः	वेदस्य वादाः वेदवादाः - षष्ठीतत्पुरुषः।
		वेदवादेषु रताः वेदवादरताः - सप्तमीतत्पुरुषः।
	कामात्मानः	कामः एव आत्मा येषां ते कामात्मानः - बहुव्रीहिः।
	स्वर्गपराः	स्वर्गः एव परः येषां ते स्वर्गपराः - बहुव्रीहिः।
	जन्मकर्मफलप्रदाम्	कर्मणः फलम् कर्मफलम् - षष्ठीतत्पुरुषः।
		जन्म च कर्मफलम् च जन्मकर्मफले - द्वन्द्वः।
		जन्मकर्मफलयोः प्रदा जन्मकर्मफलप्रदा ताम् - षष्ठीतत्पुरुषः।
	भोगैश्वर्यगतिम्	भोगः च ऐश्वर्यं च भोगैश्वर्ये - द्वन्द्वः
		भोगैश्वर्ययोः गति भोगैश्वर्यगतिः, तम् - षष्ठीतत्पुरुषः।
(ग) तद्धितान्तः	पुष्पिताम्	पुष्प + इतच् + टाप् (स्त्रीत्वे), ताम्।
	ऐश्वर्यम्	ईश्वर + ष्यञ् (भावार्थे)।

भावस्पष्टीकरणम् -

प्रवदन्ति।	
के प्रवदन्ति ?	**कामात्मानः** प्रवदन्ति।
कामात्मानः **पुनश्च कीदृशाः** प्रवदन्ति ?	कामात्मानः **स्वर्गपराः** प्रवदन्ति।
कामात्मानः स्वर्गपराः **पुनश्च कीदृशाः** प्रवदन्ति ?	कामात्मानः स्वर्गपराः **वेदवादरताः** प्रवदन्ति।
कामात्मानः स्वर्गपराः वेदवादरताः **पुनश्च कीदृशाः** प्रवदन्ति ?	कामात्मानः स्वर्गपराः वेदवादरताः **नान्यदस्ति इति वादिनः** प्रवदन्ति।
कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः **पुनश्च कीदृशाः** प्रवदन्ति ?	कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः **अविपश्चितः** प्रवदन्ति।
कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **कां** प्रवदन्ति ?	कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **वाचं** प्रवदन्ति।
कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **कीदृशीं** वाचं प्रवदन्ति ?	कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **पुष्पितां** वाचं प्रवदन्ति।
कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **पुनश्च कीदृशीं** पुष्पितां वाचं प्रवदन्ति ?	कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **क्रियाविशेषबहुलां** पुष्पितां वाचं प्रवदन्ति।

कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **कां** प्रति क्रियाविशेषबहुलां पुष्पितां वाचं प्रवदन्ति ?	कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **भोगैश्वर्यगतिं** प्रति क्रियाविशेषबहुलां पुष्पितां वाचं प्रवदन्ति ।
कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **कीदृशीं** भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलां पुष्पितां वाचं प्रवदन्ति ?	कामात्मानः स्वर्गपराः वेदवादरताः नान्यदस्ति इति वादिनः अविपश्चितः **जन्मकर्मफलप्रदां** भोगैश्वर्यगतिं प्रति क्रियाविशेषबहुलां पुष्पितां वाचं प्रवदन्ति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - वेदवाक्यानां विमर्शकाः केचन पुरुषाः सन्ति । ते तु विषयेषु आसक्ताः, स्वर्गम् अपेक्षमाणाः, तदतिरिक्तं फलमेव नास्ति इति वदन्तः च श्रुतेः वास्तविकं तात्पर्यं न जानन्ति । अत एव ते नानाविधैः यागादिभिः या साध्यते, या च जननं कर्मफलानुभवश्चेति संसारचक्रे पातयति तादृश्यां गृहवाहनादिविषयाणां (सांसारिकसुखानाम्) प्राप्तौ निष्फलामपि सफलामिव भासमानां वाचं व्याहरन्ति । एतादृशाः वेदवादिनः वेदतत्त्वार्थज्ञातारः न भवन्ति । ते तत्त्वज्ञानिनः न सन्ति अपि तु ते मतवादिनः एव ।

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ॥२.४४॥

पदच्छेदः - भोगैश्वर्यप्रसक्तानाम्, तया, अपहृतचेतसाम् ।
व्यवसायात्मिका, बुद्धिः, समाधौ, न, विधीयते ॥

अन्वयः - तया अपहृतचेतसां भोगैश्वर्यप्रसक्तानां व्यवसायात्मिका बुद्धिः (सती) समाधौ न विधीयते ।

पदार्थः - तया = तया वाचा, अपहृतचेतसाम् = अपहृतमनसाम्, भोगैश्वर्यप्रसक्तानाम् = विषयप्राप्तौ आसक्तानां पुरुषाणाम्, बुद्धिः = मतिः, व्यवसायात्मिका = प्रवृत्तिशीला, समाधौ = एकाग्रतायाम्, न विधीयते = न प्रवर्तते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तया	तद् - द. सर्व. स्त्री. तृ. एक. (विशेषणम्)	अपहृतचे-तसाम्	अपहृतचेतस् - सका. पुं. ष. बहु. (विशेषणम्)
भोगैश्वर्यप्रसक्तानाम्	अ. पुं. ष. बहु. (विशेषणम्)	बुद्धिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
व्यवसायात्मिका	आ. स्त्री. प्र. एक. (विशेषणम्)	समाधौ	इ. पुं. स. एक.

न	अव्ययम्	विधीयते	वि + धा (डुधाञ् धारणपोषणयोः) आत्म. कर्मणि लट् प्रपु. एक.

व्याकरणम् -

(क) सन्धिः तयापहृतचेतसाम् तया + अपहृतचेतसाम् सवर्णदीर्घसन्धिः ।

(ख) समासः भोगैश्वर्यप्रसक्तानाम् भोगः च ऐश्वर्यं च भोगैश्वर्ये - द्वन्द्वः ।
भोगैश्वर्ययोः प्रसक्ताः भोगैश्वर्यप्रसक्ताः, तेषाम् - सप्तमीतत्पुरुषः ।

अपहृतचेतसाम् अपहृतं चेतः येषां ते अपहृतचेतसः, तेषाम् - बहुव्रीहिः ।

(ग) कृदन्तः भोगः भुज् (भुज पालनाभ्यवहारयोः) + घञ् ।

प्रसक्तानाम् प्र + सञ्ज् (षञ्ज सङ्गे) + क्त (कर्तरि) तेषाम् ।

अपहृतः अप + हृ (हृञ् हरणे) + क्त (कर्मणि) ।

बुद्धिः बुध् (बुध अवगमने) + क्तिन् ।

(घ) तद्धितान्तः ऐश्वर्यम् ईश्वरः + ष्यञ् (भावार्थे) ।

भावस्पष्टीकरणम् -

न विधीयते ।	
कुत्र न विधीयते ?	**समाधौ** न विधीयते ।
का समाधौ न विधीयते ?	**बुद्धिः** समाधौ न विधीयते ।
बुद्धिः **कीदृशी** (सती) समाधौ न विधीयते ?	बुद्धिः **व्यवसायात्मिका** (सती) समाधौ न विधीयते ।
केषां बुद्धिः व्यवसायात्मिका सती समाधौ न विधीयते ?	**अपहृतचेतसां** बुद्धिः व्यवसायात्मिका सती समाधौ न विधीयते ।
अपहृतचेतसां **पुनश्च केषां** बुद्धिः व्यवसायात्मिका सती समाधौ न विधीयते ?	अपहृतचेतसां **भोगैश्वर्यप्रसक्तानां** बुद्धिः व्यवसायात्मिका सती समाधौ न विधीयते ।
कया अपहृतचेतसां भोगैश्वर्यप्रसक्तानां बुद्धिः व्यवसायात्मिका सती समाधौ न विधीयते ?	**तया** अपहृतचेतसां भोगैश्वर्यप्रसक्तानां बुद्धिः व्यवसायात्मिका सती समाधौ न विधीयते ।

तात्पर्यम् - येषां मनः तादृशेन कुसुमितेन वाक्येन अपहृतं भवति, ये जनाः गृहवाहनादीनां विषयाणां सम्पादने व्यापृताः च भवन्ति तेषां बुद्धिः कदापि एकाग्रतायां न प्रवर्तते ।

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्॥२.४५॥

पदच्छेदः - त्रैगुण्यविषयाः, वेदाः, निस्त्रैगुण्यः, भव, अर्जुन।
निर्द्वन्द्वः, नित्यसत्त्वस्थः, निर्योगक्षेमः, आत्मवान्॥

अन्वयः - अर्जुन ! वेदाः त्रैगुण्यविषयाः। निस्त्रैगुण्यः निर्द्वन्द्वः नित्यसत्त्वस्थः निर्योगक्षेमः आत्मवान् भव।

पदार्थः - अर्जुन = पार्थ ! वेदाः = श्रुतयः, त्रैगुण्यविषयाः = त्रिगुणात्मकप्रकृतिविषयाः, निस्त्रैगुण्यः = त्रिगुणरहितः, निर्द्वन्द्वः = सुखदुःखादियुग्मरहितः, नित्यसत्त्वस्थः = सदा सत्त्वगुणसम्पन्नः, निर्योगक्षेमः = योगक्षेमरहितः, आत्मवान् = आत्मनिष्ठः, भव = तिष्ठ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	वेदाः	अ. पुं. प्र. बहु. (विशेष्यम्)
त्रैगुण्यविषयाः	अ. पुं. प्र. बहु. (विशेषणम्)	निस्त्रैगुण्यः	अ. पुं. प्र. एक. (विशेषणम्)
निर्द्वन्द्वः	अ. पुं. प्र. एक. (विशेषणम्)	नित्यसत्त्वस्थः	अ. पुं. प्र. एक. (विशेषणम्)
निर्योगक्षेमः	अ. पुं. प्र. एक. (विशेषणम्)	आत्मवान्	आत्मवत् - त. पुं. प्र. एक. (विशेषणम्)
भव	भू (भू सत्तायाम्) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः

त्रैगुण्यविषया वेदा	त्रैगुण्यविषयाः + वेदाः	विसर्गसन्धिः (लोपः)।
वेदा निस्त्रैगुण्यः	वेदाः + निस्त्रैगुण्यः	विसर्गसन्धिः (लोपः)।
निस्त्रैगुण्यो भव	निस्त्रैगुण्यः + भव	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
भवार्जुन	भव + अर्जुन	सवर्णदीर्घसन्धिः।
निर्द्वन्द्वो नित्यसत्त्वस्थः	निर्द्वन्द्वः + नित्यसत्त्वस्थः	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
नित्यसत्त्वस्थो निर्योगक्षेमः	नित्यसत्त्वस्थः + निर्योगक्षेमः	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
निर्योगक्षेम आत्मवान्	निर्योगक्षेमः + आत्मवान्	विसर्गसन्धिः (लोपः)।

(ख) समासः

त्रैगुण्यविषयाः	त्रैगुण्यं विषयः येषां ते त्रैगुण्यविषयाः - बहुव्रीहिः।
निस्त्रैगुण्यः	निर्गतं त्रैगुण्यं यस्मात् सः निस्त्रैगुण्यः - बहुव्रीहिः।
निर्द्वन्द्वः	निर्गतं द्वन्द्वं यस्मात् सः निर्द्वन्द्वः - बहुव्रीहिः।

	नित्यसत्त्वस्थः	नित्यं सत्त्वस्थः नित्यसत्त्वस्थः - सुप्सुपासमासः।
	निर्योगक्षेमः	योगश्च क्षेमं च अनयोः समाहारः योगक्षेमम् - द्वन्द्वसमासः।
		निर्गतं योगक्षेमं यस्मात् सः निर्योगक्षेमः - बहुव्रीहिः।
(ग) कृदन्तः	वेदाः	विद् (विद ज्ञाने) + घञ्।
(घ) तद्धितान्तः	त्रैगुण्यम्	त्रिगुण + ष्यञ्।
	आत्मवान्	आत्मन् + मतुप्।

भावस्पष्टीकरणम् -

वेदाः।	
वेदाः **कीदृशाः** ?	वेदाः **त्रैगुण्यविषयाः**।
भव।	
कीदृशो भव ?	**निस्त्रैगुण्यः** भव।
निस्त्रैगुण्यः **पुनश्च कीदृशः** भव ?	निस्त्रैगुण्यः **निर्द्वन्द्वः** भव।
निस्त्रैगुण्यः निर्द्वन्द्वः **पुनश्च कीदृशः** भव ?	निस्त्रैगुण्यः निर्द्वन्द्वः **नित्यसत्त्वस्थः** भव।
निस्त्रैगुण्यः निर्द्वन्द्वः नित्यसत्त्वस्थः **पुनश्च कीदृशः** भव ?	निस्त्रैगुण्यः निर्द्वन्द्वः नित्यसत्त्वस्थः **निर्योगक्षेमः** भव।
निस्त्रैगुण्यः निर्द्वन्द्वः नित्यसत्त्वस्थः निर्योगक्षेमः **पुनश्च कीदृशः** भव ?	निस्त्रैगुण्यः निर्द्वन्द्वः नित्यसत्त्वस्थः निर्योगक्षेमः **आत्मवान्** भव।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन** !

तात्पर्यम् - हे अर्जुन ! वेदेषु त्रिगुणात्मिकायाः प्रकृतेः विषयाः उक्ताः सन्ति। त्वं तान् त्यक्त्वा त्रिगुणरहितः भव। सुखदुःखे त्यक्त्वा द्वन्द्वरहितः भव। सर्वदा सत्त्वगुणम् अवलम्बस्व। योगक्षेमापेक्षां मा कुरु। आत्मध्यानपरायणो भव।

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥२.४६॥

पदच्छेदः - यावान्, अर्थः, उदपाने, सर्वतः, सम्प्लुतोदके।
तावान्, सर्वेषु, वेदेषु, ब्राह्मणस्य, विजानतः ॥

अन्वयः - (यथा) यावान् अर्थः उदपाने तावान् सर्वतः सम्प्लुतोदके (तथा) विजानतः ब्राह्मणस्य सर्वेषु वेदेषु (तावान् ब्रह्मणि)।

पदार्थः - यावान् = यत्परिमाणम्, अर्थः = प्रयोजनम्, उदपाने = अल्पजलाशये, तावान् = तत्परिमाणम्, सर्वतः = सर्वत्र, सम्प्लुतोदके = जलपूर्णे सरसि, विजानतः = ज्ञानिनः, ब्राह्मणस्य = पण्डितस्य, सर्वेषु = सकलेषु, वेदेषु = वेदेषु ।

पदपरिचयः -

पदम्	विश्लेषणम्	पदम्	विश्लेषणम्
यावान्	यावत् - त. पुं. प्र. एक. (विशेषणम्)	अर्थः	अ. पुं. प्र. एक. (विशेष्यम्)
उदपाने	अ. नपुं. स. एक.	तावान्	तावत्- त. पुं. प्र. एक.
सर्वतः	अव्ययम्	सम्प्लुतोदके	अ. नपुं. स. एक.
विजानतः	विजानत् - त. पुं. ष. एक. (विशेषणम्)	ब्राह्मणस्य	अ. पुं. ष. एक. (विशेष्यम्)
सर्वेषु	अ. पुं. सर्व. स. बहु. (विशेषणम्)	वेदेषु	अ. पुं. स. एक. (विशेष्यम्)

व्याकरणम् -

(क) सन्धिः अर्थ उदपाने — अर्थः + उदपाने — विसर्गसन्धिः (लोपः) ।

(ख) समासः सम्प्लुतोदके — सम्प्लुतम् उदकं यस्मिन् तत् सम्प्लुतोदकम्, तस्मिन् - बहुव्रीहिः ।

(ग) कृदन्तः वेदेषु — विद् (विद ज्ञाने) + घञ्, तेषु ।

विजानतः — वि + ज्ञा (ज्ञा अवबोधने) + शतृ (कर्तरि) तस्य ।

(घ) तद्धितान्तः सर्वतः — सर्व + तसिल् (सप्तम्यन्तात् स्वार्थे) ।

ब्राह्मणस्य — ब्रह्मन् + अण्, तस्य (ब्रह्मणः अयं ब्राह्मणः) इदमर्थे अण् ।

भावस्पष्टीकरणम् -

तावान् अर्थः कुत्र विद्यते ?	**(यथा) यावान् अर्थः उदपाने (तावान्) सर्वतः सम्प्लुतोदके (तथा) यावान् सर्वेषु वेदेषु विजानतः ब्राह्मणस्य (तावान् ब्रह्मणि)** विद्यते ।

तात्पर्यम् - अल्पे जलाशये स्नानपानादिकं प्रयोजनं यत् यत् भवति तत्सर्वं सर्वत्र जलेन परिपूर्णे सरोवरे अवश्यं भवति। तथा वेदेषु प्रतिपादितानां कर्मणाम् आचरणेन यावान् आनन्दः तावान् पण्डितस्य ब्रह्मज्ञानात् अवश्यं भवति। अल्पे यत् सिद्ध्यति तदवश्यं महति सिद्ध्यत्येव इति भावः ।

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥२.४७॥

पदच्छेदः - कर्मणि, एव, अधिकारः, ते, मा, फलेषु, कदाचन ।
मा, कर्मफलहेतुः, भूः, मा, ते, सङ्गः, अस्तु, अकर्मणि ॥

अन्वयः - कर्मणि एव ते अधिकारः। फलेषु कदाचन मा (भूत्)। कर्मफलहेतुः मा भूः। अकर्मणि ते सङ्गः मा अस्तु।

पदार्थः - कर्मणि एव = क्रियायाम् एव, ते = तव, अधिकारः = अधिकारः, फलेषु = प्रयोजनेषु, कदाचन = कदापि, मा = मास्तु, कर्मफलहेतुः = कर्मप्रयोजनस्य कारणम्, मा भूः = मा भव, अकर्मणि = कर्मानाचरणे, ते = तव, सङ्गः = अभिलाषः, मा अस्तु = मा भवतु।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कर्मणि	कर्मन् - न. नपुं. स. एक.	एव	अव्ययम्
ते	युष्मद् - द. सर्व. ष. एक.	अधिकारः	अ. पुं. प्र. एक.
फलेषु	अ. नपुं. स. बहु.	कदाचन	अव्ययम्
मा	अव्ययम्	कर्मफलहेतुः	उ. पुं. प्र. एक.
भूः	भू (भू सत्तायाम्) - पर. कर्तरि लुङ्. मपु. एक.	अकर्मणि	अकर्मन् - न. नपुं. स. एक.
सङ्गः	अ. पुं. प्र. एक.	अस्तु	अस् (अस भुवि) पर. कर्तरि लोट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः

कर्मण्येव	कर्मणि + एव	यण्सन्धिः।
एवाधिकारः	एव + अधिकारः	सवर्णदीर्घसन्धिः।
अधिकारस्ते	अधिकारः + ते	विसर्गसन्धिः (सकारः)।
कर्मफलहेतुर्भूः	कर्मफलहेतुः + भूः	विसर्गसन्धिः (रेफः)।
भूर्मा	भूः + मा	विसर्गसन्धिः (रेफः)।
सङ्गोऽस्तु	सङ्गः + अस्तु	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः पूर्वरूपं च।
अस्त्वकर्मणि	अस्तु + अकर्मणि	यण्सन्धिः।

(ख) समासः

कर्मफलहेतुः - कर्मणः फलं कर्मफलम् - षष्ठीतत्पुरुषः।
कर्मफलस्य हेतुः कर्मफलहेतुः - षष्ठीतत्पुरुषः।

अकर्मणि - न कर्मणि अकर्मणि - नञ्तत्पुरुषः।

(ग) कृदन्तः

अधिकारः - अधि + कृ (डुकृञ् करणे) + अण् (भावे)।
फलेषु - फल् (फल निष्पत्तौ) + अच्, तेषु।
सङ्गः - सञ्ज् (षञ्ज सङ्गे) + घञ् (भावे)।

भावस्पष्टीकरणम् -

अधिकारः ।	
कुत्र अधिकारः ?	**कर्मणि एव** अधिकारः ।
कर्मणि एव **कस्य** अधिकारः ?	कर्मणि एव **ते** अधिकारः ।
कर्मणि एव ते अधिकारः । **केषु** मा (भूत्) ?	कर्मणि एव ते अधिकारः । **फलेषु** मा (भूत्) ।
कर्मणि एव ते अधिकारः । फलेषु **कदा** मा भूत् ?	कर्मणि एव ते अधिकारः । फलेषु **कदाचन** मा भूत् ।
मा अस्तु ।	
कः मा अस्तु ?	**सङ्गः** मा अस्तु ।
कस्मिन् सङ्गः मा अस्तु ?	**अकर्मणि** सङ्गः मा अस्तु ।
अकर्मणि **कस्य** सङ्गः मा अस्तु ?	अकर्मणि **ते** सङ्गः मा अस्तु ।
अकर्मणि ते सङ्गः मा अस्तु, पुनश्च **कीदृशः** मा भूः ?	अकर्मणि ते सङ्गः मा अस्तु, **कर्मफलहेतुः** मा भूः ।

तात्पर्यम् - तव कर्माचरणे एव अधिकारः । फलविषये तव अधिकारः नास्ति । त्वं कर्मणः फलस्य अपेक्षां मा कुरु । फलापेक्षया कर्म कुर्वन् तत्फले आत्मानं हेतुं मा कुरु । कर्मणः अनाचरणेऽपि तव अभिलाषः मा भवतु ।

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥२.४८॥

पदच्छेदः - योगस्थः, कुरु, कर्माणि, सङ्गम्, त्यक्त्वा, धनञ्जय ।
सिद्ध्यसिद्ध्योः, समः, भूत्वा, समत्वम्, योगः, उच्यते ॥

अन्वयः - धनञ्जय ! सङ्गं त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु । समत्वं योगः उच्यते ।

पदार्थः - धनञ्जय = अर्जुन !, सङ्गम् = अत्यासक्तिम्, त्यक्त्वा = परित्यज्य, सिद्ध्यसिद्ध्योः = लाभालाभयोः, समः = समानः, भूत्वा = स्थित्वा, योगस्थः = एकाग्रमनस्कः, कर्माणि = क्रियाः, कुरु = आचर, समत्वम् = समानता, योगः = योगः, उच्यते = कथ्यते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
धनञ्जय	अ. पुं. सम्बो. एक.	सङ्गम्	अ. पुं. द्वि. एक.
त्यक्त्वा	क्त्वान्तम् अव्ययम्	सिद्ध्यसिद्ध्योः	इ. स्त्री. स. द्वि.

समः	अ. पुं. प्र. एक.	भूत्वा	क्त्वान्तम् अव्ययम्
योगस्थः	अ. पुं. प्र. एक.	कर्माणि	कर्मन् - न. नपुं. द्वि. बहु.
कुरु	कृ (डुकृञ् करणे) पर. कर्तरि लोट्. मपु. एक.	समत्वम्	अ. नपुं. प्र. एक.
योगः	अ. पुं. प्र. एक.	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	समो भूत्वा	समः + भूत्वा	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
	योग उच्यते	योगः + उच्यते	विसर्गसन्धिः (लोपः)।
(ख) समासः	धनञ्जय	धनं जयति इति धनञ्जयः, सम्बुद्धौ - कर्तरि खश् उपपदसमासश्च।	
	सिद्ध्यसिद्ध्योः	सिद्धिश्च असिद्धिश्च सिद्ध्यसिद्धी, तयोः - द्वन्द्वः।	
(ग) कृदन्तः	सङ्गम्	सञ्ज् (षञ्ज सङ्गे) + घञ् (भावे), तम्।	
	त्यक्त्वा	त्यज् (त्यज हानौ) + क्त्वा।	
	सिद्धिः	सिध् (षिधु संराद्धौ) + क्तिन्।	
	भूत्वा	भू (भू सत्तायाम्) + क्त्वा।	
	योगः	युज् (युजिर् योगे) + घञ् (भावे)।	
(घ) तद्धितान्तः	समत्वम्	सम + त्व (भावे) (समस्य भावः इत्यर्थः)।	

भावस्पष्टीकरणम् -

कुरु।	
कानि कुरु ?	**कर्माणि** कुरु।
कीदृशः भूत्वा कर्माणि कुरु ?	**योगस्थः** भूत्वा कर्माणि कुरु।
पुनश्च कीदृशः भूत्वा योगस्थः कर्माणि कुरु ?	**समः** भूत्वा योगस्थः कर्माणि कुरु।
कयोः समः भूत्वा योगस्थः कर्माणि कुरु ?	**सिद्ध्यसिद्ध्योः** समः भूत्वा योगस्थः कर्माणि कुरु।
किं कृत्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु ?	**त्यक्त्वा** सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु।
कं त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु ?	**सङ्गं** त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु।

त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु। **किम् उच्यते** ?	त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु। **समत्वम् उच्यते**।
त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु। समत्वं **कः** उच्यते ?	त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा योगस्थः कर्माणि कुरु। समत्वं **योगः** उच्यते।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**धनञ्जय** !

तात्पर्यम् - हे अर्जुन ! अत्यासक्तिं परित्यज्य लाभालाभयोः विषये समभावनया चिन्तयन् एकाग्रमनस्कः भूत्वा कर्माणि आचर। लाभालाभयोः विषये समानतया व्यवहारः 'योगः' इति उच्यते।

दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जय।
बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥२.४९॥

पदच्छेदः - दूरेण, हि, अवरम्, कर्म, बुद्धियोगात्, धनञ्जय।
बुद्धौ, शरणम्, अन्विच्छ, कृपणाः, फलहेतवः ॥

अन्वयः - धनञ्जय ! बुद्धियोगात् हि कर्म दूरेण अवरम्। बुद्धौ शरणम् अन्विच्छ। फलहेतवः कृपणाः।

पदार्थः - धनञ्जय = अर्जुन ! बुद्धियोगात् = ज्ञानयोगात्, हि = खलु, कर्म = क्रिया, दूरेण = अत्यन्तम्, अवरम् = नीचम्, बुद्धौ = ज्ञाने, शरणम् = आश्रयम्, अन्विच्छ = भजस्व, फलहेतवः = फलकारणभूताः, कृपणाः = दीनाः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
धनञ्जय	अ. पुं. सम्बो. एक.	बुद्धियोगात्	अ. पुं. पं. एक.
हि	अव्ययम्	कर्म	कर्मन् - न. नपुं. प्र. एक.
दूरेण	अ. नपुं. तृ. एक.	अवरम्	अ. नपुं. प्र. एक.
बुद्धौ	इ. स्त्री. स. एक.	शरणम्	अ. नपुं. द्वि. एक.
अन्विच्छ	अनु + इष् (इषु इच्छायाम्) पर. कर्तरि लोट्. मपु. एक.	फलहेतवः	उ. पुं. प्र. बहु.
कृपणाः	अ. पुं. प्र. बहु.		

व्याकरणम् -

(क) सन्धिः	ह्यवरम्	हि + अवरम्	यण्सन्धिः ।
	बुद्धियोगाद्धनञ्जय	बुद्धियोगात् + धनञ्जय	जश्त्वसन्धिः ।
(ख) समासः	बुद्धियोगात्	बुद्धेः योगः बुद्धियोगः, तस्मात् - षष्ठीतत्पुरुषः ।	
	धनञ्जय	धनं जयति इति धनञ्जयः, सम्बुद्धौ - कर्तरि खश् उपपदसमासश्च ।	
	फलहेतवः	फलस्य हेतवः फलहेतवः - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	बुद्धिः	बुध् (बुध अवगमने) + क्तिन् ।	
	योगात्	युज् (युजिर् योगे) + घञ् (भावे), तस्मात् ।	
	शरणम्	श्रि (श्रिञ् सेवायाम्) + ल्युट् ।	
	फलम्	फल् (फल निष्पत्तौ) + अच् ।	

भावस्पष्टीकरणम् -

फलहेतवः ।	
फलहेतवः **कीदृशाः** ?	फलहेतवः **कृपणाः** ।
फलहेतवः कृपणाः । अतः **किं कुरु** ?	फलहेतवः कृपणाः । अतः **अन्विच्छ** ।
फलहेतवः कृपणाः । **किम्** अन्विच्छ ?	**शरणम्** अन्विच्छ ।
कस्यां शरणम् अन्विच्छ ?	**बुद्धौ** शरणम् अन्विच्छ ।
बुद्धौ शरणम् अन्विच्छ । **कुतः** ?	बुद्धौ शरणम् अन्विच्छ । (यतः) **कर्म अवरम्** ।
बुद्धौ शरणम् अन्विच्छ । **कस्मात्** कर्म अवरम् ?	बुद्धौ शरणम् अन्विच्छ । **बुद्धियोगात्** कर्म अवरम् ।
बुद्धौ शरणम् अन्विच्छ । बुद्धियोगात् कर्म **कथम्** अवरम् ?	बुद्धौ शरणम् अन्विच्छ । यतः बुद्धियोगात् कर्म **दूरेण** अवरम् ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**धनञ्जय** !

तात्पर्यम् - हे अर्जुन ! ज्ञानयोगापेक्षया सकामं कर्म अत्यन्तं तुच्छम् अस्ति । अतः त्वं ज्ञानयोगमेव आश्रयस्व ।

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥२.५०॥

पदच्छेदः - बुद्धियुक्तः, जहाति, इह, उभे, सुकृतदुष्कृते ।
तस्मात्, योगाय, युज्यस्व, योगः, कर्मसु, कौशलम् ॥

अन्वयः - बुद्धियुक्तः सुकृतदुष्कृते उभे इह जहाति । तस्मात् योगाय युज्यस्व । कर्मसु कौशलं योगः (उच्यते) ।

पदार्थः - बुद्धियुक्तः = ज्ञानसम्पन्नः, सुकृतदुष्कृते = सदसत्कर्मणी, उभे = द्वे, इह = अत्र, जहाति = परित्यजति, तस्मात् = तदर्थम्, योगाय = कर्मयोगाय, युज्यस्व = सन्नद्धो भव, कर्मसु = क्रियासु, कौशलम् = प्रावीण्यम्, योगः = योगः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
बुद्धियुक्तः	अ. पुं. प्र. एक.	सुकृतदुष्कृते	अ. नपुं. द्वि. द्विव. (विशेष्यम्)
उभे	अ. सर्व. नपुं. द्वि. द्विव. (विशेषणम्)	इह	अव्ययम्
जहाति	हा (ओहाक् त्यागे) पर. कर्तरि लट्. प्रपु. एक.	तस्मात्	तद् - द्. सर्व. नपुं. पं. एक. (विशेषणम्)
योगाय	अ. पुं. च. एक.	युज्यस्व	युज् (युज समाधौ) आत्म. कर्तरि लोट्. मपु. एक.
कर्मसु	कर्मन् - न. नपुं. स. बहु.	कौशलम्	अ. नपुं. प्र. एक.
योगः	अ. पुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः
- बुद्धियुक्तो जहाति — बुद्धियुक्तः + जहाति — विसर्गसन्धिः (सकारः) रेफः उकारः गुणः ।
- जहातीह — जहाति + इह — सवर्णदीर्घसन्धिः ।
- तस्माद्योगाय — तस्मात् + योगाय — जश्त्वसन्धिः ।

(ख) समासः
- बुद्धियुक्तः — बुद्ध्या युक्तः बुद्धियुक्तः - तृतीयातत्पुरुषः ।
- सुकृतदुष्कृते — सुकृतं च दुष्कृतं च सुकृतदुष्कृते - द्वन्द्वः ।

(ग) कृदन्तः
- बुद्धिः — बुध् (बुध अवगमने) + क्तिन् ।
- युक्तः — युज् (युजिर् योगे) + क्त (कर्तरि) ।
- सुकृतम् — सु + कृ (डुकृञ् करणे) + क्त (कर्मणि) ।
- दुष्कृतम् — दुस् + कृ (डुकृञ् करणे) + क्त (कर्मणि) ।
- योगाय — युज् (युजिर् योगे) + घञ् (भावे), तस्मै ।

(घ) तद्धितान्तः
- कौशलम् — कुशल + अण् (भावे) ।

भावस्पष्टीकरणम् -

कः जहाति ?	**बुद्धियुक्तः जहाति।**
बुद्धियुक्तः **के** जहाति ?	बुद्धियुक्तः **सुकृतदुष्कृते** जहाति।
बुद्धियुक्तः **के** सुकृतदुष्कृते जहाति ?	बुद्धियुक्तः **उभे** सुकृतदुष्कृते जहाति।
बुद्धियुक्तः उभे सुकृतदुष्कृते **कुत्र** जहाति ?	बुद्धियुक्तः उभे सुकृतदुष्कृते **इह** जहाति।
बुद्धियुक्तः उभे सुकृतदुष्कृते इह जहाति, तस्मात् **किम्** ?	बुद्धियुक्तः उभे सुकृतदुष्कृते इह जहाति, तस्मात् **युज्यस्व**।
बुद्धियुक्तः उभे सुकृतदुष्कृते इह जहाति, तस्मात् **कस्मै** युज्यस्व ?	बुद्धियुक्तः उभे सुकृतदुष्कृते इह जहाति, तस्मात् **योगाय** युज्यस्व।
बुद्धियुक्तः उभे सुकृतदुष्कृते इह जहाति, तस्मात् योगाय युज्यस्व। **योगः कः** ?	बुद्धियुक्तः उभे सुकृतदुष्कृते इह जहाति, तस्मात् योगाय युज्यस्व। **योगः कौशलम्**।
बुद्धियुक्तः उभे सुकृतदुष्कृते इह जहाति, तस्मात् योगाय युज्यस्व। योगः **केषु** कौशलम् ?	बुद्धियुक्तः उभे सुकृतदुष्कृते इह जहाति, तस्मात् योगाय युज्यस्व। योगः **कर्मसु** कौशलम्।

तात्पर्यम् - हे पार्थ ! ज्ञानमार्गं समाश्रितः जनः सुकृतं दुष्कृतं चेति द्वयमपि परित्यजति। त्वमपि तत् परित्यज। फलम् अनपेक्षमाणः कर्मसु सज्जो भव। कर्मसु कौशलमेव योगः इति उच्यते।

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्॥२.५१॥

पदच्छेदः - कर्मजम्, बुद्धियुक्ताः, हि, फलम्, त्यक्त्वा, मनीषिणः।
जन्मबन्धविनिर्मुक्ताः, पदम्, गच्छन्ति, अनामयम्॥

अन्वयः - बुद्धियुक्ताः हि मनीषिणः कर्मजं फलं त्यक्त्वा जन्मबन्धविनिर्मुक्ताः अनामयं पदं गच्छन्ति।

पदार्थः - बुद्धियुक्ताः = ज्ञानिनः, हि = यस्मात्, मनीषिणः = पण्डिताः, कर्मजम् = कर्मसम्भवम्, फलम् = प्रयोजनम्, त्यक्त्वा = विसृज्य, जन्मबन्धविनिर्मुक्ताः = जननरूपबन्धनरहिताः, अनामयम् = व्याधिशून्यम्, पदम् = स्थानम्, गच्छन्ति = प्राप्नुवन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
बुद्धियुक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)	हि	अव्ययम्

मनीषिणः	मनीषिन्- न. पुं. प्र. बहु. (विशेष्यम्)	कर्मजम्	अ. नपुं. द्वि. एक. (विशेषणम्)
फलम्	अ. नपुं. द्वि. एक.	त्यक्त्वा	क्त्वान्तम् अव्ययम्
जन्मबन्धविनिर्मुक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)	अनामयम्	अ. नपुं. द्वि. एक. (विशेषणम्)
पदम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	गच्छन्ति	गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. बहु.
पदम्	अ. नपुं. द्वि. एक.	गच्छन्ति	गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. बहु.

व्याकरणम् -

(क) सन्धिः बुद्धियुक्ता हि — बुद्धियुक्ताः + हि — विसर्गसन्धिः (लोपः)।
गच्छन्त्यनामयम् — गच्छन्ति + अनामयम् — यण्सन्धिः।

(ख) समासः कर्मजम् — कर्मणः जातम् कर्मजम् - कर्तरि डप्रत्ययः उपपदसमासश्च।
बुद्धियुक्ताः — बुद्ध्या युक्ताः बुद्धियुक्ताः - तृतीयातत्पुरुषः।
जन्मबन्धविनिर्मुक्ताः — जन्म एव बन्धः जन्मबन्धः - कर्मधारयः।
जन्मबन्धेन विनिर्मुक्ताः जन्मबन्धविनिर्मुक्ताः - तृतीयातत्पुरुषः।
अनामयम् — न विद्यते आमयः यस्मिन् तत् - बहुव्रीहिः।

(ग) कृदन्तः बुद्धिः — बुध् (बुध अवगमने) + क्तिन्।
युक्ताः — युज् (युजिर् योगे) + क्त (कर्तरि)।
फलम् — फल् (फल निष्पत्तौ) + अच्।
त्यक्त्वा — त्यज् (त्यज हानौ) + क्त्वा।
बन्धः — बन्ध् (बन्ध बन्धने) + क्त (कर्तरि)।
विनिर्मुक्ताः — वि + निर् + मुच् (मुच्लृ मोचने) + क्त (कर्तरि)।
आमयम् — आ + मी (मीङ् हिंसायाम्) + अच् (करणे)।

(घ) तद्धितान्तः मनीषिणः — मनीषा + इनि (मतुबर्थे)। मनीषा एषाम् एषु वा अस्ति।

भावस्पष्टीकरणम् -

गच्छन्ति।	
किं गच्छन्ति ?	**पदं** गच्छन्ति।
कीदृशं पदं गच्छन्ति ?	**अनामयं** पदं गच्छन्ति।
के अनामयं पदं गच्छन्ति ?	**मनीषिणः** अनामयं पदं गच्छन्ति।

कीदृशाः मनीषिणः अनामयं पदं गच्छन्ति ?	**बुद्धियुक्ताः** हि मनीषिणः अनामयं पदं गच्छन्ति ।
बुद्धियुक्ताः हि मनीषिणः **किं कृत्वा** अनामयं पदं गच्छन्ति ?	बुद्धियुक्ताः हि मनीषिणः **त्यक्त्वा अनामयं पदं** गच्छन्ति ।
बुद्धियुक्ताः हि मनीषिणः **किं** त्यक्त्वा अनामयं पदं गच्छन्ति ?	बुद्धियुक्ताः हि मनीषिणः **फलं** त्यक्त्वा अनामयं पदं गच्छन्ति ।
बुद्धियुक्ताः हि मनीषिणः **कीदृशं** फलं त्यक्त्वा अनामयं पदं गच्छन्ति ?	बुद्धियुक्ताः हि मनीषिणः **कर्मजं** फलं त्यक्त्वा अनामयं पदं गच्छन्ति ।
बुद्धियुक्ताः हि मनीषिणः कर्मजं फलं त्यक्त्वा **कथम्भूताः** अनामयं पदं गच्छन्ति ?	बुद्धियुक्ताः हि मनीषिणः कर्मजं फलं त्यक्त्वा **जन्मबन्धविनिर्मुक्ताः** अनामयं पदं गच्छन्ति ।

तात्पर्यम् - समबुद्धियुक्ताः ज्ञानिनः कर्मणः जायमानं फलं परित्यजन्ति । तेन जननरूपबन्धनात् विमुक्ताः सन्तः अन्ते अमृतमयं परमपदं प्राप्नुवन्ति ।

यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥२.५२॥

पदच्छेदः - यदा, ते, मोहकलिलम्, बुद्धिः, व्यतितरिष्यति ।
तदा, गन्तासि, निर्वेदम्, श्रोतव्यस्य, श्रुतस्य, च ॥

अन्वयः यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति तदा श्रोतव्यस्य श्रुतस्य च निर्वेदं गन्तासि ।

पदार्थः - यदा = यस्मिन्, ते = तव, बुद्धिः = मतिः, मोहकलिलम् = अविवेककालुष्यम्, व्यतितरिष्यति = अतिक्राम्यति, तदा = तस्मिन्, श्रोतव्यस्य = श्रवणीयस्य, श्रुतस्य च = श्रुतस्य च, निर्वेदम् = वैराग्यम्, गन्तासि = गमिष्यसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदा	अव्ययम्	ते	युष्मद् - द. सर्व. ष. एक.
बुद्धिः	इ. स्त्री. प्र. एक.	मोहकलिलम्	अ. नपुं. द्वि. एक.
व्यतितरिष्यति	वि + अति + तॄ (तॄ प्लवनतरणयोः) पर. कर्तरि लृट्. प्रपु. एक.	तदा	अव्ययम्

श्रोतव्यस्य	अ. नपुं. ष. एक.	श्रुतस्य	अ. नपुं. ष. एक.
च	अव्ययम्	निर्वेदम्	अ. पुं. द्वि. एक.
गन्तासि	गम् (गम्लृ गतौ) पर. कर्तरि लुट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः बुद्धिर्व्यतितरिष्यति बुद्धिः + व्यतितरिष्यति विसर्गसन्धिः (रेफः)।

(ख) समासः मोहकलिलम् मोहः एव कलिलम् मोहकलिलम् - कर्मधारयः।

निर्वेदम् निर्गतः वेदः यस्मात् सः निर्वेदः, तम् - बहुव्रीहिः।

(ग) कृदन्तः मोहः मुह् (मुह वैचित्ये) + घञ्।

बुद्धिः बुध् (बुध अवगमने) + क्तिन्।

श्रोतव्यस्य श्रु (श्रु श्रवणे) + तव्यत्, तस्य (कर्मणि)।

श्रुतस्य श्रु (श्रु श्रवणे) + क्त, तस्य (कर्मणि)।

भावस्पष्टीकरणम् -

व्यतितरिष्यति।	
का व्यतितरिष्यति ?	**बुद्धिः** व्यतितरिष्यति।
बुद्धिः **किं** व्यतितरिष्यति ?	बुद्धिः **मोहकलिलं** व्यतितरिष्यति।
कस्य बुद्धिः मोहकलिलं व्यतितरिष्यति ?	**ते** बुद्धिः मोहकलिलं व्यतितरिष्यति।
यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति **तदा किं भवति** ?	**यदा** ते बुद्धिः मोहकलिलं व्यतितरिष्यति **तदा गन्तासि**।
यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति तदा **कं** गन्तासि ?	यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति तदा **निर्वेदं** गन्तासि।
यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति तदा **कस्य कस्य च** निर्वेदं गन्तासि ?	यदा ते बुद्धिः मोहकलिलं व्यतितरिष्यति तदा **श्रोतव्यस्य श्रुतस्य च** निर्वेदं गन्तासि।

तात्पर्यम् - तव बुद्धिः इदानीम् अविवेकरूपेण कालुष्येण युक्ता अस्ति। तेन तव आत्मानात्मविवेकः नष्टः अस्ति। यदा तव बुद्धिः तस्मात् कालुष्यात् मुक्ता भविष्यति तदा अद्यावधि श्रुतेषु इतः परं श्रवणीयेषु च कर्मफलेषु अवश्यं वैराग्यं प्राप्स्यसि।

श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥२.५३॥

पदच्छेदः - श्रुतिविप्रतिपन्ना, ते, यदा, स्थास्यति, निश्चला।
समाधौ, अचला, बुद्धिः, तदा, योगम्, अवाप्स्यसि ॥

अन्वयः - यदा ते श्रुतिविप्रतिपन्ना बुद्धिः समाधौ निश्चला अचला (च) स्थास्यति तदा योगम् अवाप्स्यसि।

पदार्थः - यदा = यदा, ते = तव, श्रुतिविप्रतिपन्ना = वेदे संशयम् आपन्ना, बुद्धिः = धीः, समाधौ = चित्तवृत्तिनिरोधे, निश्चला = स्थिरा, अचला = कम्परहिता, स्थास्यति = भविष्यति, तदा = तदा, योगम् = योगनिष्ठाम्, अवाप्स्यसि = लप्स्यसे।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदा	अव्ययम्	ते	युष्मद् - द. सर्व. ष. एक.
श्रुतिविप्रतिपन्ना	आ. स्त्री. प्र. एक. (विशेषणम्)	बुद्धिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
समाधौ	इ. पुं. स. एक.	निश्चला	आ. स्त्री. प्र. एक. (विशेषणम्)
अचला	आ. स्त्री. प्र. एक. (विशेषणम्)	स्थास्यति	स्था (ष्ठा गतिनिवृत्तौ) पर. कर्तरि लृट्. प्रपु. एक.
तदा	अव्ययम्	योगम्	अ. पुं. द्वि. एक.
अवाप्स्यसि	अव + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लृट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः समाधावचला — समाधौ + अचला — यान्तवान्तादेशसन्धिः।
बुद्धिस्तदा — बुद्धिः + तदा — विसर्गसन्धिः (सकारः)।

(ख) समासः श्रुतिविप्रतिपन्ना — श्रुतौ विप्रतिपन्ना श्रुतिविप्रतिपन्ना - सप्तमीतत्पुरुषः।
अचला — न चला अचला - नञ्तत्पुरुषः।

(ग) कृदन्तः श्रुतिः — श्रु (श्रु श्रवणे) + क्तिन्।
विप्रतिपन्ना — वि + प्रति + पद् (पद गतौ) + क्त (कर्तरि)।
निश्चला — निर् + चल् (चल कम्पने) + अच्।
बुद्धिः — बुध् (बुध अवगमने) + क्तिन्।
योगम् — युज् (युजिर् योगे) + घञ् (भावे), तम्।

भावस्पष्टीकरणम् -

स्थास्यति ।	
का स्थास्यति ?	**बुद्धिः** स्थास्यति ।
कीदृशी बुद्धिः स्थास्यति ?	**श्रुतिविप्रतिपन्ना** बुद्धिः स्थास्यति ।
श्रुतिविप्रतिपन्ना बुद्धिः **कीदृशी** स्थास्यति ?	श्रुतिविप्रतिपन्ना बुद्धिः **निश्चला** स्थास्यति ।
श्रुतिविप्रतिपन्ना बुद्धिः निश्चला **पुनश्च कीदृशी** स्थास्यति ?	श्रुतिविप्रतिपन्ना बुद्धिः निश्चला **अचला** स्थास्यति ।
श्रुतिविप्रतिपन्ना बुद्धिः **कुत्र** निश्चला अचला स्थास्यति ?	श्रुतिविप्रतिपन्ना बुद्धिः **समाधौ** निश्चला अचला स्थास्यति ।
श्रुतिविप्रतिपन्ना **कस्य** बुद्धिः समाधौ निश्चला अचला स्थास्यति ?	श्रुतिविप्रतिपन्ना **ते** बुद्धिः समाधौ निश्चला अचला स्थास्यति ।
यदा श्रुतिविप्रतिपन्ना ते बुद्धिः समाधौ निश्चला अचला स्थास्यति **तदा किं भवति** ?	**यदा** श्रुतिविप्रतिपन्ना ते बुद्धिः समाधौ निश्चला अचला स्थास्यति **तदा अवाप्स्यसि** ।
यदा श्रुतिविप्रतिपन्ना ते बुद्धिः समाधौ निश्चला अचला स्थास्यति तदा **कम्** अवाप्स्यसि ?	यदा श्रुतिविप्रतिपन्ना ते बुद्धिः समाधौ निश्चला अचला स्थास्यति तदा **योगम्** अवाप्स्यसि ।

तात्पर्यम् - अनेकविधानां मतानां श्रवणेन तव बुद्धिः विचलिता स्यात् । सा यदा स्थिरीभूता कम्पवर्जिता च भविष्यति तदा समत्वरूपं योगम् अवाप्स्यसि ।

अर्जुन उवाच - स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥ २.५४ ॥

पदच्छेदः -

अर्जुनः, उवाच - स्थितप्रज्ञस्य, का, भाषा, समाधिस्थस्य, केशव ।
स्थितधीः, किम्, प्रभाषेत, किम्, आसीत, व्रजेत, किम् ॥

अन्वयः - केशव ! समाधिस्थस्य स्थितप्रज्ञस्य का भाषा ? स्थितधीः किं प्रभाषेत ? किम् आसीत ? किं व्रजेत ?

पदार्थः - केशव = कृष्ण, समाधिस्थस्य = योगनिष्ठस्य, स्थितप्रज्ञस्य = दृढबुद्धेः, का भाषा = किं लक्षणम्, स्थितधीः = दृढबुद्धिः, किम् = किम्, प्रभाषेत = वदेत्, किम् = कथम्, आसीत = उपविशेत्, किम् = कुत्र, व्रजेत = गच्छेत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
केशव	अ. पुं. सम्बो. एक.	समाधिस्थस्य	अ. पुं. ष. एक. (विशेषणम्)
स्थितप्रज्ञस्य	अ. पुं. ष. एक. (विशेष्यम्)	का	किम् - म. सर्व. स्त्री. प्र. एक. (विशेषणम्)
भाषा	आ. स्त्री. प्र. एक. (विशेष्यम्)	स्थितधीः	ई. पुं. प्र. एक.
किम्	किम् - अव्ययम्.	प्रभाषेत	प्र + भाष् (भाष व्यक्तायां वाचि) आत्म. कर्तरि विधिलिङ्. प्र. पु. एक.
आसीत	आस् (आस - उपवेशने) आत्म. कर्तरि विधिलिङ्. प्रपु. एक.	व्रजेत	व्रज् (व्रज गतौ)[1] पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) समासः स्थितप्रज्ञस्य — स्थिता प्रज्ञा यस्य सः स्थितप्रज्ञः, तस्य - बहुव्रीहिः।

समाधिस्थस्य — समाधौ स्थितः समाधिस्थः, तस्य - सप्तमीतत्पुरुषः।

स्थितधीः — स्थिता धीः यस्य सः स्थितधीः - बहुव्रीहिः।

(ख) कृदन्तः स्थितः — स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि)।

(ग) तद्धितान्तः केशव — केश + व (प्रशस्ताः केशाः सन्ति अस्य अस्मिन् वा)।

भावस्पष्टीकरणम् -

भाषा।	
कस्य भाषा ?	**स्थितप्रज्ञस्य** भाषा।
स्थितप्रज्ञस्य **कीदृशस्य** भाषा ?	स्थितप्रज्ञस्य **समाधिस्थस्य** भाषा।
स्थितप्रज्ञस्य समाधिस्थस्य भाषा **सा**।	स्थितप्रज्ञस्य समाधिस्थस्य भाषा **का** ?
(किञ्च सः) **स्थितधीः** (बहिर्मुखः चेत्) **तत् भाषेत, तत् आसीत, तत् व्रजेत**।	(किञ्च सः) **स्थितधीः** (बहिर्मुखः चेत्) **किं भाषेत, किम् आसीत, किं व्रजेत** ?
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**केशव** !

तात्पर्यम् - केशव ! यः एकाग्रतावान् भवति तस्य व्यवहारः कीदृशः भवति ? सोऽयं स्थितप्रज्ञः यदा बहिर्मुखः भवति तदा कथं भाषणं करोति ? कथं सः उपविशति ? कथं गच्छति ? स्थितप्रज्ञस्य लक्षणानि कानि ?

1. व्रजेत् इति रूपं भवेत्। अत्र आत्मनेपदित्वेन तु आर्षप्रयोगः।

श्रीभगवानुवाच - **प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान्।**
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥२.५५॥

पदच्छेदः -

श्रीभगवान्, उवाच - प्रजहाति, यदा, कामान्, सर्वान्, पार्थ, मनोगतान्।
आत्मनि, एव, आत्मना, तुष्टः, स्थितप्रज्ञः, तदा, उच्यते ॥

अन्वयः - पार्थ ! यदा सर्वान् मनोगतान् कामान् प्रजहाति आत्मना एव आत्मनि तुष्टः तदा स्थितप्रज्ञः उच्यते।

पदार्थः - पार्थ = अर्जुन !, यदा = यस्मिन् समये, सर्वान् = सकलान्, मनोगतान् = चित्तसन्निहितान्, कामान् = अभिलाषान्, प्रजहाति = परित्यजति, आत्मना = स्वेन, एव = एव, आत्मनि = स्वस्मिन्, तुष्टः = हृष्टः (सन्तुष्टः), तदा = तस्मिन् समये, स्थितप्रज्ञः = स्थिरबुद्धिः, उच्यते = कथ्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	यदा	अव्ययम्
सर्वान्	अ. सर्व. पुं. द्वि. बहु. (विशेषणम्)	कामान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
मनोगतान्	अ. पुं. द्वि. बहु. (विशेषणम्)	प्रजहाति	प्र + हा (ओहाक् त्यागे) पर. कर्तरि लट्. प्रपु. एक.
आत्मना	आत्मन् - न. पुं. तृ. एक.	एव	अव्ययम्
आत्मनि	आत्मन् - न. पुं. स. एक.	तुष्टः	अ. पुं. प्र. एक. (विशेषणम्)
तदा	अव्ययम्	स्थितप्रज्ञः	अ. पुं. प्र. एक.
उच्यते	वच् (वच परिभाषणे) - पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	आत्मन्येव	आत्मनि + एव	यण्सन्धिः।
	एवात्मना	एव + आत्मना	सवर्णदीर्घसन्धिः।
	स्थितप्रज्ञस्तदा	स्थितप्रज्ञः + तदा	विसर्गसन्धिः (सकारः)।
	तदोच्यते	तदा + उच्यते	गुणसन्धिः।
(ख) समासः	मनोगतान्	मनः गताः मनोगताः, तान् - द्वितीयातत्पुरुषः।	
	स्थितप्रज्ञः	स्थिता प्रज्ञा यस्य सः स्थितप्रज्ञः - बहुव्रीहिः।	
(ग) कृदन्तः	गतान्	गम् (गम्लृ गतौ) + क्त, तान् (कर्तरि)।	

	तुष्टः	तुष् (तुष प्रीतौ) + क्त (कर्तरि)।
	स्थितः	स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि)।
(घ) तद्धितान्तः	पार्थः	पृथा + अण् (अपत्यार्थे) (पृथायाः अपत्यं पुमान्)।

भावस्पष्टीकरणम् -

प्रजहाति।	
कान् प्रजहाति ?	**कामान्** प्रजहाति।
कति कामान् प्रजहाति ?	**सर्वान्** कामान् प्रजहाति।
सर्वान् **कीदृशान्** कामान् प्रजहाति ?	सर्वान् **मनोगतान्** कामान् प्रजहाति।
सर्वान् मनोगतान् कामान् **कीदृशः** प्रजहाति ?	सर्वान् मनोगतान् कामान् **तुष्टः** प्रजहाति।
सर्वान् मनोगतान् कामान् **केन** तुष्टः प्रजहाति ?	सर्वान् मनोगतान् कामान् **आत्मना** तुष्टः प्रजहाति।
सर्वान् मनोगतान् कामान् आत्मना **कुत्र** तुष्टः प्रजहाति ?	सर्वान् मनोगतान् कामान् आत्मना **आत्मनि** तुष्टः प्रजहाति।
यदा सर्वान् मनोगतान् कामान् आत्मना आत्मनि तुष्टः प्रजहाति **तदा कीदृशः उच्यते** ?	**यदा** सर्वान् मनोगतान् कामान् आत्मना आत्मनि तुष्टः प्रजहाति **तदा स्थितप्रज्ञः उच्यते।**
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अर्जुन ! यदा मनसि प्रविष्टान् सर्वान् अपि इच्छाभेदान् परित्यजति, यदा च निरपेक्षः सन् परमार्थदर्शनात् अन्यस्मिन् सर्वस्मिन् अपि विषये अनासक्तः भवति तदा आत्मना आत्मनि एव तुष्टिः भवति। सः एषः स्थितप्रज्ञः इति उच्यते।

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥२.५६॥

पदच्छेदः - दुःखेषु, अनुद्विग्नमनाः, सुखेषु, विगतस्पृहः।
वीतरागभयक्रोधः, स्थितधीः, मुनिः, उच्यते ॥

अन्वयः - दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः वीतरागभयक्रोधः स्थितधीः मुनिः उच्यते।

पदार्थः - दुःखेषु = आपत्सु, अनुद्विग्नमनाः = उद्वेगशून्यमनाः, सुखेषु = सम्पत्सु, विगतस्पृहः = नष्टाभिलाषः, वीतरागभयक्रोधः = रागद्वेषभयरहितः, स्थितधीः = दृढबुद्धिः, मुनिः = स्थितप्रज्ञः, उच्यते = कथ्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
दुःखेषु	अ. नपुं. स. बहु.	मुनिः	इ. पुं. प्र. एक. (विशेषणम्)
सुखेषु	अ. नपुं. स. बहु.	विगतस्पृहः	अ. पुं. प्र. एक. (विशेषणम्)
वीतरागभयक्रोधः	अ. पुं. प्र. एक. (विशेषणम्)	स्थितधीः	ई. पुं. प्र. एक (विशेषणम्)
अनुद्विग्नमनाः	अनुद्विग्नमनस् - सका. पुं. प्र. एक. (विशेषणम्)	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	दुःखेष्वनुद्विग्नमनाः	दुःखेषु + अनुद्विग्नमनाः	यण्सन्धिः ।
	स्थितधीर्मुनिः	स्थितधीः + मुनिः	विसर्गसन्धिः (रेफः) ।
	मुनिरुच्यते	मुनिः + उच्यते	विसर्गसन्धिः (रेफः) ।
(ख) समासः	अनुद्विग्नमनाः	अनुद्विग्नं मनः यस्य सः अनुद्विग्नमनाः - बहुव्रीहिः ।	
	विगतस्पृहः	विगता स्पृहा यस्मात् सः विगतस्पृहः - बहुव्रीहिः ।	
	वीतरागभयक्रोधः	रागः च भयं च क्रोधः च रागभयक्रोधाः - द्वन्द्वः । वीताः रागभयक्रोधाः यस्मात् सः वीतरागभयक्रोधः - बहुव्रीहिः ।	
	स्थितधीः	स्थिता धीः यस्य सः स्थितधीः - बहुव्रीहिः ।	
(ग) कृदन्तः	विगतः	वि + गम् (गम्लृ गतौ) + क्त (कर्तरि) ।	
	स्थितः	स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।	

भावस्पष्टीकरणम् -

उच्यते ।	
कः उच्यते ?	**स्थितधीः** उच्यते ।
कीदृशः स्थितधीः उच्यते ?	**मुनिः** स्थितधीः उच्यते ।
कीदृशः मुनिः स्थितधीः उच्यते ?	**अनुद्विग्नमनाः** मुनिः स्थितधीः उच्यते ।
केषु अनुद्विग्नमनाः मुनिः स्थितधीः उच्यते ?	**दुःखेषु** अनुद्विग्नमनाः मुनिः स्थितधीः उच्यते ।
दुःखेषु अनुद्विग्नमनाः **पुनश्च कीदृशः** मुनिः स्थितधीः उच्यते ?	दुःखेषु अनुद्विग्नमनाः **विगतस्पृहः** मुनिः स्थितधीः उच्यते ।
दुःखेषु अनुद्विग्नमनाः **केषु** विगतस्पृहः मुनिः स्थितधीः उच्यते ?	दुःखेषु अनुद्विग्नमनाः **सुखेषु** विगतस्पृहः मुनिः स्थितधीः उच्यते ।

दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः **पुनश्च कीदृशः** मुनिः स्थितधीः उच्यते ?	दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः **वीतरागभयक्रोधः** मुनिः स्थितधीः उच्यते ।

तात्पर्यम् - स्थितप्रज्ञस्य मनः दुःखेषु अनुद्विग्नं भवति । सः सुखेषु स्पृहावान् न भवति । रागात् भयात् क्रोधात् च सः अतीतः भवति ।

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥२.५७॥

पदच्छेदः - यः, सर्वत्र, अनभिस्नेहः, तत्, तत्, प्राप्य, शुभाशुभम् ।
न, अभिनन्दति, न, द्वेष्टि, तस्य, प्रज्ञा, प्रतिष्ठिता ॥

अन्वयः यः सर्वत्र अनभिस्नेहः तत् तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता (भवति) ।

पदार्थः यः = यः पुरुषः, सर्वत्र = सर्वदा, अनभिस्नेहः = अननुरागः, तत् तत् = तत् तत्, शुभाशुभम् = साधु असाधु वा, प्राप्य = लब्ध्वा, न अभिनन्दति = न प्रहृष्यति, न द्वेष्टि = न कलहायते, तस्य = तादृशस्य, प्रज्ञा = बुद्धिः, प्रतिष्ठिता = अतिस्थिरा ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	सर्वत्र	अव्ययम्
अनभिस्नेहः	अ. पुं. प्र. एक. (विशेषणम्)	तत्	तद् - द. सर्व. नपुं. द्वि. एक.
शुभाशुभम्	अ. नपुं. द्वि. एक.	प्राप्य	ल्यबन्तम् अव्ययम्
न	अव्ययम्	अभिनन्दति	अभि + नन्द् (टुनदि समृद्धौ) पर. कर्तरि लट्. प्रपु. एक.
द्वेष्टि	द्विष् (द्विष अप्रीतौ) पर. कर्तरि लट्. प्रपु. एक.	तस्य	तद् - द. सर्व. पुं. ष. एक. (विशेषणम्)
प्रज्ञा	आ. स्त्री. प्र. एक. (विशेष्यम्)	प्रतिष्ठिता	आ. स्त्री. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	सर्वत्रानभिस्नेहः	सर्वत्र + अनभिस्नेहः	सवर्णदीर्घसन्धिः ।
	अनभिस्नेहस्तत्	अनभिस्नेहः + तत्	विसर्गसन्धिः (सकारः) ।
	नाभिनन्दति	न + अभिनन्दति	सवर्णदीर्घसन्धिः ।

(ख) समासः अनभिस्नेहः — न विद्यते अभिस्नेहः यस्य सः अनभिस्नेहः - नञ्बहुव्रीहिः ।
शुभाशुभम् — शुभं च अशुभं च अनयोः समाहारः - द्वन्द्वः ।

(ग) कृदन्तः प्राप्य — प्र + आप् (आप्लृ व्याप्तौ) + ल्यप् ।
प्रज्ञा — प्र + ज्ञा (ज्ञा अवबोधने) + क + टाप् (स्त्रीत्वे) ।
प्रतिष्ठिता — प्रति + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) स्त्रीत्वे टाप् ।

भावस्पष्टीकरणम् -

न अभिनन्दति न द्वेष्टि ।	
किं कृत्वा न अभिनन्दति न द्वेष्टि ?	**प्राप्य** न अभिनन्दति न द्वेष्टि ।
किं प्राप्य न अभिनन्दति न द्वेष्टि ?	**शुभाशुभं** प्राप्य न अभिनन्दति न द्वेष्टि ।
किं किं शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि ?	**तत्तत्** शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि ।
कः तत्तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि ?	**अनभिस्नेहः** तत्तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि ।
कुत्र अनभिस्नेहः तत्तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि ?	**सर्वत्र** अनभिस्नेहः तत्तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि ।
यः सर्वत्र अनभिस्नेहः तत्तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि **तस्य किं भवति** ?	**यः** सर्वत्र अनभिस्नेहः तत्तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि **तस्य प्रज्ञा भवति** ।
यः सर्वत्र अनभिस्नेहः तत्तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा **कथम्भूता** भवति ?	यः सर्वत्र अनभिस्नेहः तत्तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा **प्रतिष्ठिता** भवति ।

तात्पर्यम् - स्थितप्रज्ञः देहजीवितादिषु सर्वत्र स्नेहरहितः भवति । सः शुभं प्राप्य न अभिनन्दति । अशुभं प्राप्य न द्वेष्टि । शुभाशुभयोः विषये सः निर्लिप्तः भवति ।

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥२.५८॥

पदच्छेदः - यदा, संहरते, च, अयम्, कूर्मः, अङ्गानि, इव, सर्वशः ।
इन्द्रियाणि, इन्द्रियार्थेभ्यः, तस्य, प्रज्ञा, प्रतिष्ठिता ॥

अन्वयः - यदा अयं कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तस्य प्रज्ञा प्रतिष्ठिता (भवति) ।

पदार्थः - यदा = यस्मिन् समये, अयम् = एषः, कूर्मः = कच्छपः, अङ्गानि इव = अवयवान् इव, सर्वशः = सर्वथा, इन्द्रियाणि = नेत्रादीनीन्द्रियाणि, इन्द्रियार्थेभ्यः = विषयेभ्यः, संहरते = प्रत्यावर्तयति, तस्य = तस्य पुरुषस्य, प्रज्ञा = बुद्धिः, प्रतिष्ठिता = अतिस्थिरा ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदा	अव्ययम्	अयम्	इदम् - म. सर्व. पुं. प्र. एक. (विशेषणम्)
कूर्मः	अ. पुं. प्र. एक. (विशेष्यम्)	अङ्गानि	अ. नपुं. द्वि. बहु.
इव	अव्ययम्	सर्वशः	अव्ययम्
इन्द्रियाणि	अ. नपुं. द्वि. बहु.	इन्द्रियार्थेभ्यः	अ. नपुं. पं. बहु.
संहरते	सम् + हृ (हृञ् हरणे) आत्म. कर्तरि लट्. प्रपु. एक.	तस्य	तद् - द. सर्व. पुं. ष. एक. (विशेषणम्)
प्रज्ञा	आ. स्त्री. प्र. एक. (विशेष्यम्)	प्रतिष्ठिता	आ. स्त्री. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	चायम्	च + अयम्	सवर्णदीर्घसन्धिः ।
	कूर्मोऽङ्गानि	कूर्मः + अङ्गानि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
	अङ्गानीव	अङ्गानि + इव	सवर्णदीर्घसन्धिः ।
	इन्द्रियाणीन्द्रियार्थेभ्यः	इन्द्रियाणि + इन्द्रियार्थेभ्यः	सवर्णदीर्घसन्धिः ।
	इन्द्रियार्थेभ्यस्तस्य	इन्द्रियार्थेभ्यः + तस्य	विसर्गसन्धिः (सकारः) ।
(ख) समासः	इन्द्रियार्थेभ्यः	इन्द्रियाणाम् अर्थाः, तेभ्यः - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	प्रज्ञा	प्र + ज्ञा (ज्ञा अवबोधने) + क + टाप् (स्त्रीत्वे) ।	
	प्रतिष्ठिता	प्रति + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) स्त्रीत्वे टाप् ।	
(घ) तद्धितान्तः	सर्वशः	सर्व + शस् ।	

भावस्पष्टीकरणम् -

संहरते ।	
कः संहरते ?	**अयं** संहरते ।
अयं **केभ्यः** संहरते ?	अयम् **इन्द्रियार्थेभ्यः** संहरते ।
अयं **कानि** इन्द्रियार्थेभ्यः संहरते ?	अयम् **इन्द्रियाणि** इन्द्रियार्थेभ्यः संहरते ।
अयं **कथम्** इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते ?	अयं **सर्वशः** इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते ।
अयं **कानि** इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते ?	अयम् **अङ्गानि** इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते ।

अयं **कः** अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते ?	अयं **कूर्मः** अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते।
यदा अयं कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तदा **किं भवति** ?	यदा अयं कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तदा **प्रज्ञा भवति**।
यदा अयं कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तदा प्रज्ञा **कथम्भूता** भवति ?	यदा अयं कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तदा प्रज्ञा **प्रतिष्ठिता** भवति।
यदा अयं कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तदा **कस्य** प्रज्ञा प्रतिष्ठिता ?	यदा अयं कूर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तदा **तस्य** प्रज्ञा प्रतिष्ठिता।

तात्पर्यम् - इन्द्रियाणि सर्वदापि शब्दादिषु विषयेषु प्रवृत्तानि भवन्ति। कूर्मः यथा भयात् स्वानि अङ्गानि सङ्कोचयति तथा यदा अयं ज्ञाननिष्ठायां प्रवृत्तः जनः सर्वाणि इन्द्रियाणि शब्दादिभ्यः सङ्कोचयति तदा तस्य प्रज्ञा प्रतिष्ठिता भवति। स च स्थितप्रज्ञो भवति।

विषया विनिवर्तन्ते निराहारस्य देहिनः।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते॥२.५९॥

पदच्छेदः - विषयाः, विनिवर्तन्ते, निराहारस्य, देहिनः।
रसवर्जम्, रसः, अपि, अस्य, परम्, दृष्ट्वा, निवर्तते॥

अन्वयः - निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्तन्ते (किन्तु) अस्य रसः अपि परं दृष्ट्वा (स्थितस्य) निवर्तते।

पदार्थः - निराहारस्य = निरशनस्य, देहिनः = शरीरधारिणः, विषयाः = इन्द्रियविषयाः, रसवर्जम् = तद्विषयकप्रीतिं विना, विनिवर्तन्ते = अपगच्छन्ति, अस्य = एतस्य, रसः = रुचिः, अपि = अपि, परम् = परमात्मानम्, दृष्ट्वा = अवलोक्य, निवर्तते = अपयाति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
निराहारस्य	अ. पुं. ष. एक. (विशेषणम्)	देहिनः	देहिन् - न. पुं. ष. एक. (विशेष्यम्)
विषयाः	अ. पुं. प्र. बहु.	रसवर्जम्	णमुलन्तम् अव्ययम्
विनिवर्तन्ते	वि + नि + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु.	अस्य	इदम् - म. सर्व. पुं. ष. एक. (विशेषणम्)
रसः	अ. पुं. प्र. एक.	अपि	अव्ययम्

परम्	अ. नपुं. प्र. एक.	दृष्ट्वा	क्त्वान्तम् अव्ययम् ·
निवर्तते	नि + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	विषया विनिवर्तन्ते	विषयाः + विनिवर्तन्ते	विसर्गसन्धिः (लोपः) ।
	रसोऽपि	रसः + अपि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
	अप्यस्य	अपि + अस्य	यण्सन्धिः ।
(ख) समासः	निराहारस्य	निर्गतः आहारः यस्मात् सः निराहारः, तस्य - बहुव्रीहिः ।	
	रसवर्जम्	रसं वर्जयित्वा - भावे णमुल्प्रत्ययः उपपदसमासश्च ।	
(ग) कृदन्तः	दृष्ट्वा	दृश् (दृशिर् प्रेक्षणे) + क्त्वा ।	
(घ) तद्धितान्तः	देहिनः	देह + इनि (मतुबर्थे) । देहः अस्य अस्मिन् वा अस्ति ।	

भावस्पष्टीकरणम् -

विनिवर्तन्ते ।	
के विनिवर्तन्ते ?	**विषयाः** विनिवर्तन्ते ।
कस्य विषयाः विनिवर्तन्ते ?	**देहिनः** विषयाः विनिवर्तन्ते ।
कीदृशस्य देहिनः विषयाः विनिवर्तन्ते ?	**निराहारस्य** देहिनः विषयाः विनिवर्तन्ते ।
निराहारस्य देहिनः विषयाः **कथं** विनिवर्तन्ते ?	निराहारस्य देहिनः विषयाः **रसवर्जं** विनिवर्तन्ते ।
निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्तन्ते (किन्तु) **कथं रसोऽपि निवर्तते** ?	निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्तन्ते किन्तु **दृष्ट्वा (स्थितस्य) रसोऽपि निवर्तते** ।
निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्तन्ते किन्तु **किं** दृष्ट्वा स्थितस्य रसोऽपि निवर्तते ?	निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्तन्ते किन्तु **परं** दृष्ट्वा स्थितस्य रसोऽपि निवर्तते ।
निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्तन्ते किन्तु परं दृष्ट्वा स्थितस्य **कस्य** रसोऽपि निवर्तते ?	निराहारस्य देहिनः विषयाः रसवर्जं विनिवर्तन्ते किन्तु परं दृष्ट्वा स्थितस्य **अस्य** रसोऽपि निवर्तते ।

तात्पर्यम् - यः रोगपीडितः भवति तस्य निराहारत्वात् सर्वेऽपि विषयाः अपगच्छन्ति । किन्तु तद्विषयकस्नेहः न अपगच्छति । परन्तु स्थितप्रज्ञस्य तु सः यदा अवहितः सन् परतत्त्वम् अनुसन्दधाति तदा विषयस्नेहोऽपि अपगच्छति ।

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥२.६०॥

पदच्छेदः - यततः, हि, अपि, कौन्तेय, पुरुषस्य, विपश्चितः ।
इन्द्रियाणि, प्रमाथीनि, हरन्ति, प्रसभम्, मनः ॥

अन्वयः - कौन्तेय ! यततः अपि विपश्चितः पुरुषस्य मनः प्रमाथीनि इन्द्रियाणि प्रसभं हरन्ति हि ।

पदार्थः - कौन्तेय = अर्जुन ! यततः = (समाधौ) प्रयत्नं कुर्वतः, अपि = अपि, विपश्चितः = विदुषः, पुरुषस्य = मनुष्यस्य, मनः = चित्तम्, प्रमाथीनि = प्रपीडकानि, इन्द्रियाणि = नेत्रादीनि इन्द्रियाणि, प्रसभम् = हठात्, हरन्ति = आकर्षन्ति, हि = किल ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	यततः	यतत् - त. पुं. ष. एक. (विशेषणम्)
हि	अव्ययम्	अपि	अव्ययम्
विपश्चितः	विपश्चित् - त. पुं. ष. एक. (विशेषणम्)	पुरुषस्य	अ. पुं. ष. एक. (विशेष्यम्)
मनः	मनस् - सका. नपुं. प्र. एक.	प्रमाथीनि	प्रमाथिन् - न. नपुं. प्र. बहु. (विशेषणम्)
इन्द्रियाणि	अ. नपुं. प्र. बहु. (विशेष्यम्)	प्रसभम्	अव्ययम्
हरन्ति	हृ (हृञ् हरणे) - पर. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः	यततो हि	यततः + हि	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः ।
	ह्यपि	हि + अपि	यण्सन्धिः ।
(ख) समासः	विपश्चितः	विप्रकृष्टं चिनोति चेतति चिन्तयति वा इति - कर्तरि क्विप् उपपदसमासश्च ।	
	प्रसभम्	प्रगता सभा समानाधिकारो यस्मात् तत् प्रसभम् - प्रादिबहुव्रीहिः ।	
(ग) कृदन्तः	यततः	यत् + शतृ (कर्तरि) तस्य ।	
	प्रमाथीनि	प्र + मन्थ् (मन्थ विलोडने) + णिनि ।	
(घ) तद्धितान्तः	कौन्तेय	कुन्ती + ठक् (कुन्त्याः अपत्यं पुमान् इत्यर्थे) ।	

भावस्पष्टीकरणम् -

हरन्ति ।	
कानि हरन्ति ?	**इन्द्रियाणि** हरन्ति ।

कीदृशानि इन्द्रियाणि हरन्ति ?	**प्रमाथीनि** इन्द्रियाणि हरन्ति ।
प्रमाथीनि इन्द्रियाणि **किं** हरन्ति ?	प्रमाथीनि इन्द्रियाणि **मनः** हरन्ति ।
प्रमाथीनि इन्द्रियाणि **कस्य** मनः हरन्ति ?	प्रमाथीनि इन्द्रियाणि **पुरुषस्य** मनः हरन्ति ।
प्रमाथीनि इन्द्रियाणि **कीदृशस्य** पुरुषस्य मनः हरन्ति ?	प्रमाथीनि इन्द्रियाणि **विपश्चितः** पुरुषस्य मनः हरन्ति ।
प्रमाथीनि इन्द्रियाणि **किं कुर्वतः अपि** विपश्चितः पुरुषस्य मनः हरन्ति ?	प्रमाथीनि इन्द्रियाणि **यततः अपि** विपश्चितः पुरुषस्य मनः हरन्ति ।
प्रमाथीनि इन्द्रियाणि यततः अपि विपश्चितः पुरुषस्य मनः **कथं** हरन्ति हि ?	प्रमाथीनि इन्द्रियाणि यततः अपि विपश्चितः पुरुषस्य मनः **प्रसभं** हरन्ति हि ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय !**

तात्पर्यम् - कौन्तेय ! इन्द्रियाणि प्रमथनशीलानि भवन्ति । तानि समाधौ प्रयत्नं कुर्वतः मेधाविनः पुरुषस्य अपि मनः बलात् आकर्षन्ति ।

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥२.६१॥

पदच्छेदः - तानि, सर्वाणि, संयम्य, युक्तः, आसीत, मत्परः ।
वशे, हि, यस्य, इन्द्रियाणि, तस्य, प्रज्ञा, प्रतिष्ठिता ॥

अन्वयः तानि सर्वाणि संयम्य युक्तः मत्परः आसीत । यस्य वशे इन्द्रियाणि (सन्ति) तस्य प्रज्ञा प्रतिष्ठिता (भवति) ।

पदार्थः तानि = इन्द्रियाणि, सर्वाणि = सकलानि, संयम्य = निरुद्ध्य, युक्तः = योगी, मत्परः = मयि आसक्तः, आसीत = तिष्ठेत्, यस्य = यस्य, वशे = आधीन्ये, इन्द्रियाणि = नेत्रादीनि इन्द्रियाणि, तस्य = तस्य पुरुषस्य, प्रज्ञा = बुद्धिः, प्रतिष्ठिता = अतिस्थिरा ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तानि	तद् - द. सर्व. नपुं. द्वि. बहु. (विशेषणम्)	सर्वाणि	अ. सर्व. नपुं. द्वि. बहु. (विशेषणम्)
संयम्य	ल्यबन्त अव्ययम्	युक्तः	अ. पुं. प्र. एक.
मत्परः	अ. पुं. प्र. एक.	आसीत	आस् (आस उपवेशने) आत्म. कर्तरि विधिलिङ्. प्रपु. एक.

यस्य	यद् - द. सर्व. पुं. ष. एक. (विशेषणम्)	वशे	अ. पुं. स. एक.
इन्द्रियाणि	अ. नपुं. प्र. बहु.	तस्य	तद् - द. सर्व. पुं. ष. एक. (विशेषणम्)
प्रज्ञा	आ. स्त्री. प्र. एक. (विशेष्यम्)	प्रतिष्ठिता	आ. स्त्री. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः युक्त आसीत — युक्तः + आसीत — विसर्गसन्धिः (लोपः)।
यस्येन्द्रियाणि — यस्य + इन्द्रियाणि — गुणसन्धिः।

(ख) समासः मत्परः — मम परः - षष्ठीतत्पुरुषः।

(ग) कृदन्तः संयम्य — सम् + यम् (यम उपरमे) + ल्यप्।
युक्तः — युज् (युजिर् योगे) + क्त (कर्तरि)।
प्रज्ञा — प्र + ज्ञा (ज्ञा अवबोधने) + क + टाप् (स्त्रीत्वे)।
प्रतिष्ठिता — प्रति + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) स्त्रीत्वे टाप्।

भावस्पष्टीकरणम् -

आसीत।	
कीदृशः आसीत ?	**मत्परः** आसीत।
पुनश्च कीदृशः मत्परः आसीत ?	**युक्तः** मत्परः आसीत।
किं कृत्वा युक्तः मत्परः आसीत।	**संयम्य** युक्तः मत्परः आसीत।
कानि संयम्य युक्तः मत्परः आसीत ?	**तानि** संयम्य युक्तः मत्परः आसीत।
तानि **कति** संयम्य युक्तः मत्परः आसीत ?	तानि **सर्वाणि** संयम्य युक्तः मत्परः आसीत।
तानि सर्वाणि संयम्य युक्तः मत्परः आसीत। **तस्य किं भवति** ?	तानि सर्वाणि संयम्य युक्तः मत्परः आसीत। **तस्य प्रज्ञा भवति।**
तानि सर्वाणि संयम्य युक्तः मत्परः आसीत। तस्य प्रज्ञा **कथम्भूता** भवति ?	तानि सर्वाणि संयम्य युक्तः मत्परः आसीत। तस्य प्रज्ञा **प्रतिष्ठिता** भवति।
तानि सर्वाणि संयम्य युक्तः मत्परः आसीत। **कीदृशस्य** तस्य प्रज्ञा प्रतिष्ठिता भवति ?	तानि सर्वाणि संयम्य युक्तः मत्परः आसीत। **यस्य इन्द्रियाणि तस्य** प्रज्ञा प्रतिष्ठिता भवति।
तानि सर्वाणि संयम्य युक्तः मत्परः आसीत। यस्य इन्द्रियाणि **कस्मिन्** (सन्ति) तस्य प्रज्ञा प्रतिष्ठिता भवति ?	तानि सर्वाणि संयम्य युक्तः मत्परः आसीत। यस्य इन्द्रियाणि **वशे** सन्ति तस्य प्रज्ञा प्रतिष्ठिता भवति।

तात्पर्यम् - यः योगी तानि सर्वाणि इन्द्रियाणि संयम्य मयि आसक्तः भूत्वा तिष्ठति तस्य प्रज्ञा निश्चला भवति।

ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ।
सङ्गात्सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥२.६२॥
क्रोधाद्भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥२.६३॥

पदच्छेदः - ध्यायतः, विषयान्, पुंसः, सङ्गः, तेषु, उपजायते ।
सङ्गात्, सञ्जायते, कामः, कामात्, क्रोधः, अभिजायते ॥
क्रोधात्, भवति, सम्मोहः, सम्मोहात्, स्मृतिविभ्रमः ।
स्मृतिभ्रंशात्, बुद्धिनाशः, बुद्धिनाशात्, प्रणश्यति ॥

अन्वयः विषयान् ध्यायतः पुंसः तेषु सङ्गः उपजायते । सङ्गात् कामः सञ्जायते । कामात् क्रोधः अभिजायते । क्रोधात् सम्मोहः भवति । सम्मोहात् स्मृतिविभ्रमः, स्मृतिभ्रंशात् बुद्धिनाशः, बुद्धिनाशात् प्रणश्यति ।

पदार्थः - विषयान् = इन्द्रियविषयान्, ध्यायतः = चिन्तयतः, पुंसः = पुरुषस्य, तेषु = तेषु विषयेषु, सङ्गः = आसक्तिः, उपजायते = उद्भवति, सङ्गात् = आसक्तेः, कामः = वाञ्छा, सञ्जायते = निष्पद्यते, कामात् = वाञ्छायाः, क्रोधः = रोषः, अभिजायते = सम्भवति, क्रोधात् = रोषात्, सम्मोहः = व्यामोहः, भवति = जायते, सम्मोहात् = व्यामोहात्, स्मृतिविभ्रमः = स्मरणनाशः, स्मृतिभ्रंशात् = स्मरणनाशात्, बुद्धिनाशः = मतिनाशः, बुद्धिनाशात् = मतिनाशात्, प्रणश्यति = विनष्टो भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विषयान्	अ. पुं. द्वि. बहु.	ध्यायतः	ध्यायत् - त. पुं. ष. एक. (विशेषणम्)
पुंसः	पुंस् - सका. पुं. ष. एक. (विशेष्यम्)	तेषु	तद् - द. सर्व. पुं. स. बहु. (विशेषणम्)
सङ्गः	अ. पुं. प्र. एक.	उपजायते	उप + जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.
सङ्गात्	अ. पुं. पं. एक.	कामः	अ. पुं. प्र. एक.
सञ्जायते	सम् + जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.	कामात्	अ. पुं. पं. एक.
क्रोधः	अ. पुं. प्र. एक.	अभिजायते	अभि + जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.
क्रोधात्	अ. पुं. पं. एक.	सम्मोहः	अ. पुं. प्र. एक.

भवति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.	सम्मोहात्	अ. पुं. पं. एक.
स्मृतिविभ्रमः	अ. पुं. प्र. एक.	स्मृतिभ्रंशात्	अ. पुं. पं. एक.
बुद्धिनाशः	अ. पुं. प्र. एक.	बुद्धिनाशात्	अ. पुं. पं. एक.
प्रणश्यति	प्र + नश् (णश अदर्शने) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

ध्यायतो विषयान्	ध्यायतः + विषयान्	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
सङ्गस्तेषु	सङ्गः + तेषु	विसर्गसन्धिः (सकारः)।
तेषूपजायते	तेषु + उपजायते	सवर्णदीर्घसन्धिः।
क्रोधोऽभिजायते	क्रोधः + अभिजायते	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः पूर्वरूपं च।
क्रोधाद्भवति	क्रोधात् + भवति	जश्त्वसन्धिः।
स्मृतिभ्रंशाद्बुद्धिनाशः	स्मृतिभ्रंशात् + बुद्धिनाशः	जश्त्वसन्धिः।
बुद्धिनाशो बुद्धिनाशात्	बुद्धिनाशः + बुद्धिनाशात्	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।

(ख) समासः

स्मृतिविभ्रमः	स्मृतेः विभ्रमः स्मृतिविभ्रमः - षष्ठीतत्पुरुषः।
स्मृतिभ्रंशात्	स्मृतेः भ्रंशः स्मृतिभ्रंशः, तस्मात् - षष्ठीतत्पुरुषः।
बुद्धिनाशः	बुद्धेः नाशः बुद्धिनाशः - षष्ठीतत्पुरुषः।

(ग) कृदन्तः

ध्यायतः	ध्यै (ध्यै चिन्तायाम्) + शतृ (कर्तरि), तस्य।
सङ्गः	सञ्ज् (षञ्ज सङ्गे) + घञ् (भावे)।
कामः	कम् (कमु कान्तौ) + घञ्।
क्रोधः	क्रुध् (क्रुध क्रोधे) + घञ्।
सम्मोहः	सम् + मुह् (मुह वैचित्ये) + घञ्।
स्मृतिः	स्मृ (स्मृ चिन्तायाम्) + क्तिन्।
विभ्रमः	वि + भ्रम् (भ्रमु चलने) + घञ्।
भ्रंशात्	भ्रंश् (भ्रंशु अवस्रंसने) + घञ्, तस्मात्।
बुद्धिः	बुध् (बुध अवगमने) + क्तिन्।
नाशः	नश् (णश अदर्शने) + घञ्।

भावस्पष्टीकरणम् -

उपजायते ।	
कः उपजायते ?	**सङ्गः** उपजायते ।
सङ्गः **केषु** उपजायते ?	सङ्गः **तेषु** उपजायते ।
कस्य सङ्गः तेषु उपजायते ?	**पुंसः** सङ्गः तेषु उपजायते ।
किं कुर्वतः पुंसः सङ्गः तेषु उपजायते ?	**ध्यायतः** पुंसः सङ्गः तेषु उपजायते ।
कान् ध्यायतः पुंसः सङ्गः तेषु उपजायते ?	**विषयान्** ध्यायतः पुंसः सङ्गः तेषु उपजायते ।
विषयान् ध्यायतः पुंसः सङ्गः तेषु उपजायते । **तस्मात् किं भवति** ?	विषयान् ध्यायतः पुंसः सङ्गः तेषु उपजायते । **तस्मात् सञ्जायते ।**
तस्मात् **कः** सञ्जायते ?	तस्मात् **कामः** सञ्जायते ।
तस्मात् कामः सञ्जायते । **तस्मात् किं भवति** ?	तस्मात् **अभिजायते ।**
तस्मात् **कः** अभिजायते ?	तस्मात् **क्रोधः** अभिजायते ।
तस्मात् क्रोधः अभिजायते । **तस्मात् कः भवति** ?	तस्मात् **सम्मोहः** भवति ।
सम्मोहात् **कः** भवति ?	सम्मोहात् **स्मृतिविभ्रमः** भवति ।
स्मृतिभ्रंशात् **कः** भवति ?	स्मृतिभ्रंशात् **बुद्धिनाशः** भवति ।
बुद्धिनाशात् **किं** भवति ?	बुद्धिनाशात् **प्रणश्यति ।**

तात्पर्यम् - शब्दादिविषयान् आलोचयतः पुरुषस्य तेषु आसक्तिः उपजायते । तस्याः आसक्तेः तृष्णा सञ्जायते । यदि सा तृष्णा प्रतिहता भवति तर्हि क्रोधः अभिजायते । क्रोधात् अविवेकः उत्पद्यते । अविवेकात् शास्त्राध्ययनेन गुरूपदेशेन वा प्राप्तायाः स्मृतेः भ्रंशः भवति । स्मृतिभ्रंशात् बुद्धिनाशः भवति । बुद्धिनाशात् पुरुषः नष्टो भवति ।

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥२.६४ ॥

पदच्छेदः - रागद्वेषवियुक्तैः, तु, विषयान्, इन्द्रियैः, चरन् ।
आत्मवश्यैः, विधेयात्मा, प्रसादम्, अधिगच्छति ॥

अन्वयः - विधेयात्मा तु रागद्वेषवियुक्तैः आत्मवश्यैः इन्द्रियैः विषयान् चरन् प्रसादम् अधिगच्छति ।

पदार्थः - विधेयात्मा = वश्यमनस्कः (नियन्त्रितचित्तः), तु = तु, रागद्वेषवियुक्तैः = अनुरागविरोधशून्यैः,

आत्मवश्यैः = स्वाधीनैः, इन्द्रियैः = नेत्रादिभिः इन्द्रियैः, विषयान् = रूपादीन्, चरन् = अनुभवन्, प्रसादम् = नैर्मल्यम्, अधिगच्छति = लभते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
विधेयात्मा	विधेयात्मन् - न. पुं. प्र. एक.	तु	अव्ययम्
रागद्वेषवियुक्तैः	अ. नपुं. तृ. बहु. (विशेषणम्)	आत्मवश्यैः	अ. नपुं. तृ. बहु. (विशेषणम्)
इन्द्रियैः	अ. नपुं. तृ. बहु. (विशेष्यम्)	विषयान्	अ. पुं. द्वि. बहु.
चरन्	चरत् - त. पुं. प्र. एक. (विशेषणम्)	प्रसादम्	अ. पुं. द्वि. एक.
अधिगच्छति	अधि + गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	रागद्वेषवियुक्तैस्तु	रागद्वेषवियुक्तैः + तु	विसर्गसन्धिः (सकारः) ।
	इन्द्रियैश्चरन्	इन्द्रियैः + चरन्	विसर्गसन्धिः (सकारः) श्चुत्वं च ।
	आत्मवश्यैर्विधेयात्मा	आत्मवश्यैः + विधेयात्मा	विसर्गसन्धिः (रेफः) ।
(ख) समासः	रागद्वेषवियुक्तैः	रागश्च द्वेषश्च रागद्वेषौ - द्वन्द्वः ।	
		रागद्वेषाभ्यां वियुक्तानि रागद्वेषवियुक्तानि, तैः - तृतीयातत्पुरुषः ।	
	आत्मवश्यैः	आत्मनः वश्यानि आत्मवश्यानि, तैः - षष्ठीतत्पुरुषः ।	
	विधेयात्मा	विधेयः आत्मा यस्य सः विधेयात्मा - बहुव्रीहिः ।	
(ग) कृदन्तः	वियुक्तः	वि + युज् (युजिर् योगे) + क्त (कर्मणि) ।	
	चरन्	चर् (चर गति भक्षणयोः) + शतृ (कर्तरि) ।	
	प्रसादम्	प्र + सद् (षदलृ विशरणगत्यवसादनेषु) + घञ्, तम् ।	

भावस्पष्टीकरणम् -

अधिगच्छति ।	
कम् अधिगच्छति ।	**प्रसादम्** अधिगच्छति ।
किं कुर्वन् प्रसादम् अधिगच्छति ?	**चरन्** प्रसादम् अधिगच्छति ।
कान् चरन् प्रसादम् अधिगच्छति ?	**विषयान्** चरन् प्रसादम् अधिगच्छति ।
कैः विषयान् चरन् प्रसादम् अधिगच्छति ?	**इन्द्रियैः** विषयान् चरन् प्रसादम् अधिगच्छति ।
कीदृशैः इन्द्रियैः विषयान् चरन् प्रसादम् अधिगच्छति ?	**रागद्वेषवियुक्तैः** इन्द्रियैः विषयान् चरन् प्रसादम् अधिगच्छति ।

रागद्वेषवियुक्तैः **पुनश्च कीदृशैः** इन्द्रियैः विषयान् चरन् प्रसादम् अधिगच्छति ?	रागद्वेषवियुक्तैः **आत्मवश्यैः** इन्द्रियैः विषयान् चरन् प्रसादम् अधिगच्छति।
कः रागद्वेषवियुक्तैः आत्मवश्यैः इन्द्रियैः विषयान् चरन् प्रसादम् अधिगच्छति ?	**विधेयात्मा** तु रागद्वेषवियुक्तैः आत्मवश्यैः इन्द्रियैः विषयान् चरन् प्रसादम् अधिगच्छति।

तात्पर्यम् - वस्तुतः रागद्वेषपुरःसरा एव इन्द्रियाणां प्रवृत्तिः भवति। परन्तु यः मुमुक्षुः अस्ति सः ताभ्यां वियुक्तत्वात् स्ववशे वर्तमानैः श्रोत्रादिभिः इन्द्रियैः विषयान् उपसेवमानः प्रसन्नतां लभते।

प्रसादे सर्वदुःखानां हानिरस्योपजायते।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते॥२.६५॥

पदच्छेदः - प्रसादे, सर्वदुःखानाम्, हानिः, अस्य, उपजायते।
प्रसन्नचेतसः, हि, आशु, बुद्धिः, पर्यवतिष्ठते॥

अन्वयः - प्रसादे (सति) अस्य सर्वदुःखानां हानिः उपजायते। प्रसन्नचेतसः हि बुद्धिः आशु पर्यवतिष्ठते।

पदार्थः प्रसादे = चित्तनैर्मल्ये, अस्य = एतस्य, सर्वदुःखानाम् = सकलविषादानाम्, हानिः = नाशः, उपजायते = सम्भवति, प्रसन्नचेतसः = निर्मलचित्तस्य, हि = एव, बुद्धिः = मनः, आशु = शीघ्रम्, पर्यवतिष्ठते = निश्चलं भवति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रसादे	अ. पुं. स. एक.	अस्य	इदम् - म. सर्व. पुं. ष. एक. (विशेषणम्)
सर्वदुःखानाम्	अ. नपुं. ष. बहु.	हानिः	इ. स्त्री. प्र. एक.
उपजायते	उप + जन् (जनी प्रादुर्भावे) आत्म. कर्तरि लट्. प्रपु. एक.	प्रसन्नचेतसः	प्रसन्नचेतस् - स. पुं. ष. एक.
हि	अव्ययम्	बुद्धिः	इ. स्त्री. प्र. एक.
आशु	उ. नपुं. द्वि. एक. (क्रियाविशेषणम्)	पर्यवतिष्ठते	परि + अव + स्था (ष्ठा गतिनिवृत्तौ आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः

हानिरस्य	हानिः + अस्य	विसर्गसन्धिः (रेफः)।
अस्योपजायते	अस्य + उपजायते	गुणसन्धिः।
प्रसन्नचेतसो हि	प्रसन्नचेतसः + हि	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
ह्याशु	हि + आशु	यण्सन्धिः।

(ख) समासः सर्वदुःखानाम् — सर्वाणि दुःखानि सर्वदुःखानि, तेषाम् - कर्मधारयः ।
प्रसन्नचेतसः — प्रसन्नं चेतः यस्य सः प्रसन्नचेताः, तस्य - बहुव्रीहिः ।

(ग) कृदन्तः प्रसादे — प्र + सद् (षदलृ विशरणगत्यवसादनेषु) + घञ्, तस्मिन् ।
हानिः — हा (ओहाक् त्यागे) + क्तिन् ।
प्रसन्नः — प्र + सद् (षदलृ विशरणगत्यवसादनेषु) + क्त (कर्तरि) ।
बुद्धिः — बुध् (बुध अवगमने) + क्तिन् ।

भावस्पष्टीकरणम् -

उपजायते ।	
का उपजायते ?	**हानिः** उपजायते ।
केषां हानिः उपजायते ?	**सर्वदुःखानां** हानिः उपजायते ।
कस्य सर्वदुःखानां हानिः उपजायते ?	**अस्य** सर्वदुःखानां हानिः उपजायते ।
कस्मिन् (सति) अस्य सर्वदुःखानां हानिः उपजायते ?	**प्रसादे (सति)** अस्य सर्वदुःखानां हानिः उपजायते ।
प्रसादे सति अस्य सर्वदुःखानां हानिः उपजायते। (तस्मात्) **किं भवति** ?	प्रसादे सति अस्य सर्वदुःखानां हानिः उपजायते। (तस्मात्) **पर्यवतिष्ठते ।**
का पर्यवतिष्ठते ?	**बुद्धिः** पर्यवतिष्ठते ।
बुद्धिः **कथं** पर्यवतिष्ठते ?	बुद्धिः **आशु** पर्यवतिष्ठते ।
कस्य बुद्धिः आशु पर्यवतिष्ठते ?	**प्रसन्नचेतसः** हि बुद्धिः आशु पर्यवतिष्ठते ।

तात्पर्यम् - तस्यां प्रसन्नावस्थायाम् अस्य सर्वदुःखानां नाशः भवति । निर्मलचित्तस्य तस्य बुद्धिः भगवति निश्चला भवति ।

नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयतः शान्तिरशान्तस्य कुतः सुखम् ॥२.६६॥

पदच्छेदः - न, अस्ति, बुद्धिः, अयुक्तस्य, न, च, अयुक्तस्य, भावना ।
न, च, अभावयतः, शान्तिः, अशान्तस्य, कुतः, सुखम् ॥

अन्वयः - अयुक्तस्य बुद्धिः नास्ति । अयुक्तस्य च भावना न । अभावयतः च शान्तिः न । अशान्तस्य कुतः सुखम् ?

पदार्थः - अयुक्तस्य = योगरहितस्य, बुद्धिः = धीः, न अस्ति = न भवति, अयुक्तस्य च = अयोगिनः च, भावना = चिन्तना (अपि), न = नास्ति, अभावयतः च = अचिन्तयतः च, शान्तिः = शान्तिः, न = न विद्यते, अशान्तस्य = शान्तिविहीनस्य, कुतः = कथम्, सुखम् = आनन्दः ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अयुक्तस्य	अ. पुं. ष. एक. (विशेषणम्)	बुद्धिः	इ. स्त्री. प्र. एक.
अस्ति	अस् (अस भुवि) पर. कर्तरि लट्. प्रपु. एक.	भावना	आ. स्त्री. प्र. एक.
न	अव्ययम्	अभावयतः	अभावयत् - त. पुं. ष. एक. (विशेषणम्)
शान्तिः	इ. स्त्री. प्र. एक.	च	अव्ययम्
अशान्तस्य	अ. पुं. ष. एक. (विशेषणम्)	कुतः	अव्ययम्
सुखम्	अ. नपुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः	नास्ति	न + अस्ति	सवर्णदीर्घसन्धिः ।
	बुद्धिरयुक्तस्य	बुद्धिः + अयुक्तस्य	विसर्गसन्धिः (रेफः) ।
	चायुक्तस्य	च + अयुक्तस्य	सवर्णदीर्घसन्धिः ।
	चाभावयतः	च + अभावयतः	सवर्णदीर्घसन्धिः ।
	शान्तिरशान्तस्य	शान्तिः + अशान्तस्य	विसर्गसन्धिः (रेफः) ।
(ख) समासः	अयुक्तस्य	न युक्तः अयुक्तः, तस्य - नञ्तत्पुरुषः ।	
	अभावयतः	न भावयन् अभावयन्, तस्य - नञ्तत्पुरुषः ।	
	अशान्तस्य	न शान्तः अशान्तः, तस्य - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	बुद्धिः	बुध् (बुध अवगमने) + क्तिन् ।	
	युक्तः	युज् (युजिर् योगे) + क्त (कर्तरि) ।	
	भावना	भू (भू सत्तायाम्) + णिच् + ल्युट् + टाप् (स्त्रीत्वे) ।	
	भावयन्	भू (भू सत्तायाम्) + णिच् + शतृ (कर्तरि) ।	
	शान्तिः	शम् (शमु उपशमने) + क्तिन् ।	

भावस्पष्टीकरणम् -

नास्ति ।	
का नास्ति ?	**बुद्धिः** नास्ति ।
कस्य बुद्धिः नास्ति ?	**अयुक्तस्य** बुद्धिः नास्ति ।
अयुक्तस्य बुद्धिः नास्ति । **(तेन) किम्** ?	अयुक्तस्य बुद्धिः नास्ति । **(तेन) भावना न** ।

अयुक्तस्य बुद्धिः नास्ति । (तेन) **कस्य** भावना न ?	अयुक्तस्य बुद्धिः नास्ति । (तेन) **अयुक्तस्य** च भावना न ।
अयुक्तस्य बुद्धिः नास्ति । (तेन) अयुक्तस्य च भावना न । **(तेन) किम्** ?	अयुक्तस्य बुद्धिः नास्ति । (तेन) अयुक्तस्य च भावना न । **(तेन) शान्तिः न** ।
अयुक्तस्य बुद्धिः नास्ति । (तेन) अयुक्तस्य च भावना न । (तेन) **कस्य** शान्तिः न ?	अयुक्तस्य बुद्धिः नास्ति । (तेन) अयुक्तस्य च भावना न । (तेन) **अभावयतः** च शान्तिः न ।
अयुक्तस्य बुद्धिः नास्ति । (तेन) अयुक्तस्य च भावना न । (तेन) अभावयतः च शान्तिः न । **(तेन) किम्** ?	अयुक्तस्य बुद्धिः नास्ति । (तेन) अयुक्तस्य च भावना न । (तेन) अभावयतः च शान्तिः न । **(तेन) सुखम्** ।
अयुक्तस्य बुद्धिः नास्ति । (तेन) अयुक्तस्य च भावना न । (तेन) अभावयतः च शान्तिः न । (तेन) अशान्तस्य किं न ?	अयुक्तस्य बुद्धिः नास्ति । (तेन) अयुक्तस्य च भावना न । (तेन) अभावयतः च शान्तिः न । (तेन) **अशान्तस्य** सुखं न ।

तात्पर्यम् - यस्य समाधिः नास्ति तस्य आत्मस्वरूपविषया बुद्धिः न भवति । तादृशस्य अयोगिनः आत्मज्ञानाभिनिवेशः न भवति । आत्मज्ञानाभिनिवेशरहितस्य शान्तिः न भवति । अशान्तस्य कथं वा सुखं स्यात् ?

इन्द्रियाणां हि चरतां यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥२.६७॥

पदच्छेदः - इन्द्रियाणाम्, हि, चरताम्, यत्, मनः, अनुविधीयते ।
तत्, अस्य, हरति, प्रज्ञाम्, वायुः, नावम्, इव, अम्भसि ॥

अन्वयः - चरतां हि इन्द्रियाणां यत् मनः अनुविधीयते तत् अस्य प्रज्ञां वायुः अम्भसि नावम् इव हरति ।

पदार्थः - चरताम् = विषयेषु प्रवर्तमानानाम्, हि = हि, इन्द्रियाणाम् = नेत्रादीनाम् इन्द्रियाणाम्, यत् = यद् इन्द्रियम्, मनः = बुद्धिः, अनुविधीयते = अनुसृत्य प्रवर्तते, तत् = तद् इन्द्रियम्, अस्य = एतस्य, प्रज्ञाम् = बुद्धिम्, वायुः = पवनः, अम्भसि = उदके, नावम् = नौकाम्, इव = इव, हरति = अपकर्षति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
चरताम्	चरत् - त. नपुं. ष. बहु. (विशेषणम्)	हि	अव्ययम्
इन्द्रियाणाम्	अ. नपुं. ष. बहु. (विशेष्यम्)	यत्	यद् - द. सर्व. नपुं. प्र. एक. (विशेषणम्)
मनः	मनस् - सका. नपुं. प्र. एक. (विशेष्यम्)	अनुविधीयते	अनु + वि + धा (डुधाञ् धारणपोषणयोः) पर. कर्मणि लट्. प्रपु. एक.

तत्	तद्- द. सर्व. नपुं. प्र. एक.	अस्य	इदम् - म. सर्व. पुं. ष. एक. (विशेषणम्)
प्रज्ञाम्	आ. स्त्री. द्वि. एक.	वायुः	उ. पुं. प्र. एक.
अम्भसि	अम्भस् - सका. नपुं. स. एक.	नावम्	नौ - औ. स्त्री. द्वि. एक.
इव	अव्ययम्	हरति	हृ (हृञ् हरणे) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यन्मनः	यत् + मनः	अनुनासिकसन्धिः।
	मनोऽनुविधीयते	मनः + अनुविधीयते	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	तदस्य	तत् + अस्य	जश्त्वसन्धिः।
	वायुर्नावम्	वायुः + नावम्	विसर्गसन्धिः (रेफः)।
	इवाम्भसि	इव + अम्भसि	सवर्णदीर्घसन्धिः।
(ख) कृदन्तः	चरताम्	चर् (चर गतिभक्षणयोः) + शतृ (कर्तरि), तेषाम्।	
	प्रज्ञाम्	प्र + ज्ञा (ज्ञा अवबोधने) + क + टाप् (स्त्रीत्वे), ताम्।	

भावस्पष्टीकरणम् -

अनुविधीयते।	
किम् अनुविधीयते ?	**मनः** अनुविधीयते।
मनः **किम्** अनुविधीयते ?	मनः **तत्** अनुविधीयते।
मनः **केषां (मध्ये)** तत् अनुविधीयते ?	मनः **इन्द्रियाणां (मध्ये)** तत् अनुविधीयते।
मनः **किं कुर्वताम्** इन्द्रियाणां मध्ये तत् अनुविधीयते ?	मनः **चरताम्** इन्द्रियाणां मध्ये तत् अनुविधीयते।
मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। **तत् किं करोति** ?	मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। **तत् हरति**।
मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। तत् **कां** हरति ?	मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। तत् **प्रज्ञां** हरति।
मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। तत् **कः काम् इव** प्रज्ञां हरति ?	मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। तत् **वायुः नावम् इव** प्रज्ञां हरति।
मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। तत् वायुः **कुत्र** नावम् इव प्रज्ञां हरति ?	मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। तत् वायुः **अम्भसि** नावम् इव प्रज्ञां हरति।

मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। तत् वायुः अम्भसि नावम् इव **कस्य** प्रज्ञां हरति ?	मनः चरताम् इन्द्रियाणां मध्ये तत् अनुविधीयते। तत् वायुः अम्भसि नावम् इव **अस्य** प्रज्ञां हरति।

तात्पर्यम् - जले प्लवमानां नौकां वायुः यत्र कुत्रापि नयति। एवं विषयेषु प्रवृत्तम् एकम् इन्द्रियमपि तस्य प्रज्ञां हरति।

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥२.६८॥

पदच्छेदः - तस्मात्, यस्य, महाबाहो, निगृहीतानि, सर्वशः।
इन्द्रियाणि, इन्द्रियार्थेभ्यः, तस्य, प्रज्ञा, प्रतिष्ठिता ॥

अन्वयः - महाबाहो ! तस्मात् यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता (भवति)।

पदार्थः - महाबाहो = हे अर्जुन !, तस्मात् = ततः, यस्य = यस्य पुरुषस्य, इन्द्रियाणि = नेत्रादीनि इन्द्रियाणि, इन्द्रियार्थेभ्यः = रूपादिविषयेभ्यः, सर्वशः = सर्वथा, निगृहीतानि = नियन्त्रितानि, तस्य = तस्य पुरुषस्य, प्रज्ञा = बुद्धिः, प्रतिष्ठिता = अतिस्थिरा।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक.	तस्मात्	तद् - द. सर्व. नपुं. पं. एक. (विशेषणम्)
यस्य	यद् - द. सर्व. पुं. ष. एक. (विशेषणम्)	इन्द्रियाणि	अ. नपुं. प्र. बहु.
इन्द्रियार्थेभ्यः	अ. नपुं. पं. बहु.	सर्वशः	अव्ययम्
निगृहीतानि	अ. नपुं. प्र. बहु.	तस्य	तद् - द. सर्व. नपुं. ष. एक. (विशेषणम्)
प्रज्ञा	आ. स्त्री. प्र. एक. (विशेष्यम्)	प्रतिष्ठिता	आ. स्त्री. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	तस्माद्यस्य	तस्मात् + यस्य	जश्त्वसन्धिः।
	इन्द्रियाणीन्द्रियार्थेभ्यः	इन्द्रियाणि + इन्द्रियार्थेभ्यः	सवर्णदीर्घसन्धिः।
	इन्द्रियार्थेभ्यस्तस्य	इन्द्रियार्थेभ्यः + तस्य	विसर्गसन्धिः (सकारः)।
(ख) समासः	महाबाहो	महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ महाबाहो - बहुव्रीहिः।	
(ग) कृदन्तः	निगृहीतानि	नि + ग्रह् (ग्रह उपादाने) + क्त (कर्मणि), तानि।	
	प्रज्ञा	प्र + ज्ञा (ज्ञा अवबोधने) + क + टाप् (स्त्रीत्वे)।	
	प्रतिष्ठिता	प्रति + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) स्त्रीत्वे टाप्।	
(घ) तद्धितान्तः	सर्वशः	सर्व + शस्।	

भावस्पष्टीकरणम् -

निगृहीतानि ।	
कानि निगृहीतानि ?	**इन्द्रियाणि** निगृहीतानि ।
इन्द्रियाणि **केभ्यः** निगृहीतानि ?	इन्द्रियाणि **इन्द्रियार्थेभ्यः** निगृहीतानि ।
इन्द्रियाणि इन्द्रियार्थेभ्यः **कथं** निगृहीतानि ?	इन्द्रियाणि इन्द्रियार्थेभ्यः **सर्वशः** निगृहीतानि ।
यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि । **तस्य किं** भवति ?	**यस्य** इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि **तस्य प्रज्ञा** भवति ।
यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि तस्य प्रज्ञा **कथम्भूता** भवति ?	यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि तस्य प्रज्ञा **प्रतिष्ठिता** भवति ।
कस्मात् यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता भवति ?	**तस्मात्** यस्य इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः निगृहीतानि तस्य प्रज्ञा प्रतिष्ठिता भवति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो** !

तात्पर्यम् - हे महाबाहो अर्जुन ! तस्मात् त्वं जानीहि यत् यस्य इन्द्रियाणि रूपरसादिभ्यः विषयरूप-इन्द्रियार्थेभ्यः सर्वथा नियन्त्रितानि भवन्ति तस्य बुद्धिः अतिस्थिरा भवति ।

या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥२.६९॥

पदच्छेदः - या, निशा, सर्वभूतानाम्, तस्याम्, जागर्ति, संयमी ।
यस्याम्, जाग्रति, भूतानि, सा, निशा, पश्यतः, मुनेः ॥

अन्वयः - सर्वभूतानां या निशा तस्यां संयमी जागर्ति, यस्यां भूतानि जाग्रति सा पश्यतः मुनेः निशा ।

पदार्थः - सर्वभूतानाम् = समस्तप्राणिनाम्, या = या, निशा = रात्रिः (अप्रवृत्तिभूमिः), तस्याम् = तस्यां रात्रौ, संयमी = योगी, जागर्ति = जागरूकः भवति (प्रवर्तते), यस्याम् = यस्यां रात्रौ, भूतानि = प्राणिनः, जाग्रति = जागरूकाणि भवन्ति, सा = सा, पश्यतः = विचारवतः, मुनेः = संयमिनः, निशा = रात्रिः (अप्रवृत्तिभूमिः) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
सर्वभूतानाम्	अ. नपुं. ष. बहु.	या	यद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)

निशा	आ. स्त्री. प्र. एक. (विशेष्यम्)	तस्याम्	तद् - द. सर्व. स्त्री. स. एक. (विशेषणम्)
संयमी	संयमिन्- न. पुं. प्र. एक.	जागर्ति	जागृ (जागृ निद्राक्षये) पर. कर्तरि लट्. प्रपु. एक.
यस्याम्	यद्- द. सर्व. स्त्री. स. एक. (विशेषणम्)	भूतानि	अ. नपुं. प्र. बहु.
जाग्रति	जागृ (जागृ निद्राक्षये) पर. कर्तरि लट्. प्रपु. बहु.	सा	तद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)
पश्यतः	पश्यत्- त. पुं. ष. एक. (विशेषणम्)	मुनेः	इ. पुं. ष. एक. (विशेष्यम्)
निशा	आ. स्त्री. प्र. एक. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	पश्यतो मुनेः	पश्यतः + मुनेः	विसर्गसन्धिः (सकारः) रेफः उकारः गुणः।
(ख) समासः	सर्वभूतानाम्	सर्वाणि भूतानि सर्वभूतानि, तेषाम् - कर्मधारयः।	
(ग) कृदन्तः	भूतानाम्	भू (भू सत्तायाम्) + क्त (कर्तरि), तेषाम्।	
	पश्यतः	दृश् (दृशिर् प्रेक्षणे) + शतृ (कर्तरि), तस्य।	
(घ) तद्धितान्तः	संयमी	संयम + इनि (मतुबर्थे)। संयमः अस्य अस्मिन् वा अस्ति।	

भावस्पष्टीकरणम् -

जागर्ति।	
कः जागर्ति ?	**संयमी** जागर्ति।
कस्यां संयमी जागर्ति ?	**तस्यां** संयमी जागर्ति।
कीदृश्यां तस्यां संयमी जागर्ति ?	**या सर्वभूतानां निशा तस्यां** संयमी जागर्ति।
या सर्वभूतानां निशा तस्यां संयमी जागर्ति। (तर्हि) **का** निशा ?	या सर्वभूतानां निशा तस्यां संयमी जागर्ति। (तर्हि) यस्यां जाग्रति **सा** निशा।
या सर्वभूतानां निशा तस्यां संयमी जागर्ति। तर्हि यस्यां **कानि** जाग्रति सा निशा ?	या सर्वभूतानां निशा तस्यां संयमी जागर्ति। तर्हि यस्यां **भूतानि** जाग्रति सा निशा।
या सर्वभूतानां निशा तस्यां संयमी जागर्ति। तर्हि यस्यां भूतानि जाग्रति सा **कस्य** निशा ?	या सर्वभूतानां निशा तस्यां संयमी जागर्ति। तर्हि यस्यां भूतानि जाग्रति सा **मुनेः** निशा।
या सर्वभूतानां निशा तस्यां संयमी जागर्ति। तर्हि यस्यां भूतानि जाग्रति सा **किं कुर्वतः** मुनेः निशा ?	या सर्वभूतानां निशा तस्यां संयमी जागर्ति। तर्हि यस्यां भूतानि जाग्रति सा **पश्यतः** मुनेः निशा।

तात्पर्यम् - यस्मिन् सर्वे प्राणिनः न जाग्रति (न प्रवर्तन्ते) तादृश्यां निशायां (ब्रह्मणि) योगी सदा जागर्ति (प्रवृत्तिशीलः भवति)। परन्तु यस्मिन् सर्वे प्राणिनः जाग्रति (प्रवर्तन्ते) तादृश्यां निशायां (विषयप्रपञ्चे) विचारवतः योगिनः प्रवृत्तिः न भवति।

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥२.७०॥

पदच्छेदः - आपूर्यमाणम्, अचलप्रतिष्ठम्, समुद्रम्, आपः, प्रविशन्ति, यद्वत्।
तद्वत्, कामाः, यम्, प्रविशन्ति, सर्वे, सः, शान्तिम्, आप्नोति, न, कामकामी ॥

अन्वयः - आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः यं प्रविशन्ति सः शान्तिम् आप्नोति कामकामी न।

पदार्थः - आपः = जलानि, आपूर्यमाणम् = उदकेन सम्पूर्यमाणम्, अचलप्रतिष्ठम् = निश्चलस्थितिम्, समुद्रम् = सागरम्, यद्वत् = यथा, प्रविशन्ति = गच्छन्ति, तद्वत् = तथा, सर्वे = सकलाः, कामाः = अभिलाषाः, यम् = यं पुरुषम्, प्रविशन्ति = यान्ति, सः = सः पुरुषः, शान्तिम् = सुखम्, आप्नोति = लभते, कामकामी = भोगासक्तः, न = न।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
आपः	अप्- प. स्त्री. प्र. बहु.	आपूर्यमाणम्	अ. पुं. द्वि. एक. (विशेषणम्)
अचलप्रतिष्ठम्	अ. पुं. द्वि. एक. (विशेषणम्)	समुद्रम्	अ. पुं. द्वि. एक. (विशेष्यम्)
यद्वत्	अव्ययम्	प्रविशन्ति	प्र + विश् (विश प्रवेशने) पर. कर्तरि लट्. प्रपु. बहु.
तद्वत्	अव्ययम्	सर्वे	अ. सर्व. पुं. प्र. बहु. (विशेषणम्)
कामाः	अ. पुं. प्र. बहु. (विशेष्यम्)	यम्	यद् - द. सर्व. पुं. द्वि. एक. (विशेषणम्)
प्रविशन्ति	प्र + विश् (विश प्रवेशने) पर. कर्तरि लट्. प्रपु. बहु.	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
शान्तिम्	इ. स्त्री. द्वि. एक.	आप्नोति	आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. एक.
कामकामी	कामकामिन् - न. पुं. प्र. एक.	न	अव्ययम्

व्याकरणम् -

(क) सन्धिः	कामा यम्	कामाः + यम्	विसर्गसन्धिः (लोपः)।
	स शान्तिम्	सः + शान्तिम्	विसर्गसन्धिः (लोपः)।
(ख) समासः	अचलप्रतिष्ठम्	अचला प्रतिष्ठा यस्य सः अचलप्रतिष्ठः, तम् - बहुव्रीहिः।	
(ग) कृदन्तः	आपूर्यमाणम्	आ + पॄ (पॄ पालनपूरणयोः) + शानच् (कर्मणि), तम्।	
	शान्तिम्	शम् (शमु उपशमने) + क्तिन्, ताम्।	
	कामकामी	कामान् (सुखकरपदार्थान्) कामयते इति कामकामी (कर्तरि णिनिप्रत्ययः)।	

भावस्पष्टीकरणम् -

प्रविशन्ति।	
काः प्रविशन्ति ?	**आपः** प्रविशन्ति।
आपः **कं** प्रविशन्ति ?	आपः **समुद्रं** प्रविशन्ति।
आपः **कीदृशं** समुद्रं प्रविशन्ति ?	आपः **आपूर्यमाणं** समुद्रं प्रविशन्ति।
आपः आपूर्यमाणं **पुनश्च कीदृशं** समुद्रं प्रविशन्ति ?	आपः आपूर्यमाणम् **अचलप्रतिष्ठं** समुद्रं प्रविशन्ति।
आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् **किं** भवति ?	आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् **प्रविशन्ति**।
आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् **के** प्रविशन्ति ?	आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् **कामाः** प्रविशन्ति।
आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् **कति** कामाः प्रविशन्ति ?	आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् **सर्वे** कामाः प्रविशन्ति।
आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः **कं** प्रविशन्ति ?	आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः **तं** प्रविशन्ति।
आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः तं प्रविशन्ति। **तस्य किं भवति** ?	आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः तं प्रविशन्ति **सः आप्नोति**।
आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः तं प्रविशन्ति सः **काम्** आप्नोति ?	आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः तं प्रविशन्ति सः **शान्तिम्** आप्नोति।
आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः तं प्रविशन्ति सः शान्तिम् आप्नोति। **कः न** ?	आपः आपूर्यमाणम् अचलप्रतिष्ठं समुद्रं यद्वत् प्रविशन्ति तद्वत् सर्वे कामाः तं प्रविशन्ति सः शान्तिम् आप्नोति। **कामकामी न**।

तात्पर्यम् - समुद्रः सर्वतः अपि जलैः आपूर्यमाणः भवति तथापि सः अचलं तिष्ठति। एवं सर्वेऽपि कामाः यं प्रविशन्ति सः शान्तिं प्राप्नोति। भोगे आसक्तस्तु शान्तिं न प्राप्नोति।

विहाय कामान्यः सर्वान्पुमांश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति॥२.७१॥

पदच्छेदः - विहाय, कामान्, यः, सर्वान्, पुमान्, चरति, निःस्पृहः।
निर्ममः, निरहङ्कारः, सः, शान्तिम्, अधिगच्छति॥

अन्वयः - यः पुमान् सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः चरति सः शान्तिम् अधिगच्छति।

पदार्थः - यः पुमान् = यः पुरुषः, सर्वान् = अखिलान्, कामान् = अभिलाषान्, विहाय = त्यक्त्वा, निःस्पृहः = निराशः, निर्ममः = ममताशून्यः, निरहङ्कारः = अहङ्काररहितः, चरति = आचरति, सः = सः पुरुषः, शान्तिम् = सुखम्, अधिगच्छति = प्राप्नोति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)	पुमान्	पुंस् - सका. पुं. प्र. एक. (विशेष्यम्)
सर्वान्	अ. सर्व. पुं. द्वि. बहु. (विशेषणम्)	कामान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
विहाय	अव्ययम्	निःस्पृहः	अ. पुं. प्र. एक. (विशेषणम्)
निर्ममः	अ. पुं. प्र. एक. (विशेषणम्)	निरहङ्कारः	अ. पुं. प्र. एक. (विशेषणम्)
चरति	चर् (चर गतिभक्षणयोः) पर. कर्तरि लट्. प्रपु. एक.	सः	तद् - द. सर्व. पुं. प्र. एक. (विशेषणम्)
शान्तिम्	इ. स्त्री. द्वि. एक.	अधिगच्छति	अधि + गम् (गम्लृ गतौ) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः पुमांश्चरति — पुमान् + चरति — रुत्वम्, अनुस्वारागमः, विसर्गः, सकारः श्चुत्वं च।
निर्ममो निरहङ्कारः — निर्ममः + निरहङ्कारः — विसर्गसन्धिः (सकारः), रेफः, उकारः, गुणः।
स शान्तिम् — सः + शान्तिम् — विसर्गसन्धिः (लोपः)।

(ख) समासः निःस्पृहः — निर्गता स्पृहा यस्मात् सः निःस्पृहः - बहुव्रीहिः।
निर्ममः — निर्गतः ममः यस्मात् सः निर्ममः - बहुव्रीहिः।
निरहङ्कारः — निर्गतः अहङ्कारः यस्मात् सः निरहङ्कारः - बहुव्रीहिः।

(ग) कृदन्तः विहाय वि + हा (ओहाक् त्यागे) + ल्यप्।
शान्तिम् शम् (शमु उपशमने) + क्तिन्, ताम्।

भावस्पष्टीकरणम् -

चरति।	
कः चरति ?	**पुमान्** चरति।
कीदृशः पुमान् चरति ?	**निःस्पृहः** पुमान् चरति।
निःस्पृहः **पुनश्च कीदृशः** पुमान् चरति ?	निःस्पृहः **निर्ममः** पुमान् चरति।
निःस्पृहः निर्ममः **पुनश्च कीदृशः** पुमान् चरति ?	निःस्पृहः निर्ममः **निरहङ्कारः** पुमान् चरति।
निःस्पृहः निर्ममः निरहङ्कारः **किं कृत्वा** पुमान् चरति ?	निःस्पृहः निर्ममः निरहङ्कारः **विहाय** पुमान् चरति।
कान् विहाय निःस्पृहः निर्ममः निरहङ्कारः पुमान् चरति ?	**कामान्** विहाय निःस्पृहः निर्ममः निरहङ्कारः पुमान् चरति।
कति कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः पुमान् चरति ?	**सर्वान्** कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः पुमान् चरति।
यः सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः पुमान् चरति **तस्य किं भवति** ?	यः सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः पुमान् चरति **सः अधिगच्छति।**
यः सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः पुमान् चरति सः **काम्** अधिगच्छति ?	यः सर्वान् कामान् विहाय निःस्पृहः निर्ममः निरहङ्कारः पुमान् चरति सः **शान्तिम्** अधिगच्छति।

तात्पर्यम् - यः पुरुषः सकलान् अपि अभिलाषान् परित्यजति, निःस्पृहः, ममताशून्यः, अहङ्काररहितः च भवति सः निश्चयेन सुखं प्राप्नोति।

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥२.७२॥

पदच्छेदः - एषा, ब्राह्मी, स्थितिः, पार्थ, न, एनाम्, प्राप्य, विमुह्यति।
स्थित्वा, अस्याम्, अन्तकाले, अपि, ब्रह्मनिर्वाणम्, ऋच्छति ॥

अन्वयः - पार्थ ! एषा ब्राह्मी स्थितिः। एनां प्राप्य न विमुह्यति। अन्तकाले अपि अस्यां स्थित्वा ब्रह्मनिर्वाणम् ऋच्छति।

पदार्थः - पार्थ = अर्जुन !, एषा = इयम्, ब्राह्मी = परमात्मसम्बन्धिनी, स्थितिः = निष्ठा, एनाम् = एताम्, प्राप्य = लब्ध्वा, न विमुह्यति = मोही न भवति, अन्तकाले अपि = मरणसमये अपि, अस्याम् = एतस्याम्, स्थित्वा = वर्तित्वा, ब्रह्मनिर्वाणम् = ब्रह्मानन्दम्, ऋच्छति = लभते ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	एषा	एतद् - द. सर्व. स्त्री. प्र. एक. (विशेषणम्)
ब्राह्मी	ई. स्त्री. प्र. एक. (विशेष्यम्)	स्थितिः	इ. स्त्री. प्र. एक. (विशेषणम्)
एनाम्	एतद् - द. सर्व. स्त्री. द्वि. एक. (विशेषणम्)	प्राप्य	ल्यबन्तम् अव्ययम्
न	अव्ययम्	विमुह्यति	वि + मुह् (मुह वैचित्ये) पर. कर्तरि लट्. प्रपु. एक.
अन्तकाले	अ. पुं. स. एक.	अपि	अव्ययम्
अस्याम्	इदम् - म. सर्व. स्त्री. स. एक. (विशेषणम्)	स्थित्वा	क्त्वान्तम् अव्ययम्
ब्रह्मनिर्वाणम्	अ. नपुं. द्वि. एक.	ऋच्छति	ऋ (ऋ गतिप्रापणयोः) पर. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	नैनाम्	न + एनाम्	वृद्धिसन्धिः ।
	स्थित्वास्याम्	स्थित्वा + अस्याम्	सवर्णदीर्घसन्धिः ।
	अन्तकालेऽपि	अन्तकाले + अपि	पूर्वरूपसन्धिः ।
(ख) समासः	अन्तकाले	अन्ते कालः अन्तकालः, तस्मिन् - सप्तमीतत्पुरुषः ।	
	ब्रह्मनिर्वाणम्	ब्रह्मणि निर्वाणम् ब्रह्मनिर्वाणम् - सप्तमीतत्पुरुषः ।	
(ग) कृदन्तः	स्थितिः	स्था (ष्ठा गतिनिवृत्तौ) + क्तिन् (स्त्रियाम्) ।	
	प्राप्य	प्र + आप् (आप्लृ व्याप्तौ) + ल्यप् ।	
	स्थित्वा	स्था (ष्ठा गतिनिवृत्तौ) + क्त्वा ।	
	निर्वाणम्	निर् + वा (वा गतिगन्धनयोः) + ल्युट् ।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यर्थे) (पृथायाः अपत्यं पुमान्), तत्सम्बुद्धौ ।	
	ब्राह्मी	ब्रह्मन् + अण् (टिलोपात् ब्राह्मः) (इदमर्थे अण्) (स्त्रीत्वे ङीप्) ।	

भावस्पष्टीकरणम् -

स्थितिः ।	
का स्थितिः ?	**एषा** स्थितिः ।
एषा **कीदृशी** स्थितिः ?	एषा **ब्राह्मी** स्थितिः ।
न विमुह्यति ।	
किं कृत्वा न विमुह्यति ?	**प्राप्य** न विमुह्यति ।
कां प्राप्य न विमुह्यति ?	**एनां** प्राप्य न विमुह्यति ।
ऋच्छति ।	
किम् ऋच्छति ?	**ब्रह्मनिर्वाणम्** ऋच्छति ।
किं कृत्वा ब्रह्मनिर्वाणम् ऋच्छति ?	**स्थित्वा** ब्रह्मनिर्वाणम् ऋच्छति ।
कस्यां स्थित्वा ब्रह्मनिर्वाणम् ऋच्छति ?	**अस्यां** स्थित्वा ब्रह्मनिर्वाणम् ऋच्छति ।
कदा अपि अस्यां स्थित्वा ब्रह्मनिर्वाणम् ऋच्छति ?	**अन्तकाले** अपि अस्यां स्थित्वा ब्रह्मनिर्वाणम् ऋच्छति ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - हे पार्थ ! एषा परमात्मसम्बन्धिनी स्थितिः 'ब्राह्मी' इति उच्यते । एतां स्थितिं यः प्राप्नोति सः कदापि मोहवशः न भवति । अन्तकाले अपि अस्यां स्थितौ स्थित्वा सः ब्रह्मानन्दं प्राप्नोति ।

ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे साङ्ख्ययोगो नाम द्वितीयोऽध्यायः ॥

द्वितीयाध्यायस्य सारः

अस्य अध्यायस्य नाम अस्ति 'साङ्ख्ययोगः' इति। 'युद्धं न करोमि' इति निश्चयं कृत्वा सशरं चापं विसृज्य स्थिताय अर्जुनाय भगवान् यम् उपदेशम् अग्रे सप्तदशसु अध्यायेषु कृतवान् तस्य आरम्भः अत्र भवति। तत्रापि सर्वेषाम् अध्यायानां सारः अध्यायेऽस्मिन् प्राप्यते इति कारणेन गीतायाम् अस्य स्थानं महत्त्वपूर्णं मन्यते।

अस्मिन् अध्याये आत्मनः स्वरूपम्, अर्जुनस्य युद्धाय प्रेरणम्, स्थितप्रज्ञस्वरूपं चेति केचन विषयाः प्रामुख्येन उपवर्णिताः सन्ति।

प्रथमाध्याये अर्जुनस्य या अवस्था वर्णिता तेन ज्ञायते यत् सः अतीव भीतः आत्मविश्वास-रहितः उद्विग्नश्च आसीदिति। तस्य नेत्रयोः अश्रूणि आगतानि। चित्तं च करुणया आक्रान्तम्। तादृशं सम्भ्रान्तचित्तं तं दृष्ट्वा आश्चर्यचकितः भगवान् पृष्टवान् - "युद्धस्य समये कथं वा भवतः मनसि एतादृशः क्षत्रियस्य अयोग्यः, स्वर्गप्राप्तौ यशसि च बाधकः विचारः समुत्पन्नः ?" इति। अग्रे च सः तं समाश्वासयितुं "हृदयस्य क्षुद्रं दौर्बल्यं त्यक्त्वा उत्तिष्ठ !" इति आदिशति। किन्तु "एते सर्वे भीष्मादयः मम आदरणीयाः। कथम् एतैः सह युद्धं कुर्याम् ?" इति व्याकुलः अर्जुनः पुनः पृच्छति। "एतेषां गुरुजनानां मारणस्य अपेक्षया भिक्षायाचनेन जीवनमपि वरं भवेत्" इति स्वाभिप्रायं सः निवेदयति।

तत् श्रुत्वा देवः हसन् इव वदति - "येषां विषये शोकः न करणीयः तेषां विषये भवान् शोकं करोति। एतेषां मारणेन पापम् आलभेत इति भवता यत् चिन्त्यते तत् असाधु। यतः अहं, भवान्, एते राजानः वा सर्वेऽपि वयं सर्वदा एव भवामः। यथा अस्माकं देहः कौमारं यौवनं जरा इत्यादीन् विभिन्नान् अवस्थाविशेषान् प्राप्नोति तथैव आत्मा एतस्य देहस्य नाशे सति देहान्तरं प्राप्नोति। अतः अवश्यम्भाविनः अस्य क्रमस्य विषये भवता दुःखं न करणीयम्। येन एतद् जगत् निर्मितं तत् तत्त्वम् अविनाशि अस्तीति कारणेन तस्य नाशं कोऽपि कर्तुं न शक्नोति, परं शरीराणि तु नाशसहितानि सन्ति इति ज्ञात्वा त्वया युद्धं करणीयम्। आत्मा अजः, नित्यः, शाश्वतः, पुराणः च वर्तते। यथा मनुष्यः जीर्णानि वस्त्राणि त्यक्त्वा नवीनानि वस्त्राणि धरति तथैव आत्मा अपि जीर्णानि शरीराणि त्यक्त्वा नवीनानि शरीराणि प्राप्नोति। यथा जन्म प्राप्तवतः जनस्य मरणं निश्चयेन भवति तथैव मृतस्य जन्म अपि निश्चयेन भवति। सर्वेषां भूतानाम् आदिः (जन्मपूर्वस्थितिः) अन्तः (मरणोत्तरस्थितिः) च अव्यक्तौ भवतः। मध्यकालः (जन्मतः मृत्युपर्यन्तम्) एव व्यक्तः भवति। अतः एतत् सर्वम् अपरिहार्यम् अस्तीति ज्ञात्वा त्वया शोकः न करणीयः" इति।

अग्रे सः उपदिशति - "धर्मदृष्ट्या चिन्तितं चेदपि त्वया विचलितेन न भवितव्यम्। क्षत्रियस्य युद्धात् अन्यत् श्रेयः किमपि नास्ति। युद्धं तु क्षत्रियस्य कृते स्वयमेव उद्घाटितं स्वर्गद्वारं भवति। भाग्यशालिनः एव तमवसरं प्राप्नुवन्ति। यदि भवान् धर्म्यं युद्धं न करिष्यति तर्हि स्वधर्मस्य कीर्तेः च ह्रासः भविष्यति, येन भवान् पापभाक् भविष्यति। भवादृशस्य सम्माननीयस्य अपकीर्तिः मरणाद् अपि दुःखदायिनी भवेत्। 'अर्जुनः भयेन युद्धात् परावृत्तः' इति चिन्तयन्तः जनाः भवतः सामर्थ्यं निन्दन्तः अवाच्यवचनानि वदेयुः। तस्मात् इमाम् अनर्थपरम्पराम् अवरोद्धुं भवान् युद्धाय निश्चयं कुर्यात्। युद्धे यदि पराजितः भविष्यति तर्हि स्वर्गं प्राप्स्यति, यदि विजयं प्राप्स्यति तर्हि तु भूम्याः अधिपतिः भविष्यति। अतः सुखं भवतु, दुःखं वा, जयः भवतु, पराजयः वा सर्वमपि समानं मत्वा युद्धं करोतु। एवं चेत् पापं न अवाप्स्यति। एषः एव परमतत्त्वस्य प्राप्तेः मार्गः। एतस्य आचरणेन कर्मबन्धनात् मुक्तिः जायते। अस्य धर्मस्य ईषत् अनुसरणेनापि महतः भयात् रक्षणं भवति। धर्ममार्गः सर्वदा अनुसरणीयः। सर्वमेतत् विचिन्त्य भवता निर्णयः करणीयः।" इति।

अग्रे भगवान् वदति - "योगस्थेन सता कर्म करणीयम्। मनुष्यस्य अधिकारः कर्मणि एव, न तु तस्य फले। कर्मणः यत् फलं प्राप्यते तस्य हेतुः 'अहं न' इति चिन्तनीयम्। तथैव 'कर्म अकृत्वा तिष्ठेयम्' इत्यपि केनापि न चिन्तनीयम्। लाभहान्योः विषये समानः व्यवहारः 'योगः' इति उच्यते। सः योगः अनुसरणीयः। भवान् फलस्य अपेक्षाम् अकृत्वा कर्मसु सज्जः भवतु। एवं कुशलतापूर्वकं कर्माचरणमेव योगः। परमं पदं प्राप्तुं बुद्धेः निश्चलत्वम् अपेक्षितम्। तत् च समाधिना भवति। तदा एव योगः सिध्यति। एतादृशं योगं प्राप्तवान् जनः स्थितप्रज्ञः इति उच्यते। सः सर्वान् कामान् त्यक्त्वा आत्मनि एव आत्मना तुष्टः भवति। तस्य मनः दुःखकारणेन उद्विग्नं न भवति, सुखे आसक्तं वा न भवति। सः रागद्वेषभयादिरहितः भवति। सः शुभम् अशुभं वा प्राप्य आनन्दितः दुःखितः वा न भवति। तस्य एव जनस्य प्रज्ञा स्थिरा भवति। कूर्मः यथा अङ्गानि अन्तः आकर्षति तथा एषः स्वस्य इन्द्रियाणि विषयेभ्यः संहरति। इन्द्रियाणि प्रमथनशीलानि भवन्ति। तानि समाधौ प्रयतमानस्य पुरुषस्य मनः बलात् आकर्षन्ति। तथापि स्थितप्रज्ञः तानि वशे स्थापयति। यः जनः इन्द्रियविषयान् सर्वदा चिन्तयन् भवति तस्य तेषु विषयेषु आसक्तिः जायते। ततः तेषां प्राप्तौ कामः (इच्छा) संजायते। कामात् क्रोधः जायते। क्रोधात् मोहः उत्पद्यते। मोहः उत्पन्नः भवति चेत् बुद्धिः नष्टा भवति। ततः मनुष्यस्य सर्वनाशः भवति।

तद्विपरीततया यः रागद्वेषरहितः सन् इन्द्रियैः विषयान् उपसेवते सः सर्वदा प्रसन्नः भवति। तस्यां प्रसन्नावस्थायां दुःखनाशः भवति। तेन च तस्य मनः शीघ्रमेव स्थिरं भवति। यस्य चित्तं समाधौ लग्नं न भवति तस्य आत्मस्वरूपज्ञानं न भवति। तस्य भावना शान्तिः वा न भवति। अशान्तस्य सुखं तु नैव भवितुम् अर्हति। तादृशस्य पुरुषस्य विषयेषु प्रवृत्तम् एकम् इन्द्रियम् अपि बुद्धिम् अपहर्तुं समर्थं भवति। तस्मात् यस्य इन्द्रियाणि सर्वशः निगृहीतानि तस्य एव प्रज्ञा प्रतिष्ठिता भवति, न तु अन्यस्य। यथा नदीनां जलं सर्वतः समुद्रं प्रविशति तथैव सर्वेऽपि कामाः यं प्रविशन्ति सः शान्तिम् आप्नोति। सर्वान् कामान् त्यक्त्वा यः निःस्पृहः ममत्वरहितः, विकाररहितः च सन् जीवति सः एव शान्तिं प्राप्नोति। सा अवस्था ब्राह्मी स्थितिः इति उच्यते। एताम् अवस्थाम् आपन्नस्य पुनः मोहः न भवति। अस्याम् एव स्थित्वा सः मुनिः ब्रह्मनिर्वाणं प्राप्नोति।

संक्षेपतः एवं वक्तुं शक्यते यत् अस्मिन् अध्याये आदौ श्रीकृष्णः अर्जुनं 'शरीरं नश्वरम्, आत्मा च अविनाशी' इति तत्त्वं बोधितवान्। ततः 'स्वधर्मं मत्वा क्षत्रियेण युद्धं करणीयम्' इति प्रतिपाद्य 'कर्मसु कौशलरूपं योगम्' आचरितुम् उक्तवान्। अन्ते च स्थितप्रज्ञस्य लक्षणानि कथयित्वा ब्राह्मीस्थितिं निरूपितवान्। अतः अस्य अध्यायस्य नाम 'साङ्ख्ययोगः' (साङ्ख्यम् = ब्रह्मतत्त्वम्) इति ज्ञायते।

****

अथ तृतीयोऽध्यायः

३

कर्मयोगः

अर्जुन उवाच - ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ॥३.१॥

पदच्छेदः -

अर्जुनः, उवाच - ज्यायसी, चेत्, कर्मणः, ते, मता, बुद्धिः, जनार्दन।
तत्, किम्, कर्मणि, घोरे, माम्, नियोजयसि, केशव ॥

अन्वयः जनार्दन !, बुद्धिः कर्मणः ज्यायसी ते मता चेत्, केशव ! तत् घोरे कर्मणि मां किं नियोजयसि ?

पदार्थः - जनार्दन = हे कृष्ण !, बुद्धिः = ज्ञानम्, कर्मणः = कर्मापेक्षया, ज्यायसी = अतिशयेन प्रशस्ता, ते = तव, मता चेत् = अभिमता चेत्, तत् = तर्हि, केशव = कृष्ण !, घोरे = क्रूरे, कर्मणि = युद्धकार्ये, माम् = माम्, किम् = किमर्थम्, नियोजयसि = आयोजयसि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जनार्दन	अ. पुं. सम्बो. एक.	बुद्धिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
कर्मणः	कर्मन्- न. नपुं. पं. एक.	ज्यायसी	ई. स्त्री. प्र. एक. (विशेषणम्)
ते	युष्मद्- द. सर्व. ष. एक.	मता	आ. स्त्री. प्र. एक. (विशेषणम्)
चेत्	अव्ययम्	केशव	अ. पुं. सम्बो. एक.
तत्	तद् - द. सर्व. नपुं. एक.	घोरे	अ. नपुं. स. एक. (विशेषणम्)
कर्मणि	कर्मन् - न. नपुं. स. एक. (विशेष्यम्)	माम्	अस्मद्- द. सर्व. द्वि. एक.
किम्	अव्ययम्	नियोजयसि	नि + युज् (युजिर् - योगे) + णिच्, पर. कर्तरि लट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः कर्मणस्ते — कर्मणः + ते — विसर्गसन्धिः (सकारः)।
बुद्धिर्जनार्दन — बुद्धिः + जनार्दन — विसर्गसन्धिः (रेफः)।

(ख) कृदन्तः मता — मन् (मनु - अवबोधने) + क्त, स्त्रीत्वे टाप्।
बुद्धिः — बुध् (बुध - अवगमने) + क्तिन्।
जनार्दन — जन + अर्द् (अर्द - गतौ याचने च) + ल्यु (कर्तरि) जनान् अर्दयति। जनाः यथा पुरुषार्थान् याचन्ते तथा करोति इत्यर्थः।

	घोरे	घुर् (घुर - भीमार्थशब्दयोः) + अच्, तस्मिन्।
(ग) तद्धितान्तः	ज्यायसी	प्रशस्य / वृद्ध + ईयसुन् (ज्य इति आदेशः)।
	केशव	केश + व (मतुबर्थे) तत्सम्बुद्धौ। प्रशस्ताः केशाः सन्ति अस्य अस्मिन् वा।

भावस्पष्टीकरणम् -

मता।	
का मता ?	**बुद्धिः** मता।
बुद्धिः **कीदृशी** मता ?	बुद्धिः **ज्यायसी** मता।
बुद्धिः **कस्मात्** ज्यायसी मता ?	बुद्धिः **कर्मणः** ज्यायसी मता।
बुद्धिः कर्मणः ज्यायसी **कस्य** मता ?	बुद्धिः कर्मणः ज्यायसी **ते** मता।
बुद्धिः कर्मणः ज्यायसी ते मता **चेत् तत् किं करोषि** ?	बुद्धिः कर्मणः ज्यायसी ते मता **चेत् तत् नियोजयसि।**
बुद्धिः कर्मणः ज्यायसी ते मता चेत् तत् **कुत्र** नियोजयसि ?	बुद्धिः कर्मणः ज्यायसी ते मता चेत् तत् **कर्मणि** नियोजयसि।
बुद्धिः कर्मणः ज्यायसी ते मता चेत् तत् **कीदृशे** कर्मणि नियोजयसि ?	बुद्धिः कर्मणः ज्यायसी ते मता चेत् तत् **घोरे** कर्मणि नियोजयसि।
बुद्धिः कर्मणः ज्यायसी ते मता चेत् तत् घोरे कर्मणि **कं** नियोजयसि ?	बुद्धिः कर्मणः ज्यायसी ते मता चेत् तत् घोरे कर्मणि **मां** नियोजयसि।
कृष्णः किं पृच्छति ?	कृष्णः **बुद्धिः कर्मणः ज्यायसी ते मता चेत् तत् घोरे कर्मणि मां किं नियोजयसि ?** इति पृच्छति।
अस्मिन् श्लोके सम्बोधनपदे के ?	**जनार्दन, केशव !**

तात्पर्यम् - हे भगवन्! यदि कर्मणः अपेक्षया ज्ञानमेव श्रेष्ठमिति भवान् अभिप्रैति (चिन्तयति) तर्हि मां किमर्थं क्रूरे युद्धकर्मणि नियोजयति ?

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम्॥३.२॥

पदच्छेदः - व्यामिश्रेण, इव, वाक्येन, बुद्धिम्, मोहयसि, इव, मे।
तद्, एकम्, वद, निश्चित्य, येन, श्रेयः, अहम्, आप्नुयाम्॥

अन्वयः - व्यामिश्रेण इव वाक्येन मे बुद्धिं मोहयसि। तद् येन अहं श्रेयः आप्नुयाम् (तादृशम्) एकं निश्चित्य वद।

पदार्थः - व्यामिश्रेण इव = सङ्कीर्णेन इव, वाक्येन = वचनेन, मे = मम, बुद्धिम् = मतिम्, मोहयसि = भ्रामयसि,

तत् = तस्मात्, एकम् = तादृशं प्रमुखं (मार्गम्), निश्चित्य = निर्धार्य, वद = कथय, येन अहम् = येन अहम्, श्रेयः = अतिशयेन प्रशस्तम्, आप्नुयाम् = प्राप्नुयाम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
व्यामिश्रेण	अ. नपुं. तृ. एक. (विशेषणम्)	इव	अव्ययम्
वाक्येन	अ. नपुं. तृ. एक. (विशेष्यम्)	मे	अस्मद् - द. सर्व. ष. एक.
बुद्धिम्	इ. स्त्री. द्वि. एक.	मोहयसि	मुह् (मुह वैचित्त्ये) + णिच्, पर. कर्तरि लट्. मपु. एक.
तद्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	येन	यद् - द. सर्व. नपुं. तृ. एक. (विशेषणम्)
अहम्	अस्मद् - द. सर्व. प्र. एक.	श्रेयः	श्रेयस् - सका. नपुं. द्वि. एक. (विशेष्यम्)
आप्नुयाम्	आप् (आप्लृ व्याप्तौ) पर. कर्तरि विधिलिङ्. उपु. एक.	एकम्	अ. नपुं. द्वि. एक. (विशेषणम्)
निश्चित्य	ल्यबन्तम् अव्ययम्	वद	वद् (वद व्यक्तायां वाचि) कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	व्यामिश्रेणेव	व्यामिश्रेण + इव	गुणसन्धिः।
	मोहयसीव	मोहयसि + इव	सवर्णदीर्घसन्धिः।
	तदेकम्	तत् + एकम्	जश्त्वसन्धिः।
	श्रेयोऽहम्	श्रेयः + अहम्	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
(ख) कृदन्तः	बुद्धिम्	बुध् (बुध - अवगमने) + क्तिन्, ताम्।	
	निश्चित्य	निर् + चि (चिञ् - चयने) + ल्यप्।	
(ग) तद्धितान्तः	श्रेयः	प्रशस्य + ईयसुन् (अतिशये)। ('श्र' इति आदेशः)।	

भावस्पष्टीकरणम् -

मोहयसि।	
कां मोहयसि इव ?	**बुद्धिं मोहयसि इव।**
कस्य बुद्धिं मोहयसि इव ?	**मे बुद्धिं मोहयसि इव।**

केन मे बुद्धिं मोहयसि इव ?	**वाक्येन** मे बुद्धिं मोहयसि इव ।
कीदृशेन वाक्येन मे बुद्धिं मोहयसि इव ?	**व्यामिश्रेण** वाक्येन मे बुद्धिं मोहयसि इव ।
तत् वद ।	
तत् **किं** वद ?	तत् **एकं** वद ।
तत् **कीदृशम्** एकं वद ?	तत् **येन अहं श्रेयः आप्नुयाम् (तादृशम्) एकं** वद ।
तत् येन अहं श्रेयः आप्नुयाम् (तादृशम्) एकं **किं कृत्वा** वद ?	तत् येन अहं श्रेयः आप्नुयाम् (तादृशम्) एकं **निश्चित्य** वद ।

तात्पर्यम् - हे कृष्ण ! ज्ञानस्य श्रेष्ठता, कर्मणः कर्तव्यं च बोधयन् भवान् मां भ्रामयन् अस्ति । अतः येन अहं श्रेयः प्राप्नुयां तादृशम् एकं मार्गं निश्चित्य वदतु ।

श्रीभगवानुवाच - **लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।**
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥३.३॥

पदच्छेदः -

श्रीभगवान्, उवाच - लोके, अस्मिन्, द्विविधा, निष्ठा, पुरा, प्रोक्ता, मया, अनघ ।
ज्ञानयोगेन, साङ्ख्यानाम्, कर्मयोगेन, योगिनाम् ॥३.३॥

अन्वयः - अनघ ! अस्मिन् लोके पुरा मया ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् (इति) द्विविधा निष्ठा प्रोक्ता ।

पदार्थः - अनघ = हे पापरहित ! अस्मिन् = एतस्मिन्, लोके = प्रपञ्चे, पुरा = पूर्वम्, मया = मया (कृष्णेन), ज्ञानयोगेन = ज्ञानस्य कारणेन, साङ्ख्यानां = संन्यासिनाम्, कर्मयोगेन = कर्माचरणेन, योगिनाम् = कर्मासक्तानाम्, द्विविधा = उभयविधा, निष्ठा = व्यवस्था, प्रोक्ता = वर्णिता ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनघ	अ. पुं. सम्बो. एक.	अस्मिन्	इदम् - म. सर्व. पुं. स. एक. (विशेषणम्)
लोके	अ. पुं. स. एक. (विशेष्यम्)	पुरा	अव्ययम्
मया	अस्मद्- द. सर्व. तृ. एक.	ज्ञानयोगेन	अ. पुं. तृ. एक.
साङ्ख्यानाम्	अ. पुं. ष. बहु.	कर्मयोगेन	अ. पुं. तृ. एक.
योगिनाम्	योगिन्- न. पुं. ष. बहु.	द्विविधा	आ. स्त्री. प्र. एक. (विशेषणम्)
निष्ठा	आ. स्त्री. प्र. एक. (विशेष्यम्)	प्रोक्ता	आ. स्त्री. प्र. एक.

व्याकरणम् -

(क) सन्धिः	लोकेऽस्मिन्	लोके + अस्मिन्	पूर्वरूपसन्धिः ।
	मयानघ	मया + अनघ	सवर्णदीर्घसन्धिः ।
(ख) समासः	द्विविधा	द्वे विधे यस्याः सा द्विविधा - बहुव्रीहिः ।	
	अनघ	न विद्यते अघं यस्य सः अनघः तत्सम्बुद्धौ - नञ्बहुव्रीहिः ।	
	ज्ञानयोगेन	ज्ञानम् एव योगः ज्ञानयोगः, तेन - कर्मधारयः ।	
	कर्मयोगेन	कर्म एव योगः कर्मयोगः, तेन - कर्मधारयः ।	
(ग) कृदन्त	लोके	लोक् (लोकृ - दर्शने) + घञ्, तस्मिन् ।	
	निष्ठा	नि + स्था (ष्ठा - गतिनिवृत्तौ) अङ् (भावे) । व्यवस्थाः इत्यर्थः ।	
	प्रोक्ता	प्र + वच् (वच - परिभाषणे) + क्त (स्त्रीत्वे टाप्) ।	
(घ) तद्धितान्तः	योगिनाम्	योग + इनि (मतुबर्थे) । योगः एषाम् एषु वा अस्ति, तेषाम् ।	
	साङ्ख्यानाम्	सङ्ख्या + अण् (भवार्थे) सङ्ख्यायां (बुद्धौ) भवाः, तेषाम् ।	

भावस्पष्टीकरणम् -

प्रोक्ता ।	
केन प्रोक्ता ?	**मया** प्रोक्ता ।
कदा मया प्रोक्ता ?	**पुरा** मया प्रोक्ता ।
पुरा मया **का** प्रोक्ता ?	पुरा मया **निष्ठा** प्रोक्ता ।
पुरा मया **कतिधा** निष्ठा प्रोक्ता ?	पुरा मया **द्विविधा** निष्ठा प्रोक्ता ।
कुत्र पुरा मया द्विविधा निष्ठा प्रोक्ता ?	**लोके** पुरा मया द्विविधा निष्ठा प्रोक्ता ।
कस्मिन् लोके पुरा मया द्विविधा निष्ठा प्रोक्ता ?	**अस्मिन्** लोके पुरा मया द्विविधा निष्ठा प्रोक्ता ।
अस्मिन् लोके पुरा मया **केषां** द्विविधा निष्ठा प्रोक्ता ?	अस्मिन् लोके पुरा मया **साङ्ख्यानां** द्विविधा निष्ठा प्रोक्ता ।
अस्मिन् लोके पुरा मया साङ्ख्यानां **पुनश्च केषां** द्विविधा निष्ठा प्रोक्ता ?	अस्मिन् लोके पुरा मया साङ्ख्यानां **योगिनां च** द्विविधा निष्ठा प्रोक्ता ।
अस्मिन् लोके पुरा मया **केन योगेन** साङ्ख्यानां योगिनां च द्विविधा निष्ठा प्रोक्ता ?	अस्मिन् लोके पुरा मया **ज्ञानयोगेन** साङ्ख्यानां **कर्मयोगेन** योगिनां च (इति) द्विविधा निष्ठा प्रोक्ता ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अनघ !**

तात्पर्यम् - हे अर्जुन ! साङ्ख्यानां कृते ज्ञानमार्गः योगिनां कृते कर्ममार्गश्च इति द्विविधः मार्गः मया पूर्वमेव उक्तः ।

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥३.४॥

पदच्छेदः - न, कर्मणाम्, अनारम्भात्, नैष्कर्म्यम्, पुरुषः, अश्नुते ।
न, च, संन्यसनात्, एव, सिद्धिम्, समधिगच्छति ॥

अन्वयः - पुरुषः कर्मणाम् अनारम्भात् नैष्कर्म्यं न अश्नुते । (कर्मणाम्) संन्यसनात् एव सिद्धिं च न समधिगच्छति ।

पदार्थः - पुरुषः = मनुष्यः, कर्मणाम् = क्रियाणाम्, अनारम्भात् = अनाचरणात्, नैष्कर्म्यम् = कर्मराहित्यम्, न अश्नुते = न लभते, संन्यसनात् = सर्वकर्मपरित्यागात्, सिद्धिं च = आत्मज्ञानं च, न समधिगच्छति = न प्राप्नोति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पुरुषः	अ. पुं. प्र. एक.	कर्मणाम्	कर्मन्- न. नपुं. ष. बहु.
अनारम्भात्	अ. पुं. पं. एक.	नैष्कर्म्यम्	अ. नपुं. द्वि. एक.
न	अव्ययम्	अश्नुते	अश् (अशू - व्याप्तौ संघाते च) आत्म. कर्तरि लट्. प्रपु. एक.
संन्यसनात्	अ. नपुं. पं. एक	एव	अव्ययम्
सिद्धिम्	इ. स्त्री. द्वि. एक.	च	अव्ययम्
समधिगच्छति	सम् + अधि + गम् (गम्लृ - गतौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः

अनारम्भान्नैष्कर्म्यम्	अनारम्भात् + नैष्कर्म्यम्	अनुनासिकसन्धिः ।
पुरुषोऽश्नुते	पुरुषः + अश्नुते	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
संन्यसनादेव	संन्यसनात् + एव	जश्त्वसन्धिः ।

(ख) समासः अनारम्भात् — न आरम्भः अनारम्भः, तस्मात् - नञ्तत्पुरुषः ।

(ग) कृदन्तः संन्यसनात् — सम् + नि + अस् (असु - क्षेपणे) + ल्युट् (भावे) तस्मात् ।

(घ) तद्धितान्तः नैष्कर्म्यम् — निष्कर्म + ष्यञ् । निष्कर्मणः भावः इत्यर्थः ।

भावस्पष्टीकरणम् -

न अश्नुते ।	
किं न अश्नुते ?	**नैष्कर्म्यं** न अश्नुते ।
कस्मात् नैष्कर्म्यं न अश्नुते ?	**अनारम्भात्** नैष्कर्म्यं न अश्नुते ।
केषाम् अनारम्भात् नैष्कर्म्यं न अश्नुते ?	**कर्मणाम्** अनारम्भात् नैष्कर्म्यं न अश्नुते ।
कर्मणाम् अनारम्भात् **कः** नैष्कर्म्यं न अश्नुते ?	कर्मणाम् अनारम्भात् **पुरुषः** नैष्कर्म्यं न अश्नुते ।
न समधिगच्छति ।	
कां न समधिगच्छति ?	**सिद्धिं च** न समधिगच्छति ।
सिद्धिं **कस्मात् एव** न समधिगच्छति ?	सिद्धिं (कर्मणाम्) **संन्यसनात् एव** न समधिगच्छति ।

तात्पर्यम् - मनुष्यः कर्माचरणम् अकृत्वा निष्कर्मतां न प्राप्नोति । तथा कर्मत्यागमात्रेण आत्मज्ञानम् अपि न लभते । अतः कर्माचरणं तु करणीयम् एव ।

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥३.५॥

पदच्छेदः - न, हि, कश्चित्, क्षणम्, अपि, जातु, तिष्ठति, अकर्मकृत् ।
कार्यते, हि, अवशः, कर्म, सर्वः, प्रकृतिजैः, गुणैः ॥

अन्वयः - कश्चित् जातु क्षणम् अपि अकर्मकृत् न हि तिष्ठति । सर्वः हि प्रकृतिजैः गुणैः अवशः कर्म कार्यते ।

पदार्थः - कश्चित् = कोऽपि मनुष्यः, जातु = कदापि, क्षणमपि = क्षणकालमपि, अकर्मकृत् = कर्मरहितः, न हि तिष्ठति = नैव वर्तते, हि = यतः, सर्वः = सर्वोऽपि, प्रकृतिजैः = प्रकृतिरूपैः, गुणैः = सत्त्वरजस्तमोभिः, अवशः = परवशः भूत्वा, कर्म = कर्म कर्तुम्, कार्यते = चोद्यते ।

पदपरिचयः -

पदम्	**विवरणम्**	**पदम्**	**विवरणम्**
कश्चित्	अव्ययम्	जातु	अव्ययम्
क्षणम्	अ. पुं. द्वि. एक.	अपि	अव्ययम्
अकर्मकृत्	अकर्मकृत्- त. पुं. प्र. एक.	न	अव्ययम्
हि	अव्ययम्	तिष्ठति	**तिष्ठ (ष्ठा - गतिनिवृत्तौ) पर. कर्तरि लट्. प्रपु. एक.**

सर्वः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)	प्रकृतिजैः	अ. पुं. तृ. बहु. (विशेषणम्)
गुणैः	अ. पुं. तृ. बहु. (विशेष्यम्)	अवशः	अ. पुं. प्र. एक.
कर्म	कर्मन्- न. नपुं. प्र. एक.	कार्यते	कृ (डुकृञ् - करणे) + णिच्, आत्म. कर्मणि लट्, प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	तिष्ठत्यकर्मकृत्	तिष्ठति + अकर्मकृत्	यण्सन्धिः
	ह्यवशः	हि + अवशः	यण्सन्धिः
	प्रकृतिजैर्गुणैः	प्रकृतिजैः + गुणैः	विसर्गसन्धिः (रेफः) ।
(ख) समासः	कर्मकृत्	कर्म करोति इति कर्मकृत् - कर्तरि क्विप् उपपदसमासश्च ।	
	अकर्मकृत्	न कर्मकृत् अकर्मकृत् - नञ्तत्पुरुषः ।	
	अवशः	न वशः अवशः - नञ्तत्पुरुषः ।	
	प्रकृतिजैः	प्रकृत्याः जायन्ते इति प्रकृतिजाः, तैः - कर्तरि डः उपपदसमासश्च ।	
(ग) कृदन्तः	वशः	वश् (वश कान्तौ) + अच् । (कर्मणि) ।	

भावस्पष्टीकरणम् -

न तिष्ठति ।	
कः न तिष्ठति ?	**कश्चित्** न तिष्ठति ।
कश्चित् **कथम्भूतः** न तिष्ठति ?	कश्चित् **अकर्मकृत्** न तिष्ठति ।
कश्चित् **कथम्** अकर्मकृत् न तिष्ठति ?	कश्चित् **क्षणमपि** अकर्मकृत् न तिष्ठति
कश्चित् **कदा** क्षणमपि अकर्मकृत् न तिष्ठति ?	कश्चित् **जातु** क्षणमपि अकर्मकृत् न तिष्ठति ।
कार्यते ।	
किं कार्यते ?	**कर्म** कार्यते ।
कथं कर्म कार्यते ?	**अवशः** कर्म कार्यते ।
कैः अवशः कर्म कार्यते ?	**गुणैः** अवशः कर्म कार्यते ।
कीदृशैः गुणैः अवशः कर्म कार्यते ?	**प्रकृतिजैः** गुणैः अवशः कर्म कार्यते ।
कः प्रकृतिजैः गुणैः अवशः कर्म कार्यते ?	**सर्वः** प्रकृतिजैः गुणैः अवशः कर्म कार्यते ।
कः प्रकृतिजैः गुणैः अवशः कर्म कार्यते ?	**सर्वः हि** प्रकृतिजैः गुणैः अवशः कर्म कार्यते ।

तात्पर्यम् - यः कोऽपि कदापि क्षणकालमपि कर्मरहितः सन् न भवति । यतः सर्वेऽपि प्रकृतिसम्भूतैः विकारैः विवशाः सन्तः कर्मकरणे प्रवर्तन्ते ।

कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते॥३.६॥

पदच्छेदः - कर्मेन्द्रियाणि, संयम्य, यः, आस्ते, मनसा, स्मरन्।
इन्द्रियार्थान्, विमूढात्मा, मिथ्याचारः, सः, उच्यते॥

अन्वयः यः विमूढात्मा कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन् आस्ते सः मिथ्याचारः उच्यते।

पदार्थः यः विमूढात्मा = यः अविवेकी पुरुषः, कर्मेन्द्रियाणि = वाक्-पाणि-पाद-पायु-उपस्थान्, संयम्य = निरुध्य, मनसा = चित्तेन, इन्द्रियार्थान् = विषयान्, स्मरन् = चिन्तयन्, आस्ते = वर्तते, सः = सः पुरुषः, मिथ्याचारः = दम्भी, उच्यते = कथ्यते।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	विमूढात्मा	विमूढात्मन्- न. पुं. प्र. एक. (विशेष्यम्)
कर्मेन्द्रियाणि	अ. नपुं. द्वि. बहु.	संयम्य	ल्यबन्तम् अव्ययम्
इन्द्रियार्थान्	अ. पुं. द्वि. बहु.	मनसा	मनस्- सका. नपुं. तृ. एक.
स्मरन्	स्मरत्- त. पुं. प्र. एक. (विशेषणम्)	आस्ते	आस् (आस उपवेशने) आत्म. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	मिथ्याचारः	अ. पुं. प्र. एक. (विशेष्यम्)
उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः य आस्ते — यः + आस्ते — विसर्गसन्धिः (लोपः)।
स उच्यते — सः + उच्यते — विसर्गसन्धिः (लोपः)।

(ख) समासः कर्मेन्द्रियाणि — कर्मणः इन्द्रियाणि कर्मेन्द्रियाणि - षष्ठीतत्पुरुषः।
इन्द्रियार्थान् — इन्द्रियाणाम् अर्थाः इन्द्रियार्थाः, तान् - षष्ठीतत्पुरुषः।
विमूढात्मा — विमूढः आत्मा यस्य सः विमूढात्मा - बहुव्रीहिः।
मिथ्याचारः — मिथ्या आचारः यस्य सः मिथ्याचारः - बहुव्रीहिः।

(ग) कृदन्तः संयम्य — सम् + यम् (यम - उपरमे) + ल्यप्।
स्मरन् — स्मृ (स्मृ - चिन्तायाम् आध्याने च) + शतृ (कर्तरि)।
विमूढः — वि + मुह् (मुह - वैचित्ये) + क्त (कर्तरि)।

भावस्पष्टीकरणम् -

आस्ते ।	
कः आस्ते ?	**विमूढात्मा** आस्ते ।
विमूढात्मा **किं कुर्वन्** आस्ते ?	विमूढात्मा **स्मरन्** आस्ते ।
विमूढात्मा **कान्** स्मरन् आस्ते ?	विमूढात्मा **इन्द्रियार्थान्** स्मरन् आस्ते ।
विमूढात्मा इन्द्रियार्थान् **केन** स्मरन् आस्ते ?	विमूढात्मा इन्द्रियार्थान् **मनसा** स्मरन् आस्ते ।
विमूढात्मा **किं कृत्वा** इन्द्रियार्थान् मनसा स्मरन् आस्ते ?	विमूढात्मा **संयम्य** इन्द्रियार्थान् मनसा स्मरन् आस्ते ।
विमूढात्मा **कानि** संयम्य इन्द्रियार्थान् मनसा स्मरन् आस्ते ?	विमूढात्मा **कर्मेन्द्रियाणि** संयम्य इन्द्रियार्थान् मनसा स्मरन् आस्ते ।
यः विमूढात्मा कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन् आस्ते **तस्य किं भवति** ?	**यः** विमूढात्मा कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन् आस्ते **सः उच्यते** ।
यः विमूढात्मा कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन् आस्ते सः **कीदृशः** उच्यते ?	यः विमूढात्मा कर्मेन्द्रियाणि संयम्य इन्द्रियार्थान् मनसा स्मरन् आस्ते सः **मिथ्याचारः** उच्यते ।

तात्पर्यम् - यः अववेकी पुरुषः इन्द्रियाणि निरुध्य चित्तेन विषयान् चिन्तयन् भवति सः कपटाचारः इति कथ्यते ।

यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥३.७॥

पदच्छेदः - यः, तु, इन्द्रियाणि, मनसा, नियम्य, आरभते, अर्जुन ।
कर्मेन्द्रियैः, कर्मयोगम्, असक्तः, सः, विशिष्यते ॥

अन्वयः - अर्जुन ! यः तु असक्तः इन्द्रियाणि मनसा नियम्य कर्मेन्द्रियैः कर्मयोगम् आरभते सः विशिष्यते ।

पदार्थः - अर्जुन = हे पार्थ!, यः तु = यः पुरुषः, असक्तः = सङ्गरहितः, इन्द्रियाणि = नेत्रादीनि, मनसा = चित्तेन, नियम्य = वशीकृत्य, कर्मेन्द्रियैः = हस्तादिभिः, कर्मयोगम् = कर्माचरणम्, आरभते = प्रारभते, सः = सः पुरुषः, विशिष्यते = उत्कृष्टः भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अर्जुन	अ. पुं. सम्बो. एक.	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
तु	अव्ययम्	असक्तः	अ. पुं. प्र. एक. (विशेषणम्)

इन्द्रियाणि	अ. नपुं. द्वि. बहु.	मनसा	मनस्- सका. नपुं. तृ. एक.
नियम्य	ल्यबन्तम् अव्ययम्	कर्मेन्द्रियैः	अ. नपुं. तृ. बहु.
कर्मयोगम्	अ. पुं. द्वि. एक.	आरभते	आ + रभ् (रभ - राभस्ये) आत्म. कर्तरि लट्. प्रपु. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	विशिष्यते	वि + शिष् (शिष्लृ - विशेषणे) पर. (कर्मणि) लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यस्तु	यः + तु	विसर्गसन्धिः (सकारः)।
	त्विन्द्रियाणि	तु + इन्द्रियाणि	यण्सन्धिः।
	नियम्यारभते	नियम्य + आरभते	सवर्णदीर्घसन्धिः।
	आरभतेऽर्जुन	आरभते + अर्जुन	पूर्वरूपसन्धिः।
(ख) समासः	कर्मेन्द्रियैः	कर्मणः इन्द्रियाणि कर्मेन्द्रियाणि, तैः - षष्ठीतत्पुरुषः।	
	असक्तः	न सक्तः असक्तः - नञ्तत्पुरुषः।	
(ग) कृदन्तः	नियम्य	नि + यम् (यम - उपरमे) + ल्यप्।	
	सक्तः	सञ्ज् (षञ्ज - सङ्गे) + क्त।	

भावस्पष्टीकरणम् -

आरभते।	
कः आरभते ?	**असक्तः** आरभते।
असक्तः **कम्** आरभते ?	असक्तः **कर्मयोगम्** आरभते।
असक्तः **कैः** कर्मयोगम् आरभते ?	असक्तः **कर्मेन्द्रियैः** कर्मयोगम् आरभते।
असक्तः **किं कृत्वा** कर्मेन्द्रियैः कर्मयोगम् आरभते ?	असक्तः **नियम्य** कर्मेन्द्रियैः कर्मयोगम् आरभते।
असक्तः **कानि** नियम्य कर्मेन्द्रियैः कर्मयोगम् आरभते ?	असक्तः **इन्द्रियाणि** नियम्य कर्मेन्द्रियैः कर्मयोगम् आरभते।
असक्तः इन्द्रियाणि **केन** नियम्य कर्मेन्द्रियैः कर्मयोगम् आरभते ?	असक्तः इन्द्रियाणि **मनसा** नियम्य कर्मेन्द्रियैः कर्मयोगम् आरभते।
यः असक्तः इन्द्रियाणि मनसा नियम्य कर्मेन्द्रियैः कर्मयोगम् आरभते **सः कीदृशः भवति**।	यः असक्तः इन्द्रियाणि मनसा नियम्य कर्मेन्द्रियैः कर्मयोगम् आरभते **सः विशिष्यते**।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**अर्जुन !**

तात्पर्यम् - अर्जुन ! यः मनुष्यः चित्तेन ज्ञानेन्द्रियाणि वशीकृत्य सङ्गरहितः सन् वाक्पाण्यादिभिः कर्म प्रारभते, सः मनुष्यः श्रेष्ठः इति परिगण्यते ।

नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥३.८॥

पदच्छेदः - नियतम्, कुरु, कर्म, त्वम्, कर्म, ज्यायः, हि, अकर्मणः ।
शरीरयात्रा, अपि, च, ते, न, प्रसिद्ध्येद्, अकर्मणः ॥

अन्वयः - त्वं नियतं कर्म कुरु, कर्म हि अकर्मणः ज्यायः । अकर्मणः ते शरीरयात्रा च अपि न प्रसिद्ध्येत् ।

पदार्थः - त्वम् = त्वम्, नियतम् = निर्दिष्टम्, कर्म = कर्म, कुरु = आचर, हि = यतः, अकर्मणः = कर्माभावात्, कर्म = कर्माचरणम्, ज्यायः = श्रेष्ठम्, अकर्मणः = कर्माभावात्, ते = तव, शरीरयात्रा अपि = देहयात्रा अपि, न प्रसिद्ध्येत् = न जायेत ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
त्वम्	युष्मद्- द. सर्व. प्र. एक.	नियतम्	अ. नपुं. द्वि. एक. (विशेषणम्)
कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)	कुरु	कृ (डुकृञ् - करणे) पर. कर्तरि लोट्. मपु. एक.
कर्म	कर्मन्- न. नपुं. प्र. एक.	हि	अव्ययम्
अकर्मणः	अकर्मन्- न. नपुं. पं. एक.	ज्यायः	ज्यायस्- सका. नपुं. प्र. एक.
अकर्मणः	अकर्मन्- न. नपुं. ष. एक.	ते	युष्मद्- द. सर्व. ष. एक.
शरीरयात्रा	आ. स्त्री. प्र. एक.	च	अव्ययम्
अपि	अव्ययम्	न	अव्ययम्
प्रसिद्ध्येत्	प्र + सिध् (षिधु - संराद्धौ) पर. कर्तरि विधिलिङ्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	ज्यायो हि	ज्यायः + हि	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	ह्यकर्मणः	हि + अकर्मणः	यण्सन्धिः ।
	शरीरयात्रापि	शरीरयात्रा + अपि	सवर्णदीर्घसन्धिः ।
	प्रसिद्ध्येदकर्मणः	प्रसिद्ध्येत् + अकर्मणः	जश्त्वसन्धिः ।
(ख) समासः	शरीरयात्रा	शरीरस्य यात्रा शरीरयात्रा -	षष्ठीतत्पुरुषः ।

	अकर्मणः	न कर्म अकर्म, तस्मात् - नञ्तत्पुरुषः।
(ग) कृदन्तः	नियतम्	नि + यम् (यम - उपरमे) क्त, तत्।
(घ) तद्धितान्तः	ज्यायः	प्रशस्य / वृद्ध + ईयसुन् (ज्य इति आदेशः)।

भावस्पष्टीकरणम् -

त्वं कुरु।	
त्वं **किं** कुरु ?	त्वं **कर्म** कुरु।
त्वं **कथं** कर्म कुरु ?	त्वं **नियतं** कर्म कुरु।
त्वं नियतं कर्म कुरु। **किदृशम्** ?	त्वं नियतं कर्म कुरु। **कर्म हि ज्यायः।**
त्वं नियतं कर्म कुरु। कर्म **कस्मात्** ज्यायः ?	त्वं नियतं कर्म कुरु। कर्म हि **अकर्मणः** ज्यायः।
न प्रसिद्ध्येत्।	
का न प्रसिद्ध्येत् ?	**शरीरयात्रा अपि** न प्रसिद्ध्येत्।
कस्य शरीरयात्रा अपि न प्रसिद्ध्येत् ?	**ते** शरीरयात्रा अपि न प्रसिद्ध्येत्।
कीदृशस्य ते शरीरयात्रा अपि न प्रसिद्ध्येत् ?	**अकर्मणः** ते शरीरयात्रा अपि न प्रसिद्ध्येत्।

तात्पर्यम् - भवान् नित्यं यस्मिन् कर्मणि युक्तः अस्ति तत् कर्म तु करोतु एव। यतः कर्मणः अनाचरणात् कर्माचरणम् एव श्रेष्ठं वर्तते। किञ्च कर्मणः अभावे तु भवान् स्वस्य शरीररक्षणम् अपि कर्तुं न शक्नोति। अतः कर्म एव श्रेष्ठम्। भवान् कर्म करोतु।

यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥३.९॥

पदच्छेदः - यज्ञार्थात्, कर्मणः, अन्यत्र, लोकः, अयम्, कर्मबन्धनः।
तदर्थम्, कर्म, कौन्तेय, मुक्तसङ्गः, समाचर॥

अन्वयः - यज्ञार्थात् कर्मणः अन्यत्र अयं लोकः कर्मबन्धनः (भवति)। तदर्थं कौन्तेय ! मुक्तसङ्गः कर्म समाचर।

पदार्थः - यज्ञार्थात् = भगवत्प्राप्तिरूपात् प्रयोजनात्, कर्मणः = कर्मणः अपेक्षया, अन्यत्र = इतरत्र (संलग्नः), अयं लोकः = एषः प्रपञ्चः, कर्मबन्धनः = कर्मबन्धवान् भवति, कौन्तेय = अर्जुन!, तदर्थम् = यज्ञार्थम्, मुक्तसङ्गः = त्यक्तसङ्गो भूत्वा, कर्म = शास्त्रोक्तं कर्म, समाचर = आचर।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यज्ञार्थात्	अ. पुं. पं. एक.	कर्मणः	कर्मन्- न. नपुं. ष. एक.

अन्यत्र	अव्ययम्	अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)
लोकः	अ. पुं. प्र. एक. (विशेष्यम्)	कर्मबन्धनः	अ. पुं. प्र. एक. (विशेषणम्)
तदर्थम्	अव्ययम्	कौन्तेय	अ. पुं. सम्बो. एक.
मुक्तसङ्गः	अ. पुं. प्र. एक.	कर्म	कर्मन्- न. नपुं. द्वि. एक.
समाचर	सम् + आ + चर् (चर - गतिभक्षणयोः) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः कर्मणोऽन्यत्र — कर्मणः + अन्यत्र — विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

लोकोऽयम् — लोकः + अयम् — विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च ।

(ख) समासः यज्ञार्थात् — यज्ञस्य अर्थः यज्ञार्थः, तस्मात् - षष्ठीतत्पुरुषः ।

कर्मबन्धनः — कर्म बन्धनं यस्य सः कर्मबन्धनः - बहुव्रीहिः ।

तदर्थम् — तस्मै इदम्, तदर्थम् - चतुर्थीतत्पुरुषः ।

मुक्तसङ्गः — मुक्तः सङ्गः येन सः मुक्तसङ्गः - बहुव्रीहिः ।

(ग) कृदन्तः लोकः — लोक् (लोकृ दर्शने) + घञ् ।

बन्धनम् — बन्ध् (बन्ध - बन्धने) + ल्युट् । (करणे) बध्यते अनेन इत्यर्थः ।

(घ) तद्धितान्तः कौन्तेय — कुन्ती + ढक् (अपत्यार्थे) कुन्त्याः अपत्यं पुमान्, तत्सम्बुद्धौ ।

भावस्पष्टीकरणम् -

कर्मबन्धनः ।	
कः कर्मबन्धनः ?	**लोकः** कर्मबन्धनः ।
कः लोकः कर्मबन्धनः ?	**अयं** लोकः कर्मबन्धनः ।
अयं लोकः **कुत्र** कर्मबन्धनः ?	अयं लोकः **अन्यत्र** कर्मबन्धनः ।
अयं लोकः **कस्मात्** अन्यत्र कर्मबन्धनः ?	अयं लोकः **कर्मणः** अन्यत्र कर्मबन्धनः ।
अयं लोकः **कीदृशात्** कर्मणः अन्यत्र कर्मबन्धनः ?	अयं लोकः **यज्ञार्थात्** कर्मणः अन्यत्र कर्मबन्धनः ।
अयं लोकः यज्ञार्थात् कर्मणः अन्यत्र कर्मबन्धनः । **तेन किम्** ?	अयं लोकः यज्ञार्थात् कर्मणः अन्यत्र कर्मबन्धनः । **तदर्थं समाचर ।**
अयं लोकः यज्ञार्थात् कर्मणः अन्यत्र कर्मबन्धनः । तदर्थं **किं** समाचर ?	अयं लोकः यज्ञार्थात् कर्मणः अन्यत्र कर्मबन्धनः । तदर्थं **कर्म** समाचर ।

अयं लोकः यज्ञार्थात् कर्मणः अन्यत्र कर्मबन्धनः । तदर्थं **कीदृशः (सन्)** कर्म समाचर ?	अयं लोकः यज्ञार्थात् कर्मणः अन्यत्र कर्मबन्धनः । तदर्थं **मुक्तसङ्गः (सन्)** कर्म समाचर ।

तात्पर्यम् - येन कर्मणा भगवत्प्राप्तिः भवति ततः अतिरिक्तं सर्वमपि कर्म जनानां बन्धकं भवति । अतः भवान् फलस्य अपेक्षां त्यक्त्वा शास्त्रोक्तं स्वकीयं कर्म आचरतु ।

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥३.१०॥

पदच्छेदः - सहयज्ञाः, प्रजाः, सृष्ट्वा, पुरा, उवाच, प्रजापतिः ।
अनेन, प्रसविष्यध्वम्, एषः, वः, अस्तु, इष्टकामधुक् ॥

अन्वयः - प्रजापतिः पुरा सहयज्ञाः प्रजाः सृष्ट्वा उवाच । अनेन (यज्ञेन) प्रसविष्यध्वम् । एषः वः इष्टकामधुक् अस्तु ।

पदार्थः - प्रजापतिः = सृष्टिकर्ता, पुरा = पूर्वम्, सहयज्ञाः = कर्माधिकृताः, प्रजाः = मानवान्, सृष्ट्वा = निर्माय, उवाच = अवदत्, अनेन = एतेन (यज्ञेन), प्रसविष्यध्वम् = वृद्धिं प्राप्नुवन्तु, एषः = अयम् (यज्ञः), वः = भवताम्, इष्टकामधुक् = अभीष्टदाता, अस्तु = भवतु ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रजापतिः	इ. पुं. प्र. एक.	पुरा	अव्ययम्
सहयज्ञाः	आ. स्त्री. द्वि. बहु. (विशेषणम्)	प्रजाः	आ. स्त्री. द्वि. बहु. (विशेष्यम्)
सृष्ट्वा	क्त्वान्तम् अव्ययम्	उवाच	ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लिट्. प्रपु. एक.
अनेन	इदम्- म. सर्व. पुं. तृ. एक.	प्रसविष्यध्वम् (प्रसूध्वम्)	प्र + सू (षूङ् - प्राणिगर्भविमोचने)[1] आत्म. कर्तरि लोट्. मपु. बहु.
एषः	एतद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	वः	युष्मद्- द. सर्व. ष. बहु.
इष्टकामधुक्	इष्टकामदुह्- ह. पुं. प्र. एक. (विशेषणम्)	अस्तु	अस् (अस - भुवि) पर. कर्तरि लोट्. प्रपु. एक.

1. अत्र 'प्रसविष्यध्वम्' इति आर्षप्रयोगः ।

व्याकरणम -

(क) सन्धिः	पुरोवाच	पुरा + उवाच	गुणसन्धिः।
	एष वः	एषः + वः	विसर्गसन्धिः (लोपः)।
	वोऽस्तु	वः + अस्तु	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः पूर्वरूपं च।
	अस्त्विष्टकामधुक्	अस्तु + इष्टकामधुक्	यण्सन्धिः।
(ख) समासः	सहयज्ञाः	यज्ञेन सह वर्तन्ते इति सहयज्ञाः - बहुव्रीहिः।	
	प्रजापतिः	प्रजानां पतिः प्रजापतिः - षष्ठीतत्पुरुषः।	
	इष्टकामधुक्	इष्टाश्च ते कामाश्च इष्टकामाः - कर्मधारयः। इष्टकामान् दोग्धि इति इष्टकामधुक् - कर्तरि क्विप् उपपदसमासश्च।	
(ग) कृदन्तः	सृष्ट्वा	सृज् (सृज - विसर्गे) + क्त्वा।	

भावस्पष्टीकरणम् -

उवाच।	
कः उवाच ?	**प्रजापतिः** उवाच।
प्रजापतिः **कदा** उवाच ?	प्रजापतिः **पुरा** उवाच।
प्रजापतिः **किं कृत्वा** पुरा उवाच ?	प्रजापतिः **सृष्ट्वा** पुरा उवाच।
प्रजापतिः **काः** सृष्ट्वा पुरा उवाच ?	प्रजापतिः **प्रजाः** सृष्ट्वा पुरा उवाच।
प्रजापतिः **कीदृशीः** प्रजाः सृष्ट्वा पुरा उवाच ?	प्रजापतिः **सहयज्ञाः** प्रजाः सृष्ट्वा पुरा उवाच।
प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच। **किम्** ?	प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच **प्रसविष्यध्वम्**।
प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच **केन** प्रसविष्यध्वम् ?	प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच **अनेन** प्रसविष्यध्वम्।
प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच अनेन प्रसविष्यध्वम्। **पुनश्च किम्** ?	प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच अनेन प्रसविष्यध्वम्। **अस्तु**।
प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच अनेन प्रसविष्यध्वम्। **कः** अस्तु ?	प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच अनेन प्रसविष्यध्वम्। **एषः (यज्ञः)** अस्तु।
प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच अनेन प्रसविष्यध्वम्। एषः (यज्ञः) **कीदृशः** अस्तु ?	प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच अनेन प्रसविष्यध्वम्। एषः (यज्ञः) **इष्टकामधुक्** अस्तु।

प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच अनेन प्रसविष्यध्वम्। एषः (यज्ञः) **केषाम्** इष्टकामधुक् अस्तु ?	प्रजापतिः सहयज्ञाः प्रजाः सृष्ट्वा पुरा उवाच अनेन प्रसविष्यध्वम्। एषः (यज्ञः) **वः** इष्टकामधुक् अस्तु।

तात्पर्यम् - सृष्टिकर्ता कल्पस्य आदौ वर्णोचितकर्मणा सह प्रजानां सर्जनं कृतवान्। उक्तवान् च - "अनेन कर्मणा भवन्तः वृद्धिं प्राप्नुवन्तु। इदं कर्म भवताम् अभीष्टसिद्ध्यर्थं च भवतु" इति।

देवान्भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥३.११॥

पदच्छेदः - देवान्, भावयत, अनेन, ते, देवाः, भावयन्तु, वः।
परस्परम्, भावयन्तः, श्रेयः, परम्, अवाप्स्यथ॥

अन्वयः - अनेन (यज्ञेन) देवान् भावयत। ते देवाः वः भावयन्तु। (एवम्) परस्परं भावयन्तः परं श्रेयः अवाप्स्यथ।

पदार्थः - अनेन = एतेन यज्ञेन, देवान् = इन्द्रादीन्, भावयत = वर्धयत, ते देवाः = एते इन्द्रादयः, वः = युष्मान्, भावयन्तु = वर्धयन्तु, परस्परम् = अन्योन्यम्, भावयन्तः = वर्धयन्तः, परं श्रेयः = उत्तमं हितम्, अवाप्स्यथ = लभध्वम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अनेन	इदम्- म. सर्व. पुं. तृ. एक.	देवान्	अ. पु. द्वि. बहु.
भावयत	भू (भू सत्तायाम्) + णिच्, पर. कर्तरि लोट्. मपु. बहु.	ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)
देवाः	अ. पु. प्र. बहु. (विशेष्यम्)	वः	युष्मद्- द. सर्व. द्वि. बहु.
भावयन्तु	भू (भू सत्तायाम्) + णिच्, पर. कर्तरि लोट्. प्रपु. बहु.	परस्परम्	अ. पुं. द्वि. एक.
भावयन्तः	भावयत्- त. पुं. प्र. बहु.	परम्	अव्ययम्
श्रेयः	श्रेयस्- सका. नपुं. द्वि. एक.	अवाप्स्यथ	अव + आप् (आप्लृ व्याप्तौ) पर. कर्तरि लृट्. मपु. बहु.

व्याकरणम् -

(क) सन्धिः	भावयतानेन	भावयत + अनेन	सवर्णदीर्घसन्धिः।
	देवा भावयन्तु	देवाः + भावयन्तु	विसर्गसन्धिः (लोपः)।

(ख) कृदन्तः भावयन्तः भू (भू - सत्तायाम्) + णिच् + शतृ (कर्तरि)।
देवान् दिव् (दिवु - क्रीडाविजिगीषा-व्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु) + अच्, तान्।

(ग) तद्धितान्तः श्रेयः प्रशस्य + ईयसुन् (अतिशये)। (श्र इति आदेशः)।

भावस्पष्टीकरणम् -

भावयत, भावयन्तु।	
कान् भावयत, **के** भावयन्तु ?	**देवान्** भावयत, **देवाः** भावयन्तु।
केन देवान् भावयत, **के** देवाः भावयन्तु ?	**अनेन** देवान् भावयत, **ते** देवाः भावयन्तु।
अनेन देवान् भावयत, ते देवाः **कान्** भावयन्तु ?	अनेन देवान् भावयत, ते देवाः **वः** भावयन्तु।
अनेन देवान् भावयत, ते देवाः वः भावयन्तु। **तेन किम्** ?	अनेन देवान् भावयत, ते देवाः वः भावयन्तु। **तेन अवाप्स्यथ।**
अनेन देवान् भावयत, ते देवाः वः भावयन्तु। **किम्** अवाप्स्यथ ?	अनेन देवान् भावयत, ते देवाः वः भावयन्तु। **श्रेयः** अवाप्स्यथ।
अनेन देवान् भावयत, ते देवाः वः भावयन्तु। **कीदृशं** श्रेयः अवाप्स्यथ ?	अनेन देवान् भावयत, ते देवाः वः भावयन्तु। **परं** श्रेयः अवाप्स्यथ।
अनेन देवान् भावयत, ते देवाः वः भावयन्तु। **कीदृशाः** परं श्रेयः अवाप्स्यथ ?	अनेन देवान् भावयत, ते देवाः वः भावयन्तु। **भावयन्तः** परं श्रेयः अवाप्स्यथ।
अनेन देवान् भावयत, ते देवाः वः भावयन्तु। **कथं** भावयन्तः परं श्रेयः अवाप्स्यथ ?	अनेन देवान् भावयत, ते देवाः वः भावयन्तु। (एवम्) **परस्परं** भावयन्तः परं श्रेयः अवाप्स्यथ।

तात्पर्यम् - भवन्तः एतेन यज्ञेन हविर्दानादिद्वारा देवान् वर्धयन्तु। ते च देवाः युष्मान् वर्धयन्तु। एवं परस्परं वर्धयन्तः भवन्तः उत्तमं हितं प्राप्नुवन्तु।

इष्टान्भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः॥३.१२॥

पदच्छेदः - इष्टान्, भोगान्, हि, वः, देवाः, दास्यन्ते, यज्ञभाविताः।
तैः, दत्तान्, अप्रदाय, एभ्यः, यः, भुङ्क्ते, स्तेनः, एव, सः॥

अन्वयः - यज्ञभाविताः देवाः वः इष्टान् भोगान् हि दास्यन्ते। तैः दत्तान् एभ्यः अप्रदाय यः भुङ्क्ते सः स्तेनः एव।

पदार्थः - यज्ञभाविताः = यज्ञवर्धिताः, देवाः = इन्द्रादयः, वः = युष्मभ्यम्, इष्टान् = अभीप्सितान्, भोगान् = पदार्थान्, दास्यन्ते = वितरिष्यन्ति, तैः = देवैः, दत्तान् = वितीर्णान्, एभ्यः = देवेभ्यः, अप्रदाय = अदत्त्वा, यः भुङ्क्ते = यः पुरुषः अनुभवति, सः स्तेनः एव = सः चोरः एव ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यज्ञभाविताः	अ. पुं. प्र. बहु. (विशेषणम्)	देवाः	अ. पुं. प्र. बहु. (विशेष्यम्)
वः	युष्मद्- द. सर्व. च. बहु.	इष्टान्	अ. पुं. द्वि. बहु. (विशेषणम्)
भोगान्	अ. पुं. द्वि. बहु. (विशेष्यम्)	हि	अव्ययम्
दास्यन्ते	दा (डुदाञ् दाने) आत्म. कर्तरि लृट्. प्रपु. बहु.	तैः	तद्- द. सर्व. पुं. तृ. बहु.
दत्तान्	अ. पुं. द्वि. बहु.	एभ्यः	इदम्- म. सर्व. पुं. च. बहु.
अप्रदाय	ल्यबन्तम् अव्ययम्	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
भुङ्क्ते	भुज् (भुज पालनाभ्यवहारयोः) आत्म. कर्तरि लट्. प्रपु. एक.	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
स्तेनः	अ. पुं. प्र. एक.	एव	अव्ययम्

व्याकरणम् -

(क) सन्धिः	वो देवाः	वः + देवाः	विसर्गसन्धिः (सकारः), रेफः, उकारः, गुणः ।
	देवा दास्यन्ते	देवाः + दास्यन्ते	विसर्गसन्धिः (लोपः) ।
	तैर्दत्तान्	तैः + दत्तान्	विसर्गसन्धिः (रेफः) ।
	अप्रदायैभ्यः	अप्रदाय + एभ्यः	वृद्धिसन्धिः ।
	एभ्यो यः	एभ्यः + यः	विसर्गसन्धिः (सकारः), रेफः, उकारः, गुणः ।
	यो भुङ्क्ते	यः + भुङ्क्ते	विसर्गसन्धिः (सकारः), रेफः, उकारः, गुणः ।
	स्तेन एव	स्तेनः + एव	विसर्गसन्धिः (लोपः) ।
(ख) समासः	यज्ञभाविताः	यज्ञेन भाविताः यज्ञभाविताः - तृतीयातत्पुरुषः ।	
	अप्रदाय	न प्रदाय अप्रदाय - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	इष्टान्	इष् (इषु इच्छायाम्) + क्त (कर्मणि) तान् ।	

भोगान्	भुज् (भुज पालनाभ्यवहारयोः) + घञ्, तान् ।
देवाः	दिव् (दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु) + अच् ।
भावितः	भू (भू सत्तायाम्) + णिच् + क्त (कर्मणि) ।
दत्तान्	दा (डुदाञ् दाने) + क्त (कर्मणि) तान् ।
प्रदाय	प्र + दा (डुदाञ् दाने) + ल्यप् ।
स्तेनः	स्तेन् (स्तेन चौर्ये) + अच् (पचाद्यच्) ।

भावस्पष्टीकरणम् -

दास्यन्ते ।	
के दास्यन्ते ?	देवाः दास्यन्ते ।
देवाः **कान्** दास्यन्ते ?	देवाः **भोगान्** दास्यन्ते ।
देवाः **कीदृशान्** भोगान् दास्यन्ते ?	देवाः **इष्टान्** भोगान् दास्यन्ते ।
देवाः **केभ्यः** इष्टान् भोगान् दास्यन्ते ?	देवाः **वः** इष्टान् भोगान् दास्यन्ते ।
कीदृशाः देवाः वः इष्टान् भोगान् दास्यन्ते ?	**यज्ञभाविताः** देवाः वः इष्टान् भोगान् दास्यन्ते ।
भुङ्क्ते ।	
कान् भुङ्क्ते ?	**दत्तान्** भुङ्क्ते ।
कैः दत्तान् भुङ्क्ते ?	**तैः** दत्तान् भुङ्क्ते ।
तैः दत्तान् **कथं** भुङ्क्ते ?	तैः दत्तान् **अप्रदाय** भुङ्क्ते ।
तैः दत्तान् **केभ्यः** अप्रदाय भुङ्क्ते ?	तैः दत्तान् **एभ्यः** अप्रदाय भुङ्क्ते ।
तैः दत्तान् एभ्यः अप्रदाय यः भुङ्क्ते सः **कः** ?	तैः दत्तान् एभ्यः अप्रदाय यः भुङ्क्ते सः **स्तेनः** एव ।

तात्पर्यम् - यज्ञेन सन्तुष्टाः देवाः प्रार्थनां विनापि अस्मभ्यम् अभीप्सितं वस्तु प्रयच्छन्ति । तेभ्यः देवेभ्यः किमपि अदत्त्वा यः सर्वम् अनुभवति (सर्वस्य वस्तुनः उपभोगं करोति) सः चोरः एव ।

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥३.१३॥

पदच्छेदः - यज्ञशिष्टाशिनः, सन्तः, मुच्यन्ते, सर्वकिल्बिषैः ।
भुञ्जते, ते, तु, अघम्, पापाः, ये, पचन्ति, आत्मकारणात् ॥

अन्वयः - यज्ञशिष्टाशिनः सन्तः सर्वकिल्बिषैः मुच्यन्ते। ये च पापाः आत्मकारणात् पचन्ति ते तु अघं भुञ्जते।

पदार्थः - यज्ञशिष्टाशिनः = यज्ञशेषभोजिनः, सन्तः = साधवः, सर्वकिल्बिषैः = सकलपापैः, मुच्यन्ते = त्यज्यन्ते, ये पापाः = ये च पापिनः, आत्मकारणात् = आत्मार्थम्, पचन्ति = पचन्ति, ते तु = तादृशाः तु, अघम् = पापम्, भुञ्जते = अनुभवन्ति (खादन्ति)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यज्ञशिष्टाशिनः	यज्ञशिष्टाशिन्- न. पुं, प्र. बहु.	सन्तः	सत्- त. पुं. प्र. बहु. (विशेषणम्)
सर्वकिल्बिषैः	अ. नपुं. तृ. बहु.	मुच्यन्ते	मुच् (मुच्लृ मोक्षणे) आत्म. कर्मणि लट्. प्रपु. बहु.
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	च	अव्ययम्
पापाः	अ. पुं. प्र. बहु. (विशेष्यम्)	आत्मकारणात्	अ. नपुं. पं. एक.
पचन्ति	पच् (डुपचष् पाके) पर. कर्तरि लट्. प्रपु. बहु.	ते	तद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)
तु	अव्ययम्	अघम्	अ. नपुं. द्वि. एक.
भुञ्जते	भुज् (भुज पालनाभ्यवहारयोः) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः

सन्तो मुच्यन्ते	सन्तः + मुच्यन्ते	विसर्गसन्धिः (सकारः) रेफ, उकारः, गुणः।
त्वघम्	तु + अघम्	यण्सन्धिः।
पापा ये	पापाः + ये	विसर्गसन्धिः, (लोपः)।
पचन्त्यात्मकारणात्	पचन्ति + आत्मकारणात्	यण्सन्धिः।

(ख) समासः

यज्ञशिष्टाशिनः	यज्ञस्य शिष्टम्, यज्ञशिष्टम् - षष्ठीतत्पुरुषः। यज्ञशिष्टम् अशितुं शीलं येषां ते यज्ञशिष्टाशिनः - कर्तरि णिनि उपपदसमासश्च।
सर्वकिल्बिषैः	सर्वाणि किल्बिषाणि सर्वकिल्बिषाणि, तैः - कर्मधारयः।
आत्मकारणात्	आत्मैव कारणम् आत्मकारणम्, तस्मात् - कर्मधारयः।

(ग) कृदन्तः

शिष्टम्	शिष् (शिष असर्वोपयोगे) + क्त (कर्तरि)।
सन्तः	अस् (अस - भुवि) + शतृ (कर्तरि)।

भावस्पष्टीकरणम् -

मुच्यन्ते ।	
कै: मुच्यन्ते ?	**सर्वकिल्बिषैः** मुच्यन्ते ।
के सर्वकिल्बिषैः मुच्यन्ते ?	**सन्तः** सर्वकिल्बिषैः मुच्यन्ते ।
कीदृशाः सन्तः सर्वकिल्बिषैः मुच्यन्ते ?	**यज्ञशिष्टाशिनः** सन्तः सर्वकिल्बिषैः मुच्यन्ते ।
पचन्ति ।	
कस्मात् पचन्ति ?	**आत्मकारणात्** पचन्ति ।
ये आत्मकारणात् पचन्ति **ते कीदृशाः** भवन्ति ?	**ये** आत्मकारणात् पचन्ति **ते भुञ्जते ।**
ये आत्मकारणात् पचन्ति ते **कीदृशाः** भुञ्जते ?	ये आत्मकारणात् पचन्ति ते **पापाः** भुञ्जते ।
ये आत्मकारणात् पचन्ति ते पापाः **किं** भुञ्जते ?	ये आत्मकारणात् पचन्ति ते पापाः **अघं** भुञ्जते ।

तात्पर्यम् - ये यज्ञशेषं भुञ्जते ते सर्वेऽपि श्रेष्ठाः पुरुषाः पापात् मुक्ताः भवन्ति । ये च पापिनः आत्मार्थं पचन्ति ते तु पापमेव भुञ्जते (अर्थात् सर्वैः सर्वमपि वस्तु भगवते समर्प्य एव भोक्तव्यम्) ।

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥३.१४॥

पदच्छेदः - अन्नात्, भवन्ति, भूतानि, पर्जन्यात्, अन्नसम्भवः ।
यज्ञात्, भवति, पर्जन्यः, यज्ञः, कर्मसमुद्भवः ॥

अन्वयः - अन्नात् भूतानि भवन्ति । पर्जन्यात् अन्नसम्भवः (भवति) । पर्जन्यः यज्ञात् भवति । यज्ञः कर्मसमुद्भवः भवति ।

पदार्थः - अन्नात् = आहारात्, भूतानि = प्राणिनः, भवन्ति = जायन्ते, पर्जन्यात् = वृष्टेः, अन्नसम्भवः = आहारोत्पत्तिः भवति, पर्जन्यः = वृष्टिः, यज्ञात् = यागात्, भवति = समुद्भवति, यज्ञः = यागः, कर्मसमुद्भवः = कर्मजन्यः (भवति) ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अन्नात्	अ. नपुं. पं. एक.	भूतानि	अ. नपुं. प्र. बहु.
भवन्ति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. बहु.	पर्जन्यात्	अ. पुं. पं. एक.

अन्नसम्भवः	अ. पुं. प्र. एक.	पर्जन्यः	अ. पुं. प्र. एक.
यज्ञात्	अ. पुं. पं. एक.	भवति	भू (भू सत्तायाम्) पर. कर्तरि लट्. प्रपु. एक.
यज्ञः	अ. पुं. प्र. एक.	कर्मसमुद्भवः	अ. पुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः

अन्नाद्भवन्ति	अन्नात् + भवन्ति	जश्त्वसन्धिः।
पर्जन्यादन्नसम्भवः	पर्जन्यात् + अन्नसम्भवः	जश्त्वसन्धिः।
यज्ञाद्भवति	यज्ञात् + भवति	जश्त्वसन्धिः।
पर्जन्यो यज्ञः	पर्जन्यः + यज्ञः	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः।

(ख) समासः

अन्नसम्भवः	अन्नस्य सम्भवः अन्नसम्भवः - षष्ठीतत्पुरुषः।
कर्मसमुद्भवः	कर्मणः समुद्भवः कर्मसमुद्भवः - पञ्चमीतत्पुरुषः।

(ग) कृदन्तः

अन्नात्	अद् (अद भक्षणे) + क्त (कर्तरि), तस्मात्।
भूतानि	भू (भू सत्तायाम्) + क्त (कर्तरि)।
सम्भवः	सम् + भू (भू सत्तायाम्) + अप्।
समुद्भवः	सम् + उद् + भू (भू सत्तायाम्) + अप् (भावे)।

भावस्पष्टीकरणम् -

भवन्ति।	
कानि भवन्ति ?	**भूतानि** भवन्ति।
कस्मात् भूतानि भवन्ति ?	**अन्नात्** भूतानि भवन्ति।
अन्नात् भूतानि भवन्ति। **ततः किम्** ?	अन्नात् भूतानि भवन्ति। **अन्नसम्भवः**।
अन्नात् भूतानि भवन्ति। **कस्मात्** अन्नसम्भवः ?	अन्नात् भूतानि भवन्ति। **पर्जन्यात्** अन्नसम्भवः।
अन्नात् भूतानि भवन्ति। पर्जन्यात् अन्नसम्भवः। **कस्मात्** पर्जन्यः भवति ?	अन्नात् भूतानि भवन्ति। पर्जन्यात् अन्नसम्भवः। **यज्ञात्** पर्जन्यः भवति।
अन्नात् भूतानि भवन्ति। पर्जन्यात् अन्नसम्भवः। यज्ञात् पर्जन्यः भवति। यज्ञः **कीदृशः** ?	अन्नात् भूतानि भवन्ति। पर्जन्यात् अन्नसम्भवः। यज्ञात् पर्जन्यः भवति। यज्ञः **कर्मसमुद्भवः**।

तात्पर्यम् - प्राणिनः आहारात् उत्पद्यन्ते। आहारः वृष्टेः भवति। वृष्टिः यज्ञात् भवति। यज्ञः कर्मणः समुद्भवति (अतः कर्माणि कर्तव्यानि येन सर्वः अपि सृष्टिक्रमः सुष्ठु चलेत्)।

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम्।
तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्॥३.१५॥

पदच्छेदः - कर्म, ब्रह्मोद्भवम्, विद्धि, ब्रह्माक्षरसमुद्भवम्।
तस्मात्, सर्वगतम्, ब्रह्म, नित्यम्, यज्ञे, प्रतिष्ठितम्॥

अन्वयः - कर्म ब्रह्मोद्भवं विद्धि। ब्रह्म-अक्षरसमुद्भवं विद्धि। तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्।

पदार्थः - कर्म = यागादिकं कर्म, ब्रह्मोद्भवम् = वेदात् उत्पन्नम्, विद्धि = जानीहि, ब्रह्म-अक्षरसमुद्भवम् = वेदः ईश्वरात् समुत्पन्नः (इति विद्धि), तस्मात् = अतः, सर्वगतम् = सर्वव्यापी, ब्रह्म = परमात्मा, नित्यम् = सदा, यज्ञे = यागे, प्रतिष्ठितम् = स्थिरतया स्थितः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)	ब्रह्मोद्भवम्	अ. नपुं. द्वि. एक. (विशेषणम्)
विद्धि	विद् (विद - ज्ञाने) पर. कर्तरि लोट्. मपु. एक.	ब्रह्माक्षरसमुद्भवम्	ब्रह्माक्षरसमुद्भव - अ. नपुं. प्र. एक.
तस्मात्	तद्- द. नपुं. पं. एक. (विशेषणम्)	सर्वगतम्	अ. नपुं. प्र. एक. (विशेषणम्)
ब्रह्म	ब्रह्मन्- न. नपुं. प्र. एक. (विशेष्यम्)	नित्यम्	अ. नपुं. द्वि. एक. क्रियाविशेषणम्
यज्ञे	अ. पुं. स. एक.	प्रतिष्ठितम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः ब्रह्माक्षरसमुद्भवम्	ब्रह्म + अक्षरसमुद्भवम्	सवर्णदीर्घसन्धिः।
(ख) समासः ब्रह्मोद्भवम्	ब्रह्मणः उद्भवं ब्रह्मोद्भवम्, तत् - पञ्चमीतत्पुरुषः।	
अक्षरसमुद्भवम्	न क्षरम् अक्षरम् - नञ्तत्पुरुषः।	
	अक्षरात् समुद्भवम् अक्षरसमुद्भवम् - पञ्चमीतत्पुरुषः।	
सर्वगतम्	सर्वं गतं सर्वगतम् - द्वितीयातत्पुरुषः।	
(ग) कृदन्तः क्षरम्	क्षर् (क्षर सञ्चलने) अच् (पचाद्यच्)।	
गतम्	गम् (गम्लृ गतौ) + क्त (कर्मणि)।	
उद्भवम्	उद् + भू (भू सत्तायाम्) + अच् (कर्तरि)। उद्भवतीति उद्भवम्।	
(ग) तद्धितान्तः प्रतिष्ठितम्	प्रतिष्ठा + इतच्, प्रतिष्ठा अस्य संजाता	

भावस्पष्टीकरणम् -

प्रतिष्ठितम् ।	
किं प्रतिष्ठितम् ?	**ब्रह्म** प्रतिष्ठितम् ।
कीदृशं ब्रह्म प्रतिष्ठितम् ?	**सर्वगतं** ब्रह्म प्रतिष्ठितम् ।
सर्वगतं ब्रह्म **कुत्र** प्रतिष्ठितम् ?	सर्वगतं ब्रह्म **यज्ञे** प्रतिष्ठितम् ।
सर्वगतं ब्रह्म **कदा** यज्ञे प्रतिष्ठितम् ?	सर्वगतं ब्रह्म **नित्यं** यज्ञे प्रतिष्ठितम् ।
कस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ?	**विद्धि । तस्मात्** सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ।
किं विद्धि । तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ?	**कर्म** विद्धि । तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ।
कर्म **कीदृशं** विद्धि । तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ?	कर्म **ब्रह्मोद्भवं** विद्धि । तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ।
कर्म ब्रह्मोद्भवम् । **पुनश्च किं** विद्धि । तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ?	कर्म ब्रह्मोद्भवम् । **ब्रह्म** विद्धि । तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ।
कर्म ब्रह्मोद्भवम् । ब्रह्म **कीदृशं** विद्धि । तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ?	कर्म ब्रह्मोद्भवम् । ब्रह्म **अक्षरसमुद्भवं** विद्धि । तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ।

तात्पर्यम् - वेदात् कर्म उत्पन्नम् । परमात्मनः वेदः उत्पन्नोऽस्ति । अतः सर्वव्यापी भगवान् सदा यज्ञे तिष्ठति (अतः अस्माभिः यज्ञकर्म कार्यम् अनेन कर्मणा मुक्तिं प्राप्तुं शक्यते) ।

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥३.१६॥

पदच्छेदः - एवम्, प्रवर्तितम्, चक्रम्, न, अनुवर्तयति, इह, यः ।
अघायुः, इन्द्रियारामः, मोघम्, पार्थ, सः, जीवति ॥

अन्वयः - पार्थ ! यः एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति इन्द्रियारामः अघायुः सः मोघं जीवति ।

पदार्थः - पार्थ = अर्जुन ! यः = यः पुरुषः, इह = अस्मिन् लोके, एवम् = इत्थम्, प्रवर्तितम् = निर्मितम्, चक्रम् = कर्मचक्रम्, न अनुवर्तयति = न अनुसरति, इन्द्रियारामः = इन्द्रियेषु रममाणः, अघायुः = पापी जनः, सः = सः पुरुषः, मोघम् = वृथा, जीवति = प्राणिति ।

पदपरिचयः -

पदम्	**विवरणम्**	**पदम्**	**विवरणम्**
पार्थ	अ. पुं. सम्बो. एक.	यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)

एवम्	अव्ययम्	प्रवर्तितम्	अ. नपुं. द्वि. एक. (विशेषणम्)
चक्रम्	अ. नपुं. द्वि. एक. (विशेष्यम्)	इह	अव्ययम्
न	अव्ययम्	अनुवर्तयति	अनु + वृत् (वृतु वर्तने) + णिच्, पर. कर्तरि लट्. प्रपु. एक.
इन्द्रियारामः	अ. पुं. प्र. एक.	अघायुः	अघायुस्- सका. पुं. प्र. एक.
सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	मोघम्	अव्ययम्
जीवति	जीव् (जीव प्राणधारणे) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	नानुवर्तयति	न + अनुवर्तयति	सवर्णदीर्घसन्धिः ।
	अनुवर्तयतीह	अनुवर्तयति + इह	सवर्णदीर्घसन्धिः ।
	अघायुरिन्द्रियारामः	अघायुः + इन्द्रियारामः	विसर्गसन्धिः (रेफः) ।
	इन्द्रियारामो मोघम्	इन्द्रियारामः + मोघम्	विसर्गसन्धिः (सकारः), रेफः, उकारः, गुणः ।
	स जीवति	सः + जीवति	विसर्गसन्धिः (लोपः) ।

(ख) समासः	अघायुः	अघम् (पापम्) आयुः यस्य सः अघायुः - बहुव्रीहिः ।
	इन्द्रियारामः	इन्द्रियैः आरामः इन्द्रियारामः - तृतीयातत्पुरुषः ।
(ग) कृदन्तः	प्रवर्तितम्	प्र + वृत् (वृतु वर्तने) + णिच् + क्त (कर्मणि), तत् ।
	आरामः	आ + रम् (रमु क्रीडायाम्) + घञ् (कर्तरि बहुलम्) ।
	मोघम्	मुह् (मुह वैचित्त्ये) + घञ् ।
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे) पृथायाः अपत्यं पुमान् पार्थः, तत्सम्बुद्धौ ।

भावस्पष्टीकरणम् -

न अनुवर्तयति ।	
किं न अनुवर्तयति ?	**चक्रं** न अनुवर्तयति ।
कीदृशं चक्रं न अनुवर्तयति ?	**प्रवर्तितं** चक्रं न अनुवर्तयति ।
कथं प्रवर्तितं चक्रं न अनुवर्तयति ?	**एवं** प्रवर्तितं चक्रं न अनुवर्तयति ।
एवं प्रवर्तितं चक्रं **कुत्र** न अनुवर्तयति ?	एवं प्रवर्तितं चक्रम् **इह** न अनुवर्तयति ।

एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति। **सः कीदृशः भवति** ?	एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति। **सः जीवति।**
एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति। सः **कथं** जीवति ?	एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति। सः **मोघं** जीवति।
एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति। **कीदृशः** सः मोघं जीवति ?	एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति। **अघायुः** सः मोघं जीवति।
एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति। अघायुः **पुनश्च कीदृशः** सः मोघं जीवति ?	एवं प्रवर्तितं चक्रम् इह न अनुवर्तयति। अघायुः **इन्द्रियारामः** सः मोघं जीवति।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - यः मनुष्यः अस्मिन् लोके कर्मचक्रानुगुणं नैव व्यवहरति, यः च कर्तव्यकर्म न करोति तादृशः इन्द्रियसुखलोलुपः पापी पुरुषः व्यर्थम् एव जीवति (अर्थात् तस्य जीवनस्य किमपि प्रयोजनम् एव नास्ति। मोक्षार्थं तु कर्तव्यकर्म कुर्यादेव, तदा एव मनुष्यजन्मनः फलम्)।

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते॥३.१७॥

पदच्छेदः - यः, तु, आत्मरतिः, एव, स्यात्, आत्मतृप्तः, च, मानवः।
आत्मनि, एव, च, सन्तुष्टः, तस्य, कार्यम्, न, विद्यते॥

अन्वयः - यः मानवः तु आत्मरतिः एव आत्मतृप्तः आत्मनि एव सन्तुष्टः च स्यात् तस्य कार्यं न विद्यते।

पदार्थः - यः मानवः तु = यः मनुष्यः, आत्मरतिः एव = आत्मनि प्रीतिमान्, आत्मतृप्तः च = आत्मनि तृप्तिमान्, आत्मनि एव = स्वस्मिन् एव, सन्तुष्टः = प्रसन्नः, स्यात् = भवेत्, तस्य = तादृशस्य मनुष्यस्य, कार्यम् = कर्तव्यम्, न विद्यते = नास्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	मानवः	अ. पुं. प्र. एक. (विशेष्यम्)
तु	अव्ययम्	आत्मरतिः	इ. पुं. प्र. एक.
एव	अव्ययम्	आत्मतृप्तः	अ. पुं. प्र. एक. (विशेषणम्)

आत्मनि	आत्मन्- न. पुं. स. एक.	सन्तुष्टः	अ. पुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	स्यात्	अस् (अस भुवि) पर. कर्तरि विधिलिङ्. प्रपु. एक.
तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)	कार्यम्	अ. नपुं. प्र. एक.
न	अव्ययम्	विद्यते	विद् (विद सत्तायाम्) आत्म. कर्मणि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यस्तु	यः + तु	विसर्गसन्धि (सकारः) ।
	त्वात्मरतिः	तु + आत्मरतिः	यण्सन्धिः ।
	आत्मरतिरेव	आत्मरतिः + एव	विसर्गसन्धिः (रेफः) ।
	स्यादात्मतृप्तः	स्यात् + आत्मतृप्तः	जश्त्वसन्धिः ।
	आत्मतृप्तश्च	आत्मतृप्तः + च	विसर्गसन्धिः (सकारः) श्चुत्वसन्धिः ।
	आत्मन्येव	आत्मनि + एव	यण्सन्धिः ।
	सन्तुष्टस्तस्य	सन्तुष्टः + तस्य	विसर्गसन्धिः (सकारः) ।
(ख) समासः	आत्मरतिः	आत्मनि एव रतिः यस्य सः आत्मरतिः - बहुव्रीहिः ।	
	आत्मतृप्तः	आत्मनि एव तृप्तः आत्मतृप्तः - सप्तमीतत्पुरुषः ।	
(ग) कृदन्तः	रतिः	रम् (रमु क्रीडायाम्) + क्तिन् ।	
	तृप्तः	तृप् (तृप प्रीणने) + क्त (कर्तरि) ।	
	सन्तुष्टः	सम् + तुष् (तुष प्रीतौ) + क्त (कर्तरि) ।	
	कार्यम्	कृ (डुकृञ् करणे) + ण्यत् (कर्मणि) ।	
(घ) तद्धितान्तः	मानवः	मनु + अण् (अपत्यार्थे) । मनोः अपत्यं पुमान् ।	

भावस्पष्टीकरणम् -

स्यात् ।	
कः स्यात् ?	**मानवः** स्यात् ।
मानवः **कीदृशः** स्यात् ?	मानवः **आत्मरतिः एव** स्यात् ।
मानवः आत्मरतिः एव **पुनश्च कीदृशः** स्यात् ?	मानवः आत्मरतिः एव **आत्मतृप्तश्च** स्यात् ।
मानवः आत्मरतिः एव आत्मतृप्तश्च **पुनश्च कीदृशः** स्यात् ?	मानवः आत्मरतिः एव आत्मतृप्तः **सन्तुष्टश्च** स्यात् ।

मानवः आत्मरतिः एव आत्मतृप्तः **कस्मिन्** सन्तुष्टश्च स्यात् ?	मानवः आत्मरतिः एव आत्मतृप्तः **आत्मनि एव** सन्तुष्टश्च स्यात् ।
मानवः आत्मरतिः एव आत्मतृप्तः आत्मनि एव सन्तुष्टश्च स्यात् । **तस्य किं भवति** ?	मानवः आत्मरतिः एव आत्मतृप्तः आत्मनि एव सन्तुष्टश्च स्यात् । **तस्य न विद्यते** ।
मानवः आत्मरतिः एव आत्मतृप्तः आत्मनि एव सन्तुष्टश्च स्यात् । तस्य **किं** न विद्यते ?	मानवः आत्मरतिः एव आत्मतृप्तः आत्मनि एव सन्तुष्टश्च स्यात् । तस्य **कार्यं** न विद्यते ।

तात्पर्यम् - यः मनुष्यः आत्मप्रियः, आत्मतृप्तः, आत्मप्रसन्नः च भवति तस्य कर्तव्यं नास्ति । (अर्थात् यः आत्मनि कृष्णस्य दर्शनं करोति सः एव आत्मप्रियः आत्मतृप्तः आत्मप्रसन्नः कृष्णचित्तः च भवति । तस्य अन्यत् कर्तव्यं नास्ति ।)

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥३.१८॥

पदच्छेदः - न, एव, तस्य, कृतेन, अर्थः, न, अकृतेन, इह, कश्चन ।
न, च, अस्य, सर्वभूतेषु, कश्चित्, अर्थव्यपाश्रयः ॥

अन्वयः - इह तस्य कृतेन (कर्मणा) अकृतेन कश्चन अर्थः न एव । अस्य च सर्वभूतेषु कश्चित् अर्थव्यपाश्रयः न ।

पदार्थः - इह = अस्मिन् लोके, तस्य = आत्मरतस्य पुरुषस्य, कृतेन = विहितेन (कर्मणा), अकृतेन = अविहितेन (कर्मणा), कश्चन = कोऽपि, अर्थः एव = प्रयोजनम् एव, न = नास्ति, अस्य = अस्य पुरुषस्य, सर्वभूतेषु = सर्वप्राणिषु, कश्चित् = कश्चन, अर्थव्यपाश्रयः च = प्रयोजनसम्बन्धः अपि, न = नास्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
इह	अव्ययम्	तस्य	तद्- द. सर्व. पुं. ष. एक. (विशेषणम्)
कृतेन	अ. नपुं. तृ. एक. (विशेषणम्)	अकृतेन	अ. नपुं. तृ. एक. (विशेषणम्)
कश्चन	अव्ययम्	अर्थः	अ. पुं. प्र. एक.
न	अव्ययम्	एव	अव्ययम्
अस्य	इदम्- म. सर्व. पुं. ष. एक. (विशेषणम्)	च	अव्ययम्
सर्वभूतेषु	अ. पुं. स. एक.	कश्चित्	अव्ययम्
अर्थव्यपाश्रयः	अ. पुं. प्र. एक.		

व्याकरणम् -

(क) सन्धिः	नैव	न + एव	वृद्धिसन्धिः ।
	कृतेनार्थः	कृतेन + अर्थः	सवर्णदीर्घसन्धिः ।
	अर्थो न	अर्थः + न	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः ।
	नाकृतेन	न + अकृतेन	सवर्णदीर्घसन्धिः ।
	अकृतेनेह	अकृतेन + इह	गुणसन्धिः ।
	चास्य	च + अस्य	सवर्णदीर्घसन्धिः ।
	कश्चिदर्थव्यपाश्रयः	कश्चित् + अर्थव्यपाश्रयः	जश्त्वसन्धिः ।
(ख) समासः	अकृतेन	न कृतम् अकृतम्, तेन - नञ्तत्पुरुषः ।	
	अर्थव्यपाश्रयः	अर्थाय व्यपाश्रयः अर्थव्यपाश्रयः - चतुर्थीतत्पुरुषः ।	
	सर्वभूतेषु	सर्वाणि च तानि भूतानि सर्वभूतानि, तेषु - कर्मधारयः ।	
(ग) कृदन्तः	कृतेन	कृ (डुकृञ् करणे) + क्त (कर्मणि), तेन ।	
	भूतेषु	भू (भू सत्तायाम्) + क्त (कर्तरि), तेषु ।	
	व्यपाश्रयः	वि + अप + आङ् + श्रि (श्रिञ् सेवायाम्) अच् (कर्तरि) ।	

भावस्पष्टीकरणम् -

अर्थः न एव ।	
कस्य अर्थः न एव ?	**तस्य** अर्थः न एव ।
तस्य **कः** अर्थः न एव ?	तस्य **कश्चन** अर्थः न एव ।
तस्य **केन** कश्चन अर्थः न एव ?	तस्य **कृतेन** (कर्मणा) कश्चन अर्थः न एव ।
तस्य कृतेन (कर्मणा) कश्चन अर्थः नैव **पुनश्च किम्** ?	तस्य कृतेन (कर्मणा) कश्चन अर्थः नैव **अकृतेनापि** (कर्मणा) **न** ।
तस्य कृतेन (कर्मणा) कश्चन अर्थः नैव, अकृतेनापि (कर्मणा) न, **पुनश्च किम्** ?	तस्य कृतेन (कर्मणा) कश्चन अर्थः नैव अकृतेनापि (कर्मणा) न, **अस्य न अर्थव्यपाश्रयः** ।
तस्य कृतेन (कर्मणा) कश्चन अर्थः नैव अकृतेनापि (कर्मणा) न, अस्य **कः** न अर्थव्यपाश्रयः ?	तस्य कृतेन (कर्मणा) कश्चन अर्थः नैव अकृतेनापि (कर्मणा) न, अस्य **कश्चित्** न अर्थव्यपाश्रयः ।
तस्य कृतेन (कर्मणा) कश्चन अर्थः नैव अकृतेनापि (कर्मणा) न, अस्य **केषु** कश्चित् न अर्थव्यपाश्रयः ?	तस्य कृतेन (कर्मणा) कश्चन अर्थः नैव अकृतेनापि (कर्मणा) न, अस्य **सर्वभूतेषु** कश्चित् न अर्थव्यपाश्रयः ।

तात्पर्यम् - आत्मतृप्तस्य पुरुषस्य कृतेन कर्मणा अकृतेन कर्मणा च प्रयोजनं नास्ति। प्राणिषु केनापि सह तस्य प्रयोजनस्य हेतोः सम्बन्धोऽपि नास्ति (अर्थात् तस्य सम्बन्धः भगवता सह अस्ति। सः आत्मानं भगवते समर्पितवान्)।

तस्मादसक्तः सततं कार्यं कर्म समाचर।
असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः ॥३.१९॥

पदच्छेदः - तस्मात्, असक्तः, सततम्, कार्यम्, कर्म, समाचर।
असक्तः, हि, आचरन्, कर्म, परम्, आप्नोति, पूरुषः ॥

अन्वयः - तस्मात् असक्तः सततं कार्यं कर्म समाचर। असक्तः हि कर्म आचरन् पूरुषः परम् आप्नोति।

पदार्थः - तस्मात् = अतः, असक्तः = निस्सङ्गः, सततम् = सर्वदा, कार्यम् = आचरणयोग्यम्, कर्म = कर्म, समाचर = कुरु, असक्तः = सङ्गरहितः, हि = यस्मात्, कर्म = कर्म, आचरन् = कुर्वन्, पूरुषः = मानवः, परम् = परं धाम, आप्नोति = प्राप्नोति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
तस्मात्	तद्- द. सर्व. पुं. पं. एक. (विशेषणम्)	असक्तः	अ. पुं. प्र. एक.
सततम्	अव्ययम्	कार्यम्	अ. नपुं. द्वि. एक. (विशेषणम्)
कर्म	कर्मन्- न. नपुं. द्वि. एक. (विशेष्यम्)	समाचर	सम् + आ + चर् (चर गतिभक्षणयोः) पर. कर्तरि लोट्. मपु. एक.
असक्तः	अ. पुं. प्र. एक. (विशेषणम्)	हि	अव्ययम्
कर्म	कर्मन्- न. नपुं. द्वि. एक.	आचरन्	आचरत्- त. पुं. प्र. एक. (विशेषणम्)
पूरुषः	अ पुं. प्र. एक. (विशेष्यम्)	परम्	अव्ययम्
आप्नोति	आप् (आप्लृ व्याप्तौ) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः
- तस्मादसक्तः — तस्मात् + असक्तः — जश्त्वसन्धिः।
- असक्तो हि — असक्तः + हि — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
- ह्याचरन् — हि + आचरन् — यण्सन्धिः।

(ख) समासः असक्तः — न सक्तः असक्तः - नञ्तत्पुरुषः।

(ग) कृदन्तः सक्तः सञ्ज् (षञ्ज सङ्गे) + क्त (कर्तरि)।
कार्यम् कृ (डुकृञ् करणे) + ण्यत् (कर्मणि)।
आचरन् आ + चर् (चर गतिभक्षणयोः) + शतृ (कर्तरि)।

भावस्पष्टीकरणम् -

समाचर।	
किं समाचर ?	**कर्म** समाचर।
कीदृशं कर्म समाचर ?	**कार्यं** कर्म समाचर।
कदा कार्यं कर्म समाचर ?	**सततं** कार्यं कर्म समाचर।
कथम्भूतः सततं कार्यं कर्म समाचर ?	**असक्तः** सततं कार्यं कर्म समाचर।
कस्मात् असक्तः सततं कार्यं कर्म समाचर ?	**तस्मात्** असक्तः सततं कार्यं कर्म समाचर।
तस्मात् असक्तः सततं कार्यं कर्म समाचर, **तेन किम्** ?	तस्मात् असक्तः सततं कार्यं कर्म समाचर, **तेन आप्नोति**।
तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन **कः** आप्नोति ?	तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन **पूरुषः** आप्नोति।
तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन **कीदृशः** पूरुषः आप्नोति ?	तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन **असक्तः** हि पूरुषः आप्नोति।
तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन असक्तः हि **किं कुर्वन्** पूरुषः आप्नोति ?	तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन असक्तः हि **आचरन्** पूरुषः आप्नोति।
तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन असक्तः हि **किम्** आचरन् पूरुषः आप्नोति ?	तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन असक्तः हि **कर्म** आचरन् पूरुषः आप्नोति।
तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन असक्तः हि कर्म आचरन् पूरुषः **किम्** आप्नोति ?	तस्मात् असक्तः सततं कार्यं कर्म समाचर, तेन असक्तः हि कर्म आचरन् पूरुषः **परम्** आप्नोति।

तात्पर्यम् - भवान् सङ्गरहितः भूत्वा कर्तव्यं कर्म आचरतु। यतः सङ्गरहितः पुरुषः कर्म आचरन् परं तत्त्वं प्राप्नोति। (अर्थात् भवान् आसक्तिं परित्यजतु, अहम्भावं निष्कास्य केवलं कर्म करोतु। अनेन भवान् परं तत्त्वं प्राप्नोति।)

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ॥३.२०॥

पदच्छेदः - कर्मणा, एव, हि, संसिद्धिम्, आस्थिताः, जनकादयः ।
लोकसङ्ग्रहम्, एव, अपि, सम्पश्यन्, कर्तुमर्हसि ॥

अन्वयः जनकादयः हि कर्मणा एव संसिद्धिम् आस्थिताः । लोकसङ्ग्रहम् अपि सम्पश्यन् (कर्म) कर्तुम् अर्हसि एव ।

पदार्थः - जनकादयः हि = जनकराजप्रभृतयः अपि, कर्मणा एव = कर्माचरणेन एव, संसिद्धिम् = साफल्यम्, आस्थिताः = प्राप्तवन्तः, लोकसङ्ग्रहम् = स्वधर्मे प्रवर्तनम् अधर्माच्च निवर्तनम्, सम्पश्यन् अपि = भावयन् अपि, कर्तुमेव = कर्म आचरितुमेव, अर्हसि = प्रभवसि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
जनकादयः	इ. पुं. प्र. बहु. (विशेष्यम्)	हि	अव्ययम्
कर्मणा	कर्मन्- न. नपुं. तृ. एक.	एव	अव्ययम्
संसिद्धिम्	इ. स्त्री. द्वि. एक.	आस्थिताः	अ. पुं. प्र. बहु. (विशेषणम्)
लोकसङ्ग्रहम्	अ. पुं. द्वि. एक.	अपि	अव्ययम्
सम्पश्यन्	सम्पश्यत्- त. पुं. प्र. एक. (विशेषणम्)	कर्तुम्	तुमुन्नन्तम् अव्ययम्
अर्हसि	अर्ह् (अर्ह पूजायाम्) पर. कर्तरि लट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः कर्मणैव — कर्मणा + एव — वृद्धिसन्धिः ।
आस्थिता जनकादयः — आस्थिताः + जनकादयः — विसर्गसन्धिः (लोपः) ।
एवापि — एव + अपि — सवर्णदीर्घसन्धिः ।

(ख) समासः जनकादयः — जनकः आदिः येषां ते जनकादयः - बहुव्रीहिः ।
लोकसङ्ग्रहम् — लोकस्य सङ्ग्रहः लोकसङ्ग्रहः - तम् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः संसिद्धिम् — सम् + सिध् (षिधु संराद्धौ) + क्तिन् (भावे) ।
आस्थिताः — आ + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।
सङ्ग्रहम् — सम् + ग्रह् (ग्रह उपादाने) + अच् (भावे), तम् ।
सम्पश्यन् — सम् + पश्य् (दृशिर् प्रेक्षणे) + शतृ (कर्तरि) ।
कर्तुम् — कृ (डुकृञ् करणे) + तुमुन् ।

भावस्पष्टीकरणम् -

आस्थिताः ।	
के आस्थिताः ?	**जनकादयः** आस्थिताः ।
जनकादयः **काम्** आस्थिताः ?	जनकादयः **संसिद्धिम्** आस्थिताः ।
जनकादयः **केन एव** संसिद्धिम् आस्थिताः ?	जनकादयः **कर्मणा एव** संसिद्धिम् आस्थिताः ।
जनकादयः कर्मणा एव संसिद्धिम् आस्थिताः । **तेन किम्** ?	जनकादयः कर्मणा एव संसिद्धिम् आस्थिताः **(तेन) अर्हसि** ।
जनकादयः कर्मणा एव संसिद्धिम् आस्थिताः । **किम्** अर्हसि ?	जनकादयः कर्मणा एव संसिद्धिम् आस्थिताः । (कर्म) **कर्तुम्** अर्हसि ।
जनकादयः कर्मणा एव संसिद्धिम् आस्थिताः । **किं कुर्वन्** कर्म कर्तुम् अर्हसि ?	जनकादयः कर्मणा एव संसिद्धिम् आस्थिताः । **सम्पश्यन्** कर्म कर्तुम् अर्हसि ।
जनकादयः कर्मणा एव संसिद्धिम् आस्थिताः । **कं** सम्पश्यन् कर्म कर्तुम् अर्हसि ?	जनकादयः कर्मणा एव संसिद्धिम् आस्थिताः । **लोकसङ्ग्रहं** सम्पश्यन् कर्म कर्तुम् अर्हसि ।

तात्पर्यम् - जनकादयः ज्ञानिनः कर्माचरणेन एव सद्गतिं प्राप्तवन्तः इत्यतः भवान् अपि लोकहितदृष्ट्या कर्म कर्तुम् अर्हति । (अतः करोतु एव ।)

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥३.२१॥

पदच्छेदः - यत्, यत्, आचरति, श्रेष्ठः, तत्, तत्, एव, इतरः, जनः ।
सः, यत्, प्रमाणम्, कुरुते, लोकः, तत्, अनुवर्तते ॥

अन्वयः - `श्रेष्ठः यत् यत् आचरति (तेन) इतरः जनः तत् तत् एव आचरति । सः यत् प्रमाणं कुरुते लोकः तत् अनुवर्तते ।

पदार्थः - `श्रेष्ठः = प्रशस्तः, यत् यत् = यत् कर्म, आचरति = करोति, इतरः जनः = अन्यः पुरुषः, तत् तत् एव = तत् कर्म (आचरति), सः = श्रेष्ठः, यत् = यत्, प्रमाणम् = प्रमितिसाधनम्, कुरुते = अङ्गीकरोति, लोकः = जनः, तत् = तदेव प्रमितिसाधनम्, अनुवर्तते = अनुसरति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
श्रेष्ठः	अ. पुं. प्र. एक.	यत्	यद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)

आचरति	आ + चर् (चर गतिभक्षणयोः) पर. कर्तरि लट्. प्रपु. एक.	इतरः	अ. सर्व. पुं. प्र. एक. (विशेषणम्)
जनः	अ. पुं. प्र. एक. (विशेषणम्)	तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)
एव	अव्ययम्	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)
यत्	यद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	प्रमाणम्	अ. नपुं. द्वि. एक.
कुरुते	कृ (डुकृञ् करणे) आत्म. कर्तरि लट्. प्रपु. एक.	लोकः	अ. पुं. प्र. एक.
तत्	तद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	अनुवर्तते	अनु + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	यद्यदाचरति	यत् + यत् + आचरति	जश्त्वसन्धिः।
	श्रेष्ठस्तत्	श्रेष्ठः + तत्	विसर्गसन्धिः (सकारः)।
	तदेव	तत् + एव	जश्त्वसन्धिः।
	एवेतरः	एव + इतरः	गुणसन्धिः।
	इतरो जनः	इतरः + जनः	विसर्गसन्धिः (सकारः), रेफः, उकारः, गुणः।
	स यत्	सः + यत्	विसर्गसन्धिः (लोपः)।
	लोकस्तत्	लोकः + तत्	विसर्गसन्धिः (सकारः)।
	तदनुवर्तते	तत् + अनुवर्तते	जश्त्वसन्धिः।
(ख) कृदन्तः	जनः	जन् (जनी प्रादुर्भावे) + अच्।	
	प्रमाणम्	प्र + मा (माङ् माने शब्दे च) + ल्युट्। (करणे) प्रमीयते (ज्ञायते) अनेन इति प्रमाणम्।	
	लोकः	लोक् (लोकृ दर्शने) + घञ्।	
(ग) तद्धितान्तः	श्रेष्ठः	प्रशस्य + इष्ठन् (अतिशये)। ('श्र' इति आदेशः)।	

भावस्पष्टीकरणम् -

आचरति।	
कः आचरति ?	**श्रेष्ठः** आचरति।
यथा श्रेष्ठः आचरति तथैव **कः** आचरति ?	यथा श्रेष्ठः आचरति तथैव **इतरः जनः** अपि आचरति।

सः कुरुते ।	
सः **किं** कुरुते ?	सः **प्रमाणं** कुरुते ।
श्रेष्ठः यत् प्रमाणं कुरुते **कः** तथा अनुवर्तते ?	श्रेष्ठः यत् प्रमाणं कुरुते **लोकः** तथा अनुवर्तते ?

तात्पर्यम् - श्रेष्ठः पुरुषः यथा आचरणं करोति इतरे साधारणाः जनाः अपि तथैव आचरन्ति । सः यत् प्रमाणत्वेन स्वीकरोति, इतरे अपि तदेव प्रमाणत्वेन स्वीकुर्वन्ति । (अतः भवान् कर्म आचरतु सर्वेषां सन्मार्गदर्शको भवतु ।)

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥३.२२॥

पदच्छेदः - न, मे, पार्थ, अस्ति, कर्तव्यम्, त्रिषु, लोकेषु, किञ्चन ।
न, अनवाप्तम्, अवाप्तव्यम्, वर्ते, एव, च, कर्मणि ॥

अन्वयः - पार्थ ! त्रिषु लोकेषु मे किञ्चन कर्तव्यं न अस्ति । अनवाप्तम् अवाप्तव्यं च नास्ति । (तथापि) कर्मणि एव वर्ते ।

पदार्थः - पार्थ = पृथानन्दन ! त्रिषु लोकेषु = त्रिषु भुवनेषु, मे = मम, किञ्चन = किमपि, कर्तव्यम् = कर्म, नास्ति = न विद्यते, अनवाप्तम् = अलब्धम्, अवाप्तव्यम् = लब्धव्यम्, नास्ति = न वर्तते, कर्मणि एव = केवलकर्मणि, वर्ते = तिष्ठामि ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
पार्थ	अ. पुं. सम्बो. एक.	त्रिषु	इ. पुं. स. बहु. (विशेषणम्)
लोकेषु	अ. पुं. स. बहु. (विशेष्यम्)	मे	अस्मद्- द. सर्व. ष. एक.
किञ्चन	अव्ययम्	कर्तव्यम्	अ. नपुं. प्र. एक.
न	अव्ययम्	अस्ति	अस् (अस - भुवि) पर. कर्तरि लट्. प्रपु. एक.
अनवाप्तम्	अ. नपुं. प्र. एक. (विशेषणम्)	अवाप्तव्यम्	अ. नपुं. प्र. एक. (विशेषणम्)
च	अव्ययम्	कर्मणि	कर्मन्- न. नपुं. स. एक.
एव	अव्ययम्	वर्ते	वृत् (वृतु - वर्तने) आत्म. कर्तरि लट्. उपु. एक.

व्याकरणम् -

(क) सन्धिः	पार्थास्ति	पार्थ + अस्ति	सवर्णदीर्घसन्धिः ।
	नानवाप्तम्	न + अनवाप्तम्	सवर्णदीर्घसन्धिः
	वर्त एव	वर्ते + एव	यान्तवान्तादेशसन्धिः (यलोपः) प्रकृतिभावश्च ।
(ख) समासः	अनवाप्तम्	न अवाप्तम् अनवाप्तम् - नञ्तत्पुरुषः ।	
(ग) कृदन्तः	कर्तव्यम्	कृ (डुकृञ् करणे) + तव्यत् (कर्मणि) ।	
	अवाप्तम्	अव + आप् (आप्लृ व्याप्तौ) + क्त (कर्मणि) ।	
	अवाप्तव्यम्	अव + आप् (आप्लृ व्याप्तौ) + तव्यत् (कर्मणि) ।	
(घ) तद्धितान्तः	पार्थ	पृथा + अण् (अपत्यार्थे) तत्सम्बुद्धौ, पृथायाः अपत्यं पुमान् ।	

भावस्पष्टीकरणम् -

न अस्ति ।	
किं न अस्ति ?	**कर्तव्यं** न अस्ति ।
कीदृशं कर्तव्यं न अस्ति ?	**किञ्चन** कर्तव्यं न अस्ति ।
कस्य किञ्चन कर्तव्यं न अस्ति ?	**मे** किञ्चन कर्तव्यं न अस्ति ।
कुत्र मे किञ्चन कर्तव्यं न अस्ति ?	**लोकेषु** मे किञ्चन कर्तव्यं न अस्ति ।
कतिषु लोकेषु मे किञ्चन कर्तव्यं न अस्ति ?	**त्रिषु** लोकेषु मे किञ्चन कर्तव्यं न अस्ति ।
न अस्ति ।	
किं नास्ति ?	**अनवाप्तव्यं** नास्ति ।
कीदृशं च अनवाप्तव्यं नास्ति ?	**अवाप्तव्यम्** अनवाप्तव्यं च नास्ति ।
वर्ते ।	
कस्मिन् एव वर्ते ?	**कर्मणि** एव वर्ते ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ** !

तात्पर्यम् - अर्जुन ! त्रिषु लोकेषु मम किमपि कर्म नास्ति। अप्राप्तं प्राप्तव्यम् अपि नास्ति। तथापि अहं कर्मणि प्रवृत्तोऽस्मि । (अर्थात् भवान् अपि कर्मणि रतः भवतु अहमिव ।)

यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः॥३.२३॥

पदच्छेदः - यदि, हि, अहम्, न, वर्तेयम्, जातु, कर्मणि, अतन्द्रितः।
मम, वर्त्म, अनुवर्तन्ते, मनुष्याः, पार्थ, सर्वशः॥

अन्वयः - पार्थ! यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्। (तर्हि) सर्वशः मनुष्याः मम वर्त्म अनुवर्तन्ते।

पदार्थः - पार्थ = अर्जुन! यदि = चेत्, अहम् = अहम्, जातु = कदापि, कर्मणि = कर्तव्ये, अतन्द्रितः = अप्रमत्तः (जागरूकः), न वर्तेयम् = न भवेयम्, तर्हि = तस्मिन् पक्षे, सर्वशः = सर्वे, मनुष्याः = मानवाः, मम = मे, वर्त्म = मार्गम्, अनुवर्तन्ते = अनुसरन्ति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यदि	अव्ययम्	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
कर्मणि	कर्मन्- न. नपुं. स. एक.	जातु	अव्ययम्
अतन्द्रितः	अ. पुं. प्र. एक. (विशेषणम्)	न	अव्ययम्
वर्तेयम् (वर्तेय)	वृत् (वृतु वर्तने)[1] परस्मै. कर्तरि विधिलिङ्. उपु. एक.	सर्वशः	अव्ययम्
मनुष्याः	अ. पुं. प्र. बहु.	मम	अस्मद्- द. सर्व. ष. एक.
वर्त्म	वर्त्मन्- न. नपुं. द्वि. एक.	अनुवर्तन्ते	अनु + वृत् (वृतु वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु

व्याकरणम् -

(क) सन्धिः
- ह्यहम् — हि + अहम् — यण्सन्धिः।
- कर्मण्यतन्द्रितः — कर्मणि + अतन्द्रितः — यण्सन्धिः।
- वर्त्मानुवर्तन्ते — वर्त्म + अनुवर्तन्ते — सवर्णदीर्घसन्धिः।

(ख) समासः
- अतन्द्रितः — न तन्द्रितः अतन्द्रितः - नञ्तत्पुरुषः।

(ग) तद्धितान्तः
- तन्द्रितः — तन्द्रा + इतच् (तन्द्रा जाड्यम् अस्य सञ्जाता)।
- मनुष्याः — मनु + षुक् + यत् (अपत्यार्थे)। मनोः अपत्यं पुमान्।
- पार्थ — पृथा + अण् (अपत्यार्थे) तत्सम्बुद्धौ, पृथायाः अपत्यं पुमान्।
- सर्वशः — सर्व + शस् (प्रकारार्थे)।

---

1. अत्र 'वर्तेयम्' इति परस्मैपदित्वेन प्रयोगः आर्षः वर्तते। किन्तु धातुः तु आत्मनेपदी एव अस्ति।

भावस्पष्टीकरणम् -

अहं न वर्तेयम् ।	
अहं **कीदृशः** न वर्तेयम् ?	अहम् **अतन्द्रितः** न वर्तेयम् ।
अहं **कुत्र** अतन्द्रितः न वर्तेयम् ?	अहं **कर्मणि** अतन्द्रितः न वर्तेयम् ।
अहं कर्मणि **कदा** अतन्द्रितः न वर्तेयम् ?	अहं कर्मणि **जातु** अतन्द्रितः न वर्तेयम् ।
यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, **(तर्हि) किं भवति ।**	यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, **तर्हि अनुवर्तन्ते ।**
यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, तर्हि **के** अनुवर्तन्ते ?	यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, तर्हि **मनुष्याः** अनुवर्तन्ते ।
यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, तर्हि मनुष्याः **किम्** अनुवर्तन्ते ?	यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, तर्हि मनुष्याः **वर्त्म** अनुवर्तन्ते ।
यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, तर्हि मनुष्याः **कस्य** वर्त्म अनुवर्तन्ते ?	यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, तर्हि मनुष्याः **मम** वर्त्म अनुवर्तन्ते ।
यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, तर्हि **कति** मनुष्याः मम वर्त्म अनुवर्तन्ते	यदि अहं कर्मणि जातु अतन्द्रितः न वर्तेयम्, तर्हि **सर्वशः** मनुष्याः मम वर्त्म अनुवर्तन्ते ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**पार्थ !**

तात्पर्यम् - हे पार्थ ! यदि अहं कर्म न करोमि तर्हि सर्वेऽपि जनाः मम मार्गमेव अनुसरेयुः । एतेन महती हानिः भवितुम् अर्हति । (अतः अहं कर्म करोमि ।)

उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
सङ्करस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥३.२४॥

पदच्छेदः - उत्सीदेयुः, इमे, लोकाः, न, कुर्याम्, कर्म, चेत्, अहम् ।
सङ्करस्य, च, कर्ता, स्याम्, उपहन्याः, इमाः, प्रजाः ॥

अन्वयः - अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । सङ्करस्य च कर्ता स्याम् । इमाः प्रजाः उपहन्याम् ।

पदार्थः - अहम् = अहम्, कर्म = कर्तव्यम्, न कुर्यां चेत् = यदि न आचरेयम्, इमे लोकाः = एतानि भुवनानि, उत्सीदेयुः = विनश्येयुः, सङ्करस्य च = वर्णसङ्करस्य च, कर्ता = विधाता, स्याम् = भवेयम्, इमाः प्रजाः = एतान् जनान्, उपहन्याम् = विनाशयेयम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)	कर्म	कर्मन्- न. नपुं. द्वि. एक.
न	अव्ययम्	कुर्याम्	कृ (डुकृञ् करणे) पर. कर्तरि विधिलिङ्. उपु. एक.
चेत्	अव्ययम्	इमे	इदम्- म. सर्व. पुं. प्र. बहु. (विशेषणम्)
लोकाः	अ. पुं. प्र. बहु. (विशेष्यम्)	उत्सीदेयुः	उद् + सीद् (षद्लृ विशरणगत्यवसादनेषु) पर. कर्तरि विधिलिङ्. प्रपु. बहु.
सङ्करस्य	अ. पुं. ष. एक.	च	अव्ययम्
कर्ता	ऋ. पुं. प्र. एक (विशेषणम्).	स्याम्	अस् (अस भुवि) पर. कर्तरि विधिलिङ्. उपु. एक.
इमाः	इदम्- म. सर्व. स्त्री. द्वि. बहु. (विशेषणम्)	प्रजाः	आ. स्त्री. द्वि. बहु. (विशेष्यम्)
उपहन्याम्	उप + हन् (हन हिंसागत्योः) पर. कर्तरि विधिलिङ्. उपु. एक.		

व्याकरणम् -

(क) सन्धिः	उत्सीदेयुरिमे	उत्सीदेयुः + इमे	विसर्गसन्धिः (रेफः)।
	लोका न	लोकाः + न	विसर्गसन्धिः (लोपः)।
	चेदहम्	चेत् + अहम्	जश्त्वसन्धिः।
(ख) कृदन्तः	सङ्करस्य	सम् + कृ (कॄ विक्षेपे) + अप् (भावे) तस्य।	
	कर्ता	कृ (डुकृञ् करणे) + तृच् (कर्तरि)।	
	लोकाः	लोक् (लोकृ दर्शने) + घञ्।	

भावस्पष्टीकरणम् -

अहं न कुर्याम्।	
अहं **किं** न कुर्याम्?	अहं **कर्म** न कुर्याम्।
अहं कर्म न कुर्यां चेत् **किं भवति**?	अहं कर्म न कुर्यां चेत् **उत्सीदेयुः**।
अहं कर्म न कुर्यां चेत् **के** उत्सीदेयुः?	अहं कर्म न कुर्यां चेत् **लोकाः** उत्सीदेयुः।
अहं कर्म न कुर्यां चेत् **के** लोकाः उत्सीदेयुः?	अहं कर्म न कुर्यां चेत् **इमे** लोकाः उत्सीदेयुः।

अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । **पुनश्च किं भवति** ?	अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । **स्याम्** ।
अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । **कीदृशः** स्याम् ?	अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । **कर्ता** स्याम् ।
अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । **कस्य च** कर्ता स्याम् ?	अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । **सङ्करस्य च** कर्ता स्याम् ।
अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । सङ्करस्य च कर्ता स्याम् । **पुनश्च किं भवति** ?	अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । सङ्करस्य च कर्ता स्याम् । **उपहन्याम्** ।
अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । सङ्करस्य च कर्ता स्याम् । **काः** उपहन्याम् ?	अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । सङ्करस्य च कर्ता स्याम् । **प्रजाः** उपहन्याम् ।
अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । सङ्करस्य च कर्ता स्याम् । **काः** प्रजाः उपहन्याम् ?	अहं कर्म न कुर्यां चेत् इमे लोकाः उत्सीदेयुः । सङ्करस्य च कर्ता स्याम् । **इमाः** प्रजाः उपहन्याम् ।

तात्पर्यम् - यदि अहं कर्म न आचरेयं तर्हि एतानि भुवनानि नाशं प्राप्नुयुः । किञ्च अहमेव सङ्करस्य कारणं प्रजानाशकश्च भवेयम् । (अतः अहं कर्तव्यकर्म करोमि येन अहं प्रजानाशकः न भविष्यामि ।)

सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसङ्ग्रहम् ॥३.२५॥

पदच्छेदः - सक्ताः, कर्मणि, अविद्वांसः, यथा, कुर्वन्ति, भारत ।
कुर्यात्, विद्वान्, तथा, असक्तः, चिकीर्षुः, लोकसङ्ग्रहम् ॥

अन्वयः - भारत ! अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा विद्वान् असक्तः लोकसङ्ग्रहं चिकीर्षुः (कर्म) कुर्यात् ।

पदार्थः - भारत = हे भरतकुलश्रेष्ठ ! अविद्वांसः = अज्ञानिनः, कर्मणि = कर्तव्ये, सक्ताः = आसक्ताः, यथा = येन प्रकारेण, कुर्वन्ति = आचरन्ति, तथा = तेन प्रकारेण, विद्वान् = ज्ञानी, असक्तः = निस्सङ्गः, लोकसङ्ग्रहम् = स्वधर्मे प्रवर्तनम् अधर्मात् निवर्तनं च, चिकीर्षुः = कर्तुमनाः (कर्तुम् इच्छुः), कुर्यात् = (कर्म) आचरेत् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भारत	अ. पुं. सम्बो. एक.	अविद्वांसः	अविद्वस्- सका. पुं. प्र. बहु. (विशेष्यम्)

कर्मणि	कर्मन्- न. नपुं. स. एक.	सक्ताः	अ. पुं. प्र. बहु. (विशेषणम्)
यथा	अव्ययम्	कुर्वन्ति	कृ (डुकृञ् करणे) पर. कर्तरि लट्. प्रपु. बहु.
तथा	अव्ययम्	विद्वान्	विद्वस्- सका. पुं. प्र. एक. (विशेष्यम्)
असक्तः	अ. पुं. प्र. एक. (विशेषणम्)	लोकसङ्ग्रहम्	अ. पुं. द्वि. एक.
चिकीर्षुः	उ. पुं. प्र. एक.	कुर्यात्	कृ (डुकृञ् करणे) पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	कर्मण्यविद्वांसः	कर्मणि + अविद्वांसः	यण्सन्धिः ।
	अविद्वांसो यथा	अविद्वांसः + यथा	विसर्गसन्धिः (सकारः), रेफः, उकारः गुणः ।
	कुर्याद्विद्वान्	कुर्यात् + विद्वान्	जश्त्वसन्धिः ।
	विद्वांस्तथा	विद्वान् + तथा	सत्वसन्धिः रुत्वम् अनुस्वारागमः विसर्गः सत्वं च ।
	तथासक्तः	तथा + असक्तः	सवर्णदीर्घसन्धिः ।
	असक्तश्चिकीर्षुः	असक्तः + चिकीर्षुः	विसर्गसन्धिः (सकारः), श्चुत्वसन्धिः ।
	चिकीर्षुर्लोकसङ्ग्रहम्	चिकीर्षुः + लोकसङ्ग्रहम्	विसर्गसन्धिः (रेफः) ।
(ख) समासः	असक्तः	न सक्तः असक्तः - नञ्तत्पुरुषः ।	
	लोकसङ्ग्रहम्	लोकानां सङ्ग्रहः लोकसङ्ग्रहः, तम् - षष्ठीतत्पुरुषः ।	
(ग) कृदन्तः	विद्वान्	विद् (विद ज्ञाने) + शतृ (कर्तरि) । वसु इति आदेशः ।	
	सक्ताः	सञ्ज् (षञ्ज सङ्गे) क्त (कर्तरि) ।	
(घ) सन्नन्तः	चिकीर्षुः	कृ (डुकृञ् करणे) + सन् + उ (कर्तरि) ।	
(ङ) तद्धितान्तः	भारत	भरत + अण् (अपत्यार्थे), भरतस्य अपत्यं पुमान् भारतः, तत्सम्बुद्धौ ।	

भावस्पष्टीकरणम् -

कुर्वन्ति ।	
के कुर्वन्ति ?	**अविद्वांसः** कुर्वन्ति ।
अविद्वांसः **कीदृशाः** कुर्वन्ति ?	अविद्वांसः **सक्ताः** कुर्वन्ति ।
अविद्वांसः **कस्मिन्** सक्ताः कुर्वन्ति ?	अविद्वांसः **कर्मणि** सक्ताः कुर्वन्ति ।
अविद्वांसः कर्मणि सक्ताः **यथा** कुर्वन्ति **तथा किं कुर्यात्** ?	अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति **तथा (कर्म) कुर्यात् ।**

अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा **कः** कर्म कुर्यात् ?	अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा **विद्वान्** कर्म कुर्यात्।
अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा विद्वान् **कीदृशः** कर्म कुर्यात् ?	अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा विद्वान् **असक्तः** कर्म कुर्यात्।
अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा विद्वान् असक्तः **पुनश्च कीदृशः** कर्म कुर्यात् ?	अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा विद्वान् असक्तः **चिकीर्षुः** कर्म कुर्यात्।
अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा विद्वान् असक्तः **कं** चिकीर्षुः कर्म कुर्यात् ?	अविद्वांसः कर्मणि सक्ताः यथा कुर्वन्ति तथा विद्वान् असक्तः **लोकसङ्ग्रहं** चिकीर्षुः कर्म कुर्यात्।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भारत** !

तात्पर्यम् - हे अर्जुन ! कर्मणि आसक्ताः अज्ञानिनः यथा कर्म आचरन्ति तथा अनासक्तोऽपि विद्वान् लोकोद्धाराय कर्म आचरेत्। (अतः भवान् अपि कर्म कुर्यात्।)

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।
जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्॥३.२६॥

पदच्छेदः - न, बुद्धिभेदम्, जनयेत्, अज्ञानाम्, कर्मसङ्गिनाम्।
जोषयेत्, सर्वकर्माणि, विद्वान्, युक्तः, समाचरन्॥

अन्वयः - युक्तः विद्वान् (कर्म) समाचरन् कर्मसङ्गिनाम् अज्ञानां बुद्धिभेदं न जनयेत्। सर्वकर्माणि जोषयेत्।

पदार्थः - युक्तः = परमात्मनि लीनः, विद्वान् = ज्ञानी, समाचरन् = कुर्वन्, कर्मसङ्गिनाम् = कर्मासक्तानाम्, अज्ञानाम् = अविदुषाम्, बुद्धिभेदम् = संशयम्, न जनयेत् = न उत्पादयेत्, सर्वकर्माणि = सकलकर्तव्यानि, जोषयेत् = तैः सेवयेत् (यथा ते सेवन्ते तथा कुर्यात्)।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
युक्तः	अ. पुं. प्र. एक. (विशेषणम्)	विद्वान्	विद्वस्- सका. पुं. प्र. एक. (विशेष्यम्)
समाचरन्	समाचरत्- त. पुं. प्र. एक. (विशेषणम्)	कर्मसङ्गिनाम्	कर्मसङ्गिन्- न. पुं. ष. बहु. (विशेषणम्)
अज्ञानाम्	अ. पुं. ष. बहु. (विशेष्यम्)	बुद्धिभेदम्	अ. पुं. द्वि. एक.
न	अव्ययम्	जनयेत्	जन् (जनी प्रादुर्भावे) णिच्, पर. कर्तरि विधिलिङ्. प्रपु. एक.

सर्वकर्माणि	सर्वकर्मन्- न. नपुं. द्वि. एक.	जोषयेत्	जुष् (जुषी प्रीतिसेवनयोः) णिच्. पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः जनयेदज्ञानाम् जनयेत् + अज्ञानाम् जश्त्वसन्धिः ।

(ख) समासः बुद्धिभेदम् बुद्धेः भेदः बुद्धिभेदः, तम् - षष्ठीतत्पुरुषः ।

कर्मसङ्गिनाम् कर्मणि सङ्गः कर्मसङ्गः - सप्तमीतत्पुरुषः ।

कर्मसङ्गः एषाम् एषु वा अस्ति इति कर्मसङ्गिनः (मतुबर्थे इनि प्रत्ययः) तेषाम् ।

अज्ञानाम् जानन्ति इति ज्ञाः- उपपदसमासः

न ज्ञाः अज्ञाः, तेषाम् - नञ्बहुव्रीहिः ।

सर्वकर्माणि सर्वाणि कर्माणि सर्वकर्माणि - कर्मधारयः ।

(ग) कृदन्तः युक्तः युज् (युजिर् योगे) + क्तः (कर्तरि) ।

समाचरन् सम् + आ + चर् (चर गतिभक्षणयोः) + शतृ (कर्तरि) ।

भावस्पष्टीकरणम् -

न जनयेत् ।	
कः न जनयेत् ?	**विद्वान्** न जनयेत् ।
कीदृशः विद्वान् न जनयेत् ?	**युक्तः** विद्वान् न जनयेत् ।
युक्तः विद्वान् **किं कुर्वन्** न जनयेत् ?	युक्तः विद्वान् **(कर्म) समाचरन्** न जनयेत् ।
युक्तः विद्वान् कर्म समाचरन् **कं** न जनयेत् ?	युक्तः विद्वान् कर्म समाचरन् **बुद्धिभेदं** न जनयेत् ।
युक्तः विद्वान् कर्म समाचरन् **केषां** बुद्धिभेदं न जनयेत् ?	युक्तः विद्वान् कर्म समाचरन् **अज्ञानां** बुद्धिभेदं न जनयेत्
युक्तः विद्वान् कर्म समाचरन् **कीदृशानाम्** अज्ञानां बुद्धिभेदं न जनयेत् ?	युक्तः विद्वान् कर्म समाचरन् **कर्मसङ्गिनाम्** अज्ञानां बुद्धिभेदं न जनयेत् ।
युक्तः विद्वान् कर्म समाचरन् कर्मसङ्गिनाम् अज्ञानां बुद्धिभेदं न जनयेत् । **पुनश्च किं कुर्यात्** ?	युक्तः विद्वान् कर्म समाचरन् कर्मसङ्गिनाम् अज्ञानां बुद्धिभेदं न जनयेत् । **जोषयेत्** ।
युक्तः विद्वान् कर्म समाचरन् कर्मसङ्गिनाम् अज्ञानां बुद्धिभेदं न जनयेत् । **कानि** जोषयेत् ?	युक्तः विद्वान् कर्म समाचरन् कर्मसङ्गिनाम् अज्ञानां बुद्धिभेदं न जनयेत् । **सर्वकर्माणि** जोषयेत् ।

तात्पर्यम् - ज्ञानी कर्मासक्तानाम् अविदुषां भ्रान्तिं न उत्पादयेत् । स्वयं सत्कार्याणि कुर्वन् तदद्वारापि तानि कारयेत् ।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥३.२७॥

पदच्छेदः - प्रकृतेः, क्रियमाणानि, गुणैः, कर्माणि, सर्वशः।
अहङ्कारविमूढात्मा, कर्ता, अहम्, इति, मन्यते॥

अन्वयः - अहङ्कारविमूढात्मा प्रकृतेः गुणैः सर्वशः क्रियमाणानि कर्माणि कर्ता अहम् इति मन्यते।

पदार्थः - अहङ्कारविमूढात्मा = अहङ्कारविवशात्मा, प्रकृतेः = स्वभावस्य, गुणैः = देहेन्द्रियादिभिः विकारैः, सर्वशः = सर्वप्रकारेण, क्रियमाणानि = विधीयमानानि, कर्माणि = कर्माणि, कर्ता = आचरिता, अहम् इति = अहमेव इति, मन्यते = चिन्तयति।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अहङ्कारविमूढात्मा	अहङ्कारविमूढात्मन्- न. पुं. प्र. एक. (विशेषणम्)	प्रकृतेः	इ. स्त्री. ष. एक.
गुणैः	अ. पुं. तृ. बहु.	सर्वशः	अव्ययम्
क्रियमाणानि	अ. नपुं. प्र. बहु. (विशेषणम्)	कर्माणि	कर्मन्- न. नपुं. प्र. बहु. (विशेष्यम्)
कर्ता	ऋ. पुं. प्र. एक. (विशेषणम्)	अहम्	अस्मद्- द. सर्व. प्र. एक. (विशेष्यम्)
इति	अव्ययम्	मन्यते	मन् (मन ज्ञाने) आत्म. कर्तरि लट्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः कर्ताहम् — कर्ता + अहम् — सवर्णदीर्घसन्धिः।

(ख) समासः अहङ्कारविमूढात्मा — अहङ्कारेण विमूढः अहङ्कारविमूढः - तृतीयातत्पुरुषः
अहङ्कारविमूढः आत्मा यस्य सः अहङ्कारविमूढात्मा - बहुव्रीहिः।

(ग) कृदन्तः प्रकृतेः — प्र + कृ (डुकृञ् करणे) + क्तिन् (कर्तरि) तस्याः। प्रकरोति इति प्रकृतिः।
क्रियमाणानि — कृ (डुकृञ् करणे) + शानच् (कर्मणि)।
अहङ्कारः — अहम् + कृ (डुकृञ् करणे) + घञ्। (अहमिति ज्ञानं क्रियते अनेन इति)
मूढः — मुह् (मुह वैचित्त्ये) + क्त (कर्तरि)।
कर्ता — कृ (डुकृञ् करणे) + तृच्।

(घ) तद्धितान्तः सर्वशः — सर्व + शस् (प्रकारार्थे)।

भावस्पष्टीकरणम् -

मन्यते ।	
कः मन्यते ?	**अहङ्कारविमूढात्मा** मन्यते ।
अहङ्कारविमूढात्मा **किम् इति** मन्यते ?	अहङ्कारविमूढात्मा **कर्ता अहम् इति** मन्यते ।
अहङ्कारविमूढात्मा **कानि** कर्ता अहम् इति मन्यते ?	अहङ्कारविमूढात्मा **कर्माणि** कर्ता अहम् इति मन्यते ।
अहङ्कारविमूढात्मा **कीदृशानि** कर्माणि कर्ता अहम् इति मन्यते ?	अहङ्कारविमूढात्मा **क्रियमाणानि** कर्माणि कर्ता अहम् इति मन्यते ।
अहङ्कारविमूढात्मा **कैः** क्रियमाणानि कर्माणि कर्ता अहम् इति मन्यते ?	अहङ्कारविमूढात्मा **गुणैः** क्रियमाणानि कर्माणि कर्ता अहम् इति मन्यते ।
अहङ्कारविमूढात्मा गुणैः **कथं** क्रियमाणानि कर्माणि कर्ता अहम् इति मन्यते ?	अहङ्कारविमूढात्मा गुणैः **सर्वशः** क्रियमाणानि कर्माणि कर्ता अहम् इति मन्यते ।
अहङ्कारविमूढात्मा **कस्याः** गुणैः सर्वशः क्रियमाणानि कर्माणि कर्ता अहम् इति मन्यते ।	अहङ्कारविमूढात्मा **प्रकृतेः** गुणैः सर्वशः क्रियमाणानि कर्माणि कर्ता अहम् इति मन्यते ।

तात्पर्यम् - देहेन्द्रियादयः सर्वेऽपि प्रकृतेः विकारभूताः । ते एव कर्माणि कुर्वन्ति, न तु आत्मा । अयं पुनः आत्मा यदा प्रकृतिजन्येन अहङ्कारेण युक्तः भवति तदा अहमेव सर्वेषां कर्मणां कर्ता इति जानाति । (यथा भवान् चिन्तयन् अस्ति ।)

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥३.२८॥

पदच्छेदः - तत्त्ववित्, तु, महाबाहो, गुणकर्मविभागयोः ।
गुणाः, गुणेषु, वर्तन्ते, इति, मत्वा, न, सज्जते ॥

अन्वयः - महाबाहो ! गुणकर्मविभागयोः तत्त्ववित् तु गुणाः गुणेषु वर्तन्ते इति मत्वा न सज्जते ।

पदार्थः - महाबाहो = अर्जुन ! गुणकर्मविभागयोः = चक्षुरादीनाम् इन्द्रियाणां दर्शनादीनां च क्रियाणां विभागयोः, तत्त्ववित् तु = यथातथ्येन ज्ञाता पुनः, गुणाः = चक्षुरादीनि इन्द्रियाणि बुद्धिः मनश्च, गुणेषु = रूपशब्दादिषु, वर्तन्ते = विद्यन्ते, इति मत्वा = इति ज्ञात्वा, न सज्जते = आत्मा सक्तो न भवति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
महाबाहो	उ. पुं. सम्बो. एक	गुणकर्मविभागयोः	अ. पुं. स. द्विव.

तत्त्वविद्	तत्त्वविद्- द. पुं. प्र. एक.	तु	अव्ययम्
गुणाः	अ. पुं. प्र. बहु.	गुणेषु	अ. पुं. स. बहु.
वर्तन्ते	वृत् (वृतु - वर्तने) आत्म. कर्तरि लट्. प्रपु. बहु.	इति	अव्ययम्
मत्वा	क्त्वान्तम् अव्ययम्	न	अव्ययम्
सज्जते	सज्ज् (षस्ज - गतौ) आत्म. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	गुणा गुणेषु	गुणाः + गुणेषु	विसर्गसन्धिः (लोपः)।
	वर्तन्त इति	वर्तन्ते + इति	यान्तवान्तादेशसन्धिः (यलोपः) प्रकृतिभावः च।
(ख) समासः	तत्त्ववित्	तत्त्वं वेत्ति इति तत्त्ववित् - कर्तरि क्विप् उपपदसमासश्च।	
	महाबाहो	महान्तौ बाहू यस्य सः महाबाहुः, तत्सम्बुद्धौ - बहुव्रीहिः।	
	गुणकर्मविभागयोः	गुणः च कर्म च गुणकर्मणी - द्वन्द्वः। गुणकर्मणोः विभागः गुणकर्मविभागः, तयोः - षष्ठीतत्पुरुषः।	
(ग) कृदन्तः	मत्वा	मन् (मन - ज्ञाने) + क्त्वा।	

भावस्पष्टीकरणम् -

न सज्जते।	
कः न सज्जते ?	**तत्त्ववित् तु** न सज्जते।
कयोः तत्त्ववित् तु न सज्जते ?	**गुणकर्मविभागयोः** तत्त्ववित् तु न सज्जते।
गुणकर्मविभागयोः तत्त्ववित् तु **किं कृत्वा** न सज्जते ?	गुणकर्मविभागयोः तत्त्ववित् तु **इति मत्वा न सज्जते।**
गुणकर्मविभागयोः तत्त्ववित् तु **किम्** इति मत्वा न सज्जते ?	गुणकर्मविभागयोः तत्त्ववित् तु **वर्तन्ते** इति मत्वा न सज्जते।
गुणकर्मविभागयोः तत्त्ववित् तु **के** वर्तन्ते इति मत्वा न सज्जते ?	गुणकर्मविभागयोः तत्त्ववित् तु **गुणाः** वर्तन्ते इति मत्वा न सज्जते।
गुणकर्मविभागयोः तत्त्ववित् तु गुणाः **केषु** वर्तन्ते इति मत्वा न सज्जते ?	गुणकर्मविभागयोः तत्त्ववित् तु गुणाः **गुणेषु** वर्तन्ते इति मत्वा न सज्जते।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**महाबाहो !**

तात्पर्यम् - हे महाबाहो ! चक्षुःश्रोत्रादीनि ज्ञानेन्द्रियाणि, वाक्पाणिप्रभृतीनि कर्मेन्द्रियाणि, बुद्धिः मनश्च प्रकृतिजन्यानि इति गुणाः इत्युच्यन्ते। तानि च क्रमेण दर्शनश्रवणादौ वचनस्वीकारादौ अहङ्कारेण सङ्कल्पेन च प्रवर्तन्ते। न कदापि आत्मा एतेषु कर्मसु व्याप्रियते, निष्क्रियत्वात्। एवं गुणाः के, तेषां च क्रियाः काः इति ज्ञात्वा अयम् आत्मा तेभ्यः भिद्यते इति यः वस्तुस्थितिं विजानाति सः कदापि रूपशब्दादीनां दर्शनश्रवणादौ न ममतां प्राप्नोति।

प्रकृतेर्गुणसम्मूढाः सज्जन्ते गुणकर्मसु।
तानकृत्स्नविदो मन्दान्कृत्स्नविन्न विचालयेत्॥३.२९॥

पदच्छेदः - प्रकृतेः, गुणसम्मूढाः, सज्जन्ते, गुणकर्मसु।
तान्, अकृत्स्नविदः, मन्दान्, कृत्स्नवित्, न, विचालयेत्॥

अन्वयः - प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते। अकृत्स्नविदः मन्दान् तान् कृत्स्नवित् न विचालयेत्।

पदार्थः - प्रकृतेः = त्रिगुणात्मिकायाः मायायाः, गुणसम्मूढाः = सत्त्वादिगुणैः प्रकृतिभागमपि आत्मत्वेन परिकल्पयन्तः, गुणकर्मसु = चक्षुरादीन्द्रियाणां दर्शनादिषु क्रियासु, सज्जन्ते = आसक्ताः, भवन्ति, अकृत्स्नविदः = अज्ञानिनः, मन्दान् = मूढान्, तान् = तादृशान्, कृत्स्नवित् = ज्ञानी, न विचालयेत् = न भ्रामयेत्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
प्रकृतेः	इ. स्त्री. ष. एक.	गुणसम्मूढाः	अ. पुं. प्र. बहु. (विशेषणम्)
गुणकर्मसु	गुणकर्मन्- न. नपुं. स. बहु.	सज्जन्ते	सज्ज् (षस्ज गतौ) आत्म. कर्तरि लट्. प्रपु. बहु.
अकृत्स्नविदः	अकृत्स्नविद्- द. पुं. द्वि. बहु.	मन्दान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
तान्	तद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)	कृत्स्नवित्	कृत्स्नविद्- द. पुं. प्र. एक.
न	अव्ययम्	विचालयेत्	वि + चल् (चल कम्पने) णिच्, पर. कर्तरि विधिलिङ्. प्रपु. एक.

व्याकरणम् -

(क) सन्धिः प्रकृतेर्गुणसम्मूढाः प्रकृतेः + गुणसम्मूढाः विसर्गसन्धिः (रेफः)।
अकृत्स्नविदो मन्दान् अकृत्स्नविदः + मन्दान् विसर्गसन्धिः (सकारः) रेफः, उकारः गुणः।

	कृत्सविन्न	कृत्स्नवित् + न	परसवर्णसन्धिः।
(ख) समासः	गुणसम्मूढाः	गुणैः सम्मूढाः गुणसम्मूढाः - तृतीयातत्पुरुषः।	
	गुणकर्मसु	गुणानां कर्माणि गुणकर्माणि, तेषु - षष्ठीतत्पुरुषः।	
	अकृत्स्नविदः	कृत्स्नं वेत्ति इति कृत्स्नवित् - कर्तरि क्विप् उपपदसमासश्च। न कृत्स्नवित् अकृत्स्नवित्, तान् - नञ्तत्पुरुषः।	
(ग) कृदन्तः	प्रकृतेः	प्र + कृ (डुकृञ् - करणे) + क्तिन् (कर्तरि) तस्याः। प्रकरोति इति प्रकृतिः।	
	सम्मूढाः	सम् + मुह् (मुह -वैचित्ये) + क्त (कर्तरि)।	

भावस्पष्टीकरणम् -

सज्जन्ते।	
के सज्जन्ते ?	**गुणसम्मूढाः** सज्जन्ते।
कस्याः गुणसम्मूढाः सज्जन्ते ?	**प्रकृतेः** गुणसम्मूढाः सज्जन्ते।
प्रकृतेः गुणसम्मूढाः **कुत्र** सज्जन्ते ?	प्रकृतेः गुणसम्मूढाः **गुणकर्मसु** सज्जन्ते।
प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते, **तेषां किं कुर्यात्** ?	प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते, **तान् न विचालयेत्।**
प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते, तान् **कः** न विचालयेत् ?	प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते, तान् **कृत्स्नवित्** न विचालयेत्।
प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते, **कीदृशान्** तान् कृत्स्नवित् न विचालयेत् ?	प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते, **मन्दान्** तान् कृत्स्नवित् न विचालयेत्।
प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते, **पुनश्च कीदृशान्** मन्दान् तान् कृत्स्नवित् न विचालयेत् ?	प्रकृतेः गुणसम्मूढाः गुणकर्मसु सज्जन्ते, **अकृत्स्नविदः** मन्दान् तान् कृत्स्नवित् न विचालयेत्।

तात्पर्यम् - केचन प्रकृतेः गुणैः सत्त्वादिभिः मुग्धाः सन्तः तद्भागभूतम् इदम् इन्द्रियादिकमपि आत्मत्वेन परिकल्प्य तेषाम् इन्द्रियादीनां दर्शनश्रवणादौ क्रियायां प्रवर्तन्ते। वस्तुतस्तु ते मूढाः। तथापि तथा प्रवृत्तान् तान् ज्ञानी न कदापि क्रियातः विचालयेत्। (त्रिगुणात्मिकायाः मायायाः ये सत्त्वादयः गुणाः भवन्ति, तेषां गुणानां कर्मसु अर्थात् चक्षुरादीन्द्रियाणां दर्शनादिषु क्रियासु केचन जनाः आसक्ताः भवन्ति ते 'गुणसम्मूढाः' इति उच्यन्ते। तान् मन्दजनान् ज्ञानी कदापि क्रियातः न विचालयेत्।)

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३.३०॥

पदच्छेदः - मयि, सर्वाणि, कर्माणि, संन्यस्य, अध्यात्मचेतसा ।
निराशीः, निर्ममः, भूत्वा, युध्यस्व, विगतज्वरः ॥

अन्वयः - अध्यात्मचेतसा सर्वाणि कर्माणि मयि संन्यस्य निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ।

पदार्थः - अध्यात्मचेतसा = आत्मनिष्ठमनसा, सर्वाणि = निखिलानि, कर्माणि = कर्तव्यानि, मयि = भगवति, संन्यस्य = समर्प्य, निराशीः = निष्कामः, निर्ममः = ममताशून्यः, विगतज्वरः = विगतभयः, भूत्वा = स्थित्वा, युध्यस्व = युद्धं कुरु ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
अध्यात्मचेतसा	अध्यात्मचेतस्- सका. नपुं. तृ. एक.	सर्वाणि	अ. सर्व. नपुं. द्वि. बहु. (विशेषणम्)
कर्माणि	कर्मन्- न. नपुं. द्वि. बहु. (विशेष्यम्)	मयि	अस्मद्- द. सर्व. स. एक.
संन्यस्य	ल्यबन्तम् अव्ययम्	निराशीः	निराशिस्- सका. स्त्री. प्र. एक
निर्ममः	अ. पुं. प्र. एक.	विगतज्वरः	अ. पुं. प्र. एक.
भूत्वा	क्त्वान्तम् अव्ययम्	युध्यस्व	युध् (युध - सम्प्रहारे) आत्म. कर्तरि लोट्. मपु. एक.

व्याकरणम् -

(क) सन्धिः	संन्यस्याध्यात्मचेतसा	संन्यस्य + अध्यात्मचेतसा	सवर्णदीर्घसन्धिः ।
	निराशीर्निर्ममः	निराशीः + निर्ममः	विसर्गसन्धिः (रेफः) ।
	निर्ममो भूत्वा	निर्ममः + भूत्वा	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
(ख) समासः	अध्यात्मचेतसा	आत्मनि इति अध्यात्मम् - अव्ययीभावः । अध्यात्मे चेतः अध्यात्मचेतः, तेन - सप्तमीतत्पुरुषः ।	
	विगतज्वरः	विगतः ज्वरः यस्मात् सः विगतज्वरः - बहुव्रीहिः ।	
	निराशीः	निर्गता आशीः यस्मात् सः - बहुव्रीहिः ।	
	निर्ममः	निर्गतः ममः यस्मात् सः निर्ममः - बहुव्रीहिः ।	
(ग) कृदन्तः	संन्यस्य	सम् + नि + अस् (असु क्षेपणे) + ल्यप् ।	
	भूत्वा	भू (भू सत्तायाम्) + क्त्वा ।	
	विगतः	वि + गम् (गम्लृ गतौ) + क्त (कर्तरि) ।	
	ज्वरः	ज्वर् (ज्वर रोगे) + घञ् (करणे भावे वा) ।	

भावस्पष्टीकरणम् -

युध्यस्व ।	
किं कृत्वा युध्यस्व ?	**भूत्वा** युध्यस्व ।
कीदृशः भूत्वा युध्यस्व ?	**निराशीः** भूत्वा युध्यस्व ।
निराशीः **पुनश्च कीदृशो** भूत्वा युध्यस्व ?	निराशीः **निर्ममः** भूत्वा युध्यस्व ।
निराशीः निर्ममः **पुनश्च कीदृशो** भूत्वा युध्यस्व ?	निराशीः निर्ममः **विगतज्वरः** भूत्वा युध्यस्व ।
किं कृत्वा निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ?	**संन्यस्य** निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ।
कस्मिन् संन्यस्य निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ?	**मयि** संन्यस्य निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ।
कानि मयि संन्यस्य निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ?	**कर्माणि** मयि संन्यस्य निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ।
कति कर्माणि मयि संन्यस्य निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ?	**सर्वाणि** कर्माणि मयि संन्यस्य निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ।
केन सर्वाणि कर्माणि मयि संन्यस्य निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ?	**अध्यात्मचेतसा** सर्वाणि कर्माणि मयि संन्यस्य निराशीः निर्ममः विगतज्वरः भूत्वा युध्यस्व ।

तात्पर्यम् - भवान् आत्मनि एव मनः स्थापयन् सर्वकर्माणि भगवते समर्प्य आशारहितः ममताशून्यः विगतभयश्च भूत्वा युद्धं करोतु ।

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः ॥३.३१॥

पदच्छेदः - ये, मे, मतम्, इदम्, नित्यम्, अनुतिष्ठन्ति, मानवाः ।
श्रद्धावन्तः, अनसूयन्तः मुच्यन्ते, ते, अपि, कर्मभिः ॥

अन्वयः - ये मानवाः मे इदं मतं नित्यम् अनुतिष्ठन्ति, अनसूयन्तः श्रद्धावन्तः ते अपि कर्मभिः मुच्यन्ते ।

पदार्थः - ये मानवाः = ये मनुष्याः, मे = मम, इदम् = एतत्, मतम् = अभिप्रायम्, अनुतिष्ठन्ति = आचरन्ति, अनसूयन्तः = असूयारहिताः, श्रद्धावन्तः = श्रद्धालवः, ते अपि = ते अपि, कर्मभिः = कर्मबन्धनात्, मुच्यन्ते = मुक्ताः भवन्ति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	मानवाः	अ. पुं. प्र. बहु. (विशेष्यम्)
मे	अस्मद्- द. सर्व. ष. एक.	इदम्	इदम्- म. सर्व. नपुं. द्वि. एक. (विशेषणम्)
मतम्	अ. नपुं. द्वि. एक. (विशेषणम्)	नित्यम्	अ. नपुं. द्वि. एक. (क्रियाविशेषणम्)
अनुतिष्ठन्ति	अनु + तिष्ठ (ष्ठा गतिनिवृत्तौ) पर. कर्तरि लट्. प्रपु. बहु.	अनसूयन्तः	अनुसूयत्- त. पुं. प्र. बहु. (विशेषणम्)
श्रद्धावन्तः	श्रद्धावत्- त. पुं. प्र. बहु. (विशेषणम्)	ते	तद्- द. सर्व. पुं. प्र. बहु.
अपि	अव्ययम्	कर्मभिः	कर्मन्- न. नपुं. तृ. बहु.
मुच्यन्ते	मुच् (मुच्लृ मोक्षणे) आत्म. कर्तरि लट्. प्रपु. बहु.		

व्याकरणम् -

(क) सन्धिः

श्रद्धावन्तोऽनसूयन्तः	श्रद्धावन्तः + अनसूयन्तः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
अनसूयन्तो मुच्यन्ते	अनसूयन्तः + मुच्यन्ते	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
तेऽपि	ते + अपि	पूर्वरूपसन्धिः ।

(ख) समासः अनसूयन्तः — न असूयन्तः अनसूयन्तः - नञ्तत्पुरुषः ।

(ग) कृदन्तः असूयन्तः — अस् (असु उपतापे) + शतृ (कर्तरि) ।

मतम् — मन् (मन ज्ञाने) + क्त (कर्तरि) ।

(घ) तद्धितान्तः श्रद्धावन्तः — श्रद्धा + मतुप् । श्रद्धा एषाम् एषु वा अस्ति ।

भावस्पष्टीकरणम् -

अनुतिष्ठन्ति ।	
के अनुतिष्ठन्ति ?	**मानवाः** अनुतिष्ठन्ति ।
मानवाः **किम्** अनुतिष्ठन्ति ?	मानवाः **मतम्** अनुतिष्ठन्ति ।
मानवाः **किं** मतम् अनुतिष्ठन्ति ?	मानवाः **इदं** मतम् अनुतिष्ठन्ति ।
मानवाः **कस्य** इदं मतम् अनुतिष्ठन्ति ?	मानवाः **मे** इदं मतम् अनुतिष्ठन्ति ।
मानवाः मे इदं मतं **कदा** अनुतिष्ठन्ति ?	मानवाः मे इदं मतं **नित्यम्** अनुतिष्ठन्ति ।

मानवाः मे इदं मतं नित्यम् अनुतिष्ठन्ति। **ते कीदृशाः भवन्ति** ?	मानवाः मे इदं मतं नित्यम् अनुतिष्ठन्ति। **ते मुच्यन्ते।**
मानवाः मे इदं मतं नित्यम् अनुतिष्ठन्ति। **कीदृशाः** ते मुच्यन्ते ?	मानवाः मे इदं मतं नित्यम् अनुतिष्ठन्ति। **श्रद्धावन्तः** ते मुच्यन्ते।
मानवाः मे इदं मतं नित्यम् अनुतिष्ठन्ति। श्रद्धावन्तः **पुनश्च कीदृशाः** ते मुच्यन्ते ?	मानवाः मे इदं मतं नित्यम् अनुतिष्ठन्ति। श्रद्धावन्तः **अनसूयन्तः** ते मुच्यन्ते।
मानवाः मे इदं मतं नित्यम् अनुतिष्ठन्ति। श्रद्धावन्तः अनसूयन्तः ते **कैः** मुच्यन्ते ?	मानवाः मे इदं मतं नित्यम् अनुतिष्ठन्ति। श्रद्धावन्तः अनसूयन्तः ते **कर्मभिः** मुच्यन्ते।

तात्पर्यम् - ये मानवाः मम अभिप्रायानुगुणम् असूयां विना श्रद्धया च व्यवहरन्ति, ते मानवाः सर्वकर्मभिः मुक्ताः भवन्ति।

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्वज्ञानविमूढांस्तान्विद्धि नष्टानचेतसः ॥३.३२॥

पदच्छेदः - ये, तु, एतत्, अभ्यसूयन्तः, न, अनुतिष्ठन्ति, मे, मतम्।
सर्वज्ञानविमूढान्, तान्, विद्धि, नष्टान्, अचेतसः ॥

अन्वयः - ये तु अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति सर्वज्ञानविमूढान् अचेतसः तान् नष्टान् विद्धि।

पदार्थः - ये तु = ये मनुष्याः, अभ्यसूयन्तः = असूयाविष्टाः सन्तः, मे = मम, एतन्मतम् = इदम् इष्टम्, न अनुतिष्ठन्ति = न पालयन्ति, सर्वज्ञानविमूढान् = सकलज्ञानशून्यान्, अचेतसः = अविवेकिनः, तान् = तान् मानवान्, नष्टान् = नाशं गतान्, विद्धि = जानीहि।

पदपरिचयः -

पदम्	**विवरणम्**	**पदम्**	**विवरणम्**
ये	यद्- द. सर्व. पुं. प्र. बहु. (विशेषणम्)	तु	अव्ययम्
अभ्यसूयन्तः	अभ्यसूयत्- त. पुं. प्र. बहु. (विशेषणम्)	मे	अस्मद्- द. सर्व. ष. एक.
एतत्	एतद्- द. सर्व. नपुं. द्वि. एक. (विशेषणम्)	मतम्	अ. नपुं. द्वि. एक. (विशेष्यम्)
न	अव्ययम्	अनुतिष्ठन्ति	अनु + तिष्ठ (ष्ठा गतिनिवृत्तौ) पर. कर्तरि लट्. प्रपु. बहु.
सर्वज्ञान-विमूढान्	अ. पुं. द्वि. बहु. (विशेषणम्)	अचेतसः	अचेतस्- सका. पुं. द्वि. बहु. (विशेष्यम्)

तान्	तद्- द. सर्व. पुं. द्वि. बहु. (विशेषणम्)	नष्टान्	अ. पुं. द्वि. बहु. (विशेष्यम्)
विद्धि	विद् (विद ज्ञाने) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	त्वेतत्	तु + एतत्	यण्सन्धिः ।
	एतदभ्यसूयन्तः	एतत् + अभ्यसूयन्तः	जश्त्वसन्धिः ।
	अभ्यसूयन्तो न	अभ्यसूयन्तः + न	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	नानुतिष्ठन्ति	न + अनुतिष्ठन्ति	सवर्णदीर्घसन्धिः ।
	सर्वज्ञानविमूढांस्तान्	सर्वज्ञानविमूढान् + तान्	सत्वसन्धिः, रुत्वम्, अनुस्वारागमः, विसर्गः सत्वं च ।

(ख) समासः	सर्वज्ञानविमूढान्	सर्वाणि ज्ञानानि सर्वज्ञानानि - कर्मधारयः। सर्वज्ञानेषु विमूढाः सर्वज्ञानविमूढाः, तान् - सप्तमीतत्पुरुषः ।
	अचेतसः	नास्ति चेतः येषां ते अचेतसः, तान् - बहुव्रीहिः ।
(ग) कृदन्तः	अभ्यसूयन्तः	अभि + असू (असु उपतापे) + शतृ (कर्तरि) ।
	मतम्	मन् (मन - ज्ञाने) + क्त (कर्तरि) ।
	विमूढान्	वि + मुह् (मुह वैचित्ये) + क्त (कर्तरि), तान् ।
	नष्टान्	नश् (णश अदर्शने) + क्त, (कर्तरि) तान् ।

भावस्पष्टीकरणम् -

न अनुतिष्ठन्ति ।	
के न अनुतिष्ठन्ति ?	**अभ्यसूयन्तः** न अनुतिष्ठन्ति ।
अभ्यसूयन्तः **किं** न अनुतिष्ठन्ति ?	अभ्यसूयन्तः **मतं** न अनुतिष्ठन्ति ।
अभ्यसूयन्तः **किं** मतं न अनुतिष्ठन्ति ?	अभ्यसूयन्तः **एतत्** मतं न अनुतिष्ठन्ति ।
अभ्यसूयन्तः **कस्य** एतत् मतं न अनुतिष्ठन्ति ?	अभ्यसूयन्तः **मे** एतत् मतं न अनुतिष्ठन्ति ।
ये अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति ते **कीदृशाः** ?	ये अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति **तान् विद्धि** ।
ये अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति तान् **कीदृशान्** विद्धि ?	ये अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति तान् **नष्टान्** विद्धि ।
ये अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति **कीदृशान्** तान् नष्टान् विद्धि ?	ये अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति **सर्वज्ञानविमूढान्** तान् नष्टान् विद्धि ।

ये अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति सर्वज्ञानविमूढान् **पुनश्च कीदृशान्** तान् नष्टान् विद्धि ?	ये अभ्यसूयन्तः मे एतत् मतं न अनुतिष्ठन्ति सर्वज्ञानविमूढान् **अचेतसः** तान् नष्टान् विद्धि।

तात्पर्यम् - ये मानवाः असूयाविष्टाः सन्तः मम अभिप्रायानुगुणं न अनुसरन्ति तान् सर्वान् अविवेकिनः सकलज्ञानशून्यान् च मृतानेव जानीहि।

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति॥३.३३॥

पदच्छेदः - सदृशम्, चेष्टते, स्वस्याः, प्रकृतेः, ज्ञानवान्, अपि।
प्रकृतिम्, यान्ति, भूतानि, निग्रहः, किम्, करिष्यति॥

अन्वयः - ज्ञानवान् अपि प्रकृतेः सदृशं चेष्टते। भूतानि प्रकृतिं यान्ति। निग्रहः किं करिष्यति।

पदार्थः - ज्ञानवान् अपि = ज्ञानसम्पन्नः अपि, प्रकृतेः = स्वभावस्य, सदृशम् = अनुरूपम्, चेष्टते = कुरुते, भूतानि = प्राणिनः, प्रकृतिम् = स्वभावम्, यान्ति = उपगच्छन्ति, निग्रहः = निषेधः, किं करिष्यति = किं वा विधास्यति ?

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
ज्ञानवान्	ज्ञानवत्- त. पुं. प्र. एक. (विशेषणम्)	अपि	अव्ययम्
प्रकृतेः	इ. स्त्री. ष. एक.	सदृशम्	क्रियाविशेषणम्
चेष्टते	चेष्ट् (चेष्ट चेष्टायाम्) आत्म. कर्तरि लट्.प्रपु. एक.	भूतानि	अ. नपुं. प्र. बहु.
प्रकृतिम्	इ. स्त्री. द्वि. एक.	यान्ति	या (या प्रापणे) पर. कर्तरि लट्. प्रपु. बहु.
निग्रहः	अ. पुं. प्र. एक.	किम्	किम्- म. सर्व. नपुं. द्वि. एक.
करिष्यति	कृ (डुकृञ् करणे) पर. कर्तरि लृट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः	प्रकृतेर्ज्ञानवान्	प्रकृतेः + ज्ञानवान्	विसर्गसन्धिः (रेफः)।
(ख) कृदन्तः	प्रकृतेः	प्र + कृ (डुकृञ् करणे) + क्तिन्, तस्य।	
	भूतानि	भू (भू सत्तायाम्) + क्त (कर्तरि)।	
	निग्रहः	नि + ग्रह् (ग्रह उपादाने) अप्। (नियमेन ग्रहणमिति)।	
(ग) तद्धितान्तः	ज्ञानवान्	ज्ञान + मतुप्। ज्ञानम् अस्य अस्मिन् वा अस्ति।	

भावस्पष्टीकरणम् -

चेष्टते ।	
कीदृशं चेष्टते ?	**सदृशं** चेष्टते ।
कस्याः सदृशं चेष्टते	**प्रकृतेः** सदृशं चेष्टते ।
कीदृश्याः प्रकृतेः सदृशं चेष्टते ?	**स्वस्याः** प्रकृतेः सदृशं चेष्टते ।
कः स्वस्याः प्रकृतेः सदृशं चेष्टते ?	**ज्ञानवान् अपि** स्वस्याः प्रकृतेः सदृशं चेष्टते ।
यान्ति ।	
कां यान्ति ?	**प्रकृतिं** यान्ति ।
कानि प्रकृतिं यान्ति ?	**भूतानि** प्रकृतिं यान्ति ।
किं करिष्यति ?	
कः किं करिष्यति ?	**निग्रहः** किं करिष्यति ?

तात्पर्यम् - ज्ञानवन्तः अपि जन्मान्तरीयकर्मसंस्कारस्य अनुगुणमेव अस्मिन् जन्मनि प्रवर्तन्ते । किं पुनः मूर्खाः ? तस्मात् सर्वेऽपि मन्दाः स्वभावमेव अनुसरन्ति । तेषां निग्रहः कथञ्चिदपि कर्तुं न शक्यते ।

इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥३.३४॥

पदच्छेदः - इन्द्रियस्य, इन्द्रियस्य, अर्थे, रागद्वेषौ, व्यवस्थितौ ।
तयोः, न, वशम्, आगच्छेत्, तौ, हि, अस्य, परिपन्थिनौ ॥

अन्वयः - इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ । तयोः वशं न आगच्छेत् । तौ हि अस्य परिपन्थिनौ ।

पदार्थः - इन्द्रियस्य इन्द्रियस्य = चक्षुरादीनां ज्ञानेन्द्रियाणां वागादीनां च कर्मेन्द्रियाणाम्, अर्थे = रूपरसादौ वचनस्वीकारादौ च, रागद्वेषौ = रागः द्वेषश्च, व्यवस्थितौ = तिष्ठतः, तयोः = रागद्वेषयोः, वशम् = अधीनताम्, न आगच्छेत् = न प्राप्नुयात्, तौ = रागद्वेषौ, हि = यतः, अस्य = एतस्य मुमुक्षोः, परिपन्थिनौ = प्रतिबन्धकौ ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
इन्द्रियस्य	अ. नपुं. ष. एक.	इन्द्रियस्य	अ. नपुं. ष. एक.
अर्थे	अ. पुं. स. एक.	रागद्वेषौ	अ. पुं. प्र. द्विव. (विशेष्यम्)

व्यवस्थितौ	अ. पुं. प्र. द्विव. (विशेषणम्)	तयोः	तद्- द. सर्व. पुं. ष. द्विव. (विशेषणम्)
वशम्	अ. पुं. द्वि. एक.	न	अव्ययम्
आगच्छेत्	आ + गम् (गम्लृ गतौ) पर. कर्तरि विधिलिङ्. प्रपु. एक.	तौ	तद्- द. सर्व. पुं. प्र. द्विव. (विशेषणम्)
हि	अव्ययम्	अस्य	इदम्. म. सर्व. पुं. ष. एक. (विशेषणम्)
परिपन्थिनौ	परिपन्थिन् - न. पुं. प्र. द्विव. (विशेष्यम्)		

व्याकरणम् -

(क) सन्धिः	इन्द्रियस्येन्द्रियस्य	इन्द्रियस्य + इन्द्रियस्य	गुणसन्धिः ।
	इन्द्रियस्यार्थे	इन्द्रियस्य + अर्थे	सवर्णदीर्घसन्धिः ।
	तयोर्न	तयोः + न	विसर्गसन्धिः (रेफः) ।
	ह्यस्य	हि + अस्य	यण्सन्धिः ।
(ख) समासः	रागद्वेषौ	रागश्च द्वेषश्च रागद्वेषौ - द्वन्द्वः ।	
(ग) कृदन्तः	व्यवस्थितौ	वि + अव + स्था (ष्ठा गतिनिवृत्तौ) + क्त (कर्तरि) ।	
	रागः	रञ्ज् (रञ्ज रागे) + घञ् ।	
	द्वेषः	द्विष् - (द्विष अप्रीतौ) + घञ् ।	
	इन्द्रियस्य इन्द्रियस्य	कात्स्न्र्यस्य गम्यमानत्वात् इन्द्रियशब्दस्य द्वित्वम् । सर्वेषाम् इन्द्रियाणाम् इत्यर्थः ।	

भावस्पष्टीकरणम् -

व्यवस्थितौ ।	
कौ व्यवस्थितौ ?	**रागद्वेषौ** व्यवस्थितौ ।
कुत्र रागद्वेषौ व्यवस्थितौ ?	**अर्थे** रागद्वेषौ व्यवस्थितौ ।
कस्य अर्थे रागद्वेषौ व्यवस्थितौ ?	**इन्द्रियस्य इन्द्रियस्य** अर्थे रागद्वेषौ व्यवस्थितौ ।
इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ **तेन किम्** ?	इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ **तेन न आगच्छेत्** ।
इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तेन **कं** न आगच्छेत् ?	इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तेन **वशं** न आगच्छेत् ।
इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तेन **कयोः** वशं न आगच्छेत् ?	इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तेन **तयोः** वशं न आगच्छेत् ।

इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तेन तयोः वशं न आगच्छेत्। **कुतः** ?	इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तेन तयोः वशं न आगच्छेत्। **तौ हि परिपन्थिनौ।**
इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तेन तयोः वशं न आगच्छेत्। तौ हि **कस्य** परिपन्थिनौ ?	इन्द्रियस्य इन्द्रियस्य अर्थे रागद्वेषौ व्यवस्थितौ तेन तयोः वशं न आगच्छेत्। तौ हि **अस्य** परिपन्थिनौ।

तात्पर्यम् - चक्षुरादीनि ज्ञानेन्द्रियाणि। रूपरसगन्धादयः तेषां विषयाः। वाक्पाण्यादीनि कर्मेन्द्रियाणि। वचनादयः तु तेषां विषयाः। तेषु अनुकूलेषु विषयेषु रागः भवति, प्रतिकूलेषु तु द्वेषः। तस्मात् बुद्धिमान् गुरूपदेशादिना तयोः रागद्वेषयोः यथा अधीनः न भवति तथा प्रयतेत। कुतः ? तौ हि मोक्षं प्राप्तुम् इच्छतः पुरुषस्य कार्यविघातकौ स्तः।

श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥३.३५॥

पदच्छेदः - श्रेयान्, स्वधर्मः, विगुणः, परधर्मात्, स्वनुष्ठितात्।
स्वधर्मे, निधनम्, श्रेयः, परधर्मः, भयावहः ॥

अन्वयः - स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान्। स्वधर्मे निधनं श्रेयः। परधर्मः भयावहः।

पदार्थः - स्वनुष्ठितात् = साधु आचरितात्, परधर्मात् = अन्यधर्मात्, विगुणः = गुणरहितः अपि, स्वधर्मः = आत्मधर्मः, श्रेयान् = श्रेष्ठः, स्वधर्मे = आत्मधर्मे, निधनम् = नाशोऽपि, श्रेयः = वरीयान्, परधर्मः = अन्यधर्मः, भयावहः = भयजनकः।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
स्वनुष्ठितात्	अ. पुं. पं. एक. (विशेषणम्)	परधर्मात्	अ. पुं. पं. एक. (विशेष्यम्)
विगुणः	अ. पुं. प्र. एक. (विशेषणम्)	स्वधर्मः	अ. पुं. प्र. एक. (विशेष्यम्)
श्रेयान्	श्रेयस्- सका. पुं. प्र. एक. (विशेषणम्)	स्वधर्मे	अ. पुं. स. एक.
निधनम्	अ. नपुं. प्र. एक. (विशेष्यम्)	श्रेयः	श्रेयस्- सका. नपुं. प्र. एक. (विशेषणम्)
परधर्मः	अ. पुं. प्र. एक. (विशेष्यम्)	भयावहः	अ. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	स्वधर्मो विगुणः	स्वधर्मः + विगुणः	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः।
	परधर्मो भयावहः	परधर्मः + भयावहः	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः।

(ख) समासः	स्वधर्मः	स्वस्य धर्मः स्वधर्मः - षष्ठीतत्पुरुषः।
	विगुणः	विगतः गुणः यस्मात् सः विगुणः - बहुव्रीहिः।
	परधर्मात्	परेषां धर्मः परधर्मः, तस्मात् - षष्ठीतत्पुरुषः।
(ग) कृदन्तः	स्वनुष्ठितात्	सु + अनु + स्था (ष्ठा - गतिनिवृत्तौ) + क्त (कर्मणि), तस्मात्।
(घ) तद्धितान्तः	श्रेयान्	प्रशस्य / वृद्ध + ईयसुन् ('श्र' इति आदेशः)।

भावस्पष्टीकरणम् -

श्रेयान्।	
कः श्रेयान् ?	**स्वधर्मः** श्रेयान्।
कीदृशः स्वधर्मः श्रेयान् ?	**विगुणः** स्वधर्मः श्रेयान्।
कस्मात् विगुणः स्वधर्मः श्रेयान् ?	**परधर्मात्** विगुणः स्वधर्मः श्रेयान्।
कीदृशात् परधर्मात् विगुणः स्वधर्मः श्रेयान् ?	**स्वनुष्ठितात्** परधर्मात् विगुणः स्वधर्मः श्रेयान्।
स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान् **तेन किम्** ?	स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान् (तेन) **श्रेयः**।
स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान्। तेन **किं** श्रेयः ?	स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान्। तेन **निधनं** श्रेयः।
स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान्। तेन **कुत्र** निधनं श्रेयः ?	स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान्। तेन **स्वधर्मे** निधनं श्रेयः।
स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान्। तेन स्वधर्मे निधनं श्रेयः। परधर्मः **कीदृशः** ?	स्वनुष्ठितात् परधर्मात् विगुणः स्वधर्मः श्रेयान्। तेन स्वधर्मे निधनं श्रेयः। परधर्मः **भयावहः**।

तात्पर्यम् - परधर्माचरणस्य अपेक्षया स्वधर्माचरणम् उत्तमम्। स्वधर्मे नाशोऽपि श्रेयः। परधर्मः तु नाशाय एव।
(अतः भवान् क्षत्रियधर्मस्य रक्षणाय युद्धं करोतु।)

अर्जुन उवाच - अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥३.३६॥

पदच्छेदः -

अर्जुनः, उवाच - अथ, केन, प्रयुक्तः, अयम्, पापम्, चरति, पूरुषः।
अनिच्छन्, अपि, वार्ष्णेय, बलात्, इव, नियोजितः ॥

अन्वयः - वार्ष्णेय ! अथ केन प्रयुक्तः अनिच्छन् अपि बलात् इव नियोजितः अयं पूरुषः पापं चरति।

पदार्थः - वार्ष्णेय = वृष्णिकुलसम्भव ! अथ = एवं हि, केन = केन हेतुना, प्रयुक्तः = प्रेरितः, अनिच्छन्नपि = अनभिलषन् अपि, बलात् इव = हठात् इव, नियोजितः = प्रवर्तितः, अयं पूरुषः = एषः मानवः, पापं चरति = अकर्मणि प्रवर्तते ?

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
वार्ष्णेय	अ. पुं. सम्बो. एक.	अथ	अव्ययम्
केन	किम्- म. सर्व. पुं. तृ. एक. (विशेषणम्)	प्रयुक्तः	अ. पुं. प्र. एक. (विशेषणम्)
अनिच्छन्	अनिच्छत्- त. पुं. प्र. एक. (विशेषणम्)	अपि	अव्ययम्
बलात्	अव्ययम्	इव	अव्ययम्
नियोजितः	अ. पुं. प्र. एक. (विशेषणम्)	अयम्	इदम्- म. सर्व. पुं. प्र. एक. (विशेषणम्)
पूरुषः	अ. पुं. प्र. एक. (विशेष्यम्)	पापम्	अ. नपुं. द्वि. एक.
चरति	चर् (चर गतिभक्षणयोः) पर. कर्तरि लट्. प्रपु. एक.		

व्याकरणम् -

(क) सन्धिः
- प्रयुक्तोऽयम् — प्रयुक्तः + अयम् — विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः, पूर्वरूपं च ।
- अनिच्छन्नपि — अनिच्छन् + अपि — ङमुडागमसन्धिः ।
- बलादिव — बलात् + इव — जश्त्वसन्धिः ।

(ख) समासः अनिच्छन् — न इच्छन् अनिच्छन् - नञ्तत्पुरुषः ।

(ग) कृदन्तः
- प्रयुक्तः — प्र + युज् (युजिर् - योगे) + क्त (कर्मणि) ।
- इच्छन् — इष् (इषु - इच्छायाम्) शतृ (कर्तरि) ।
- नियोजितः — नि + युज् (युजिर् - योगे) + क्त (कर्मणि) ।

(घ) तद्धितान्तः वार्ष्णेय — वृष्णि + ढक् (अपत्यार्थे 'एय' इत्यादेशः) ।

भावस्पष्टीकरणम् -

चरति ।	
कः चरति ?	**पूरुषः** चरति ।
कः पूरुषः चरति ?	**अयं** पूरुषः चरति ।
अयं पूरुषः **किं** चरति ?	अयं पूरुषः **पापं** चरति ।

अयं पूरुषः **कीदृशः** पापं चरति ?	अयं पूरुषः **नियोजितः** पापं चरति।
अयं पूरुषः **कस्मादिव** नियोजितः पापं चरति ?	अयं पूरुषः **बलादिव** नियोजितः पापं चरति।
अयं पूरुषः **किं कुर्वन्नपि** बलादिव नियोजितः पापं चरति ?	अयं पूरुषः **अनिच्छन्नपि** बलादिव नियोजितः पापं चरति।
कथम्भूतः अयं पूरुषः अनिच्छन्नपि बलादिव नियोजितः पापं चरति ?	**प्रयुक्तः** अयं पूरुषः अनिच्छन्नपि बलादिव नियोजितः पापं चरति।
अनेन प्रयुक्तः अयं पूरुषः अनिच्छन्नपि बलादिव नियोजितः पापं चरति।	**अथ केन** प्रयुक्तः अयं पूरुषः अनिच्छन्नपि बलादिव नियोजितः पापं चरति ?
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**वार्ष्णेय** !

तात्पर्यम् - हे कृष्ण ! अनभिलषन् (अनिच्छन्) अपि मानवः राज्ञा नियोजितः भृत्यः इव केन प्रेरितः सन् बलात् पापम् आचरति ?

श्रीभगवानुवाच - **काम एष क्रोध एष रजोगुणसमुद्भवः।**
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्॥३.३७॥

पदच्छेदः -

श्रीभगवान्, उवाच - कामः, एषः, क्रोधः, एषः, रजोगुणसमुद्भवः।
महाशनः, महापाप्मा, विद्धि, एनम्, इह, वैरिणम्॥

अन्वयः - एषः कामः एषः क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा च (अस्ति)। (तेन) इह एनं वैरिणं विद्धि।

पदार्थः - एषः कामः = अयम् अभिलाषः, एषः क्रोधः = अयं रोषः, रजोगुणसमुद्भवः = रजोगुणात् समुत्पन्नः, महाशनः = महाभोजनः, महापाप्मा च = महापापः च, इह = अत्र, एनम् = अमुम्, वैरिणम् = शत्रुम्, विद्धि = जानीहि।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
एषः	एतद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	कामः	अ. पुं. प्र. एक. (विशेष्यम्)
क्रोधः	अ. पुं. प्र. एक. (विशेष्यम्)	रजोगुणसमुद्भवः	अ. पुं. प्र. एक.
महाशनः	अ. पुं. प्र. एक.	महापाप्मा	महापाप्मन्- न. पुं. प्र. एक.
च	अव्ययम्	इह	अव्ययम्

एनम्	एतद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	वैरिणम्	वैरिन्- न. पुं. द्वि. एक.
विद्धि	विद् (विद - ज्ञाने) पर. कर्तरि लोट्. मपु. एक.		

व्याकरणम् -

(क) सन्धिः	काम एषः	कामः + एषः	विसर्गसन्धिः (लोपः) ।
	एष क्रोधः	एषः + क्रोधः	विसर्गसन्धिः (लोपः) ।
	क्रोध एषः	क्रोधः + एषः	विसर्गसन्धिः (लोपः) ।
	महाशनो महापाप्मा	महाशनः + महापाप्मा	विसर्गसन्धिः, (सकारः) रेफः, उकारः, गुणः ।
	विद्ध्येनम्	विद्धि + एनम्	यण्सन्धिः ।

(ख) समासः	रजोगुणसमुद्भवः	रजः गुणः रजोगुणः - कर्मधारयः ।
		रजोगुणात् समुद्भवः रजोगुणसमुद्भवः - पञ्चमीतत्पुरुषः ।
	महाशनः	महत् अशनं यस्य सः महाशनः - बहुव्रीहिः ।
	महापाप्मा	महत् पाप्म यस्मिन् सः महापाप्मा - बहुव्रीहिः ।
(ग) कृदन्तः	कामः	कम् (कमु कान्तौ) + घञ् ।
	क्रोधः	क्रुध् (क्रुध क्रोधे) + घञ् ।
	समुद्भवः	सम् + उद् + भू (भू - सत्तायाम्) + अप् । (उद्भवतीति अस्मात्) ।
	अशनम्	अश् (अश - भोजने) + ल्युट् ।
(घ) तद्धितान्तः	वैरिणम्	वैर् + इनि (मतुबर्थे) । वैरम् अस्य अस्मिन् वा अस्ति इत्यर्थः ।

भावस्पष्टीकरणम् -

एषः ।	
एषः **कः** ?	एषः **कामः** ।
एषः कामः । एषः **पुनश्च कः** ?	एषः कामः । **एषः क्रोधः** ।
एषः कामः । एषः (एव च) क्रोधः **कीदृशः** ?	एषः कामः । एषः (एव च) क्रोधः **रजोगुणसमुद्भवः** ।
एषः कामः । एषः एव च क्रोधः रजोगुणसमुद्भवः, **पुनश्च कीदृशः** ?	एषः कामः । एषः एव च क्रोधः रजोगुणसमुद्भवः **महाशनः** ।
एषः कामः । एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः **पुनश्च कीदृशः** ?	एषः कामः । एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः **महापाप्मा** ।
एषः कामः । एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा । **तेन किम्** ?	एषः कामः । एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा । (तेन) **विद्धि** ।

एषः कामः। एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा। तेन **कं** विद्धि ?	एषः कामः। एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा। तेन **एनं** विद्धि।
एषः कामः। एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा। तेन एनं **कीदृशं** विद्धि ?	एषः कामः। एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा। तेन एनं **वैरिणं** विद्धि।
एषः कामः। एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा। (तेन) **कुत्र** एनं वैरिणं विद्धि ?	एषः कामः। एषः एव च क्रोधः रजोगुणसमुद्भवः महाशनः महापाप्मा। तेन **इह** एनं वैरिणं विद्धि।

तात्पर्यम् - अयं विषयाभिलाषः। विषयाभिलाषस्य प्रतिरोधे सति अयमेव क्रोधः इति उच्यते। अस्य उत्पत्तिः रजोगुणात् भवति। अनेन पुरुषः अपरिमितानि वस्तूनि प्राप्तुम् इच्छति इति कारणात् अयं महाशनः। अनेन एव कारणेन अपरिमितं पापं च करोति इति, अतः अयं महापाप्मा इति उच्यते। अनेन एव प्रेरितः पुरुषः पापम् अवाप्नोति इति अतः एनं वैरिणं भावय।

धूमेनाव्रियते वह्निर्यथादर्शो मलेन च।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम्॥३.३८॥

पदच्छेदः - धूमेन, आव्रियते, वह्निः, यथा, आदर्शः, मलेन, च।
यथा, उल्बेन, आवृतः, गर्भः, तथा, तेन, इदम्, आवृतम्॥

अन्वयः - यथा धूमेन वह्निः आव्रियते। यथा मलेन आदर्शः, यथा उल्बेन च गर्भः, तथा इदं (ज्ञानम्) तेन आवृतम्।

पदार्थः - यथा = येन प्रकारेण, धूमेन = धूमेन, वह्निः = अग्निः, आव्रियते = आवृतः भवति, यथा = येन प्रकारेण, मलेन = रजसा, आदर्शः = दर्पणः, यथा = येन प्रकारेण, उल्बेन = गर्भाविष्टेन चर्मणा, गर्भः = पिण्डः, तथा = तेन प्रकारेण, इदम् = ज्ञानम्, तेन = कामेन, आवृतम् = आच्छादितम्।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
यथा	अव्ययम्	धूमेन	अ. पुं. तृ. एक.
वह्निः	इ. पुं. प्र. एक.	आव्रियते	आ + वृ (वृञ् वरणे) आत्म. कर्मणि लट्. प्रपु. एक.
मलेन	अ. नपुं. तृ. एक.	आदर्शः	अ. पुं. प्र. एक.
उल्बेन	अ. नपुं. तृ. एक.	गर्भः	अ. पुं. प्र. एक.

तथा	अव्ययम्	इदम्	इदम् - म. सर्व. नपुं. प्र. एक. (विशेषणम्)
तेन	तद्- द. नपुं. तृ. एक. (विशेषणम्)	आवृतम्	अ. नपुं. प्र. एक.

व्याकरणम् -

(क) सन्धिः	धूमेनाव्रियते	धूमेन + आव्रियते	सवर्णदीर्घसन्धिः ।
	वह्निर्यथा	वह्निः + यथा	विसर्गसन्धिः (रेफः) ।
	यथादर्शः	यथा + आदर्शः	सवर्णदीर्घसन्धिः ।
	आदर्शो मलेन	आदर्शः + मलेन	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	यथोल्बेन	यथा + उल्बेन	गुणसन्धिः ।
	उल्बेनावृतः	उल्बेन + आवृतः	सवर्णदीर्घसन्धिः ।
	आवृतो गर्भः	आवृतः + गर्भः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
	गर्भस्तथा	गर्भः + तथा	विसर्गसन्धिः (सकारः) ।
	तेनेदम्	तेन + इदम्	गुणसन्धिः ।
(ख) कृदन्तः	आदर्शः	आङ् + दृश् (दृशिर् प्रेक्षणे) + घञ् ।	
	आवृतम्	आङ् + वृ (वृञ् वरणे) + क्त (कर्मणि) ।	

भावस्पष्टीकरणम् -

आव्रियते ।	
वह्निः **केन** आव्रियते ?	वह्निः **धूमेन** आव्रियते ।
आदर्शः **केन** आव्रियते ? ?	आदर्शः **मलेन** आव्रियते ?
गर्भः **केन** आव्रियते ?	गर्भः **उल्बेन** आव्रियते ।
धूमेन वह्निः आव्रियते मलेन आदर्शः आव्रियते उल्बेन च गर्भःआव्रियते **तथैव किम् आवृतम्** अस्ति ?	धूमेन वह्निः आव्रियते मलेन आदर्शः आव्रियते उल्बेन च गर्भःआव्रियते **तथैव तेन इदं ज्ञानम् आवृतम्** अस्ति ।

तात्पर्यम् - येन प्रकारेण धूमेन अग्निः, रजसाः दर्पणः, यथा च गर्भवेष्टनेन चर्मणा गर्भः आच्छादितः भवति तथैव कामेन ज्ञानम् आच्छादितम् अस्ति ।

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥३.३९॥

पदच्छेदः - आवृतम्, ज्ञानम्, एतेन, ज्ञानिनः, नित्यवैरिणा ।
कामरूपेण, कौन्तेय, दुष्पूरेण, अनलेन, च ॥

अन्वयः - कौन्तेय ! ज्ञानिनः नित्यवैरिणा कामरूपेण दुष्पूरेण अनलेन च एतेन ज्ञानम् आवृतम् ।

पदार्थः - कौन्तेय = कुन्तीपुत्र अर्जुन ! ज्ञानिनः = विदुषः, नित्यवैरिणा = नित्यशत्रुणा, कामरूपेण = इच्छारूपेण, दुष्पूरेण = पूरयितुम् अशक्येन, अनलेन च = अग्निना च, एतेन = अनेन, ज्ञानम् = ज्ञानम्, आवृतम् = आच्छादितम् ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
कौन्तेय	अ. पुं. सम्बो. एक.	ज्ञानिनः	ज्ञानिन्- न. पुं. ष. एक.
नित्यवैरिणा	नित्यवैरिन्- न. पुं. तृ. एक. (विशेषणम्)	कामरूपेण	अ. पुं. तृ. एक. (विशेषणम्)
दुष्पूरेण	अ. पुं. तृ. एक. (विशेषणम्)	अनलेन	अ. पुं. तृ. एक. (विशेष्यम्)
च	अव्ययम्	एतेन	एतद्- द. सर्व. पुं. तृ. एक. (विशेषणम्)
ज्ञानम्	अ. नपुं. प्र. एक. (विशेष्यम्)	आवृतम्	अ. नपुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः ज्ञानिनो नित्यवैरिणा — ज्ञानिनः + नित्यवैरिणा — विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
दुष्पूरेणानलेन — दुष्पूरेण + अनलेन — सवर्णदीर्घसन्धिः ।

(ख) समासः नित्यवैरिणा — नित्यं वैरी नित्यवैरी, तेन - सुप्समासः ।
कामरूपेण — कामेन रूपाणि यस्य सः कामरूपः, तेन - बहुव्रीहिः ।

(ग) कृदन्तः आवृतम् — आ + वृ (वृञ् वरणे) क्त (कर्मणि) ।
ज्ञानम् — ज्ञा (ज्ञा अवबोधने) + ल्युट् ।

(घ) तद्धितान्तः ज्ञानिनः — ज्ञान + इनि (मतुबर्थे) ज्ञानम् अस्य अस्मिन् वा अस्ति, तस्य ।
वैरी — वैर + इनि (मतुबर्थे) वैरम् अस्य अस्मिन् वा अस्ति ।
कौन्तेय — कुन्ती + ढक् (अपत्यार्थे 'एय' इत्यादेशः) तत्सम्बुद्धौ, कुन्त्याः अपत्यं पुमान् ।

भावस्पष्टीकरणम् -

आवृतम् ।	
केन आवृतम् ?	**एतेन** आवृतम् ।
कीदृशेन एतेन आवृतम् ?	**नित्यवैरिणा** एतेन आवृतम् ।
कस्य नित्यवैरिणा एतेन आवृतम् ?	**ज्ञानिनः** नित्यवैरिणा एतेन आवृतम् ।

ज्ञानिनः नित्यवैरिणा **पुनश्च कीदृशेन** एतेन आवृतम् ?	ज्ञानिनः नित्यवैरिणा **कामरूपेण** एतेन आवृतम् ।
ज्ञानिनः नित्यवैरिणा कामरूपेण **पुनश्च कीदृशेन** एतेन आवृतम् ?	ज्ञानिनः नित्यवैरिणा कामरूपेण **दुष्पूरेण** एतेन आवृतम् ।
ज्ञानिनः नित्यवैरिणा कामरूपेण दुष्पूरेण **पुनश्च कीदृशेन** एतेन आवृतम् ?	ज्ञानिनः नित्यवैरिणा कामरूपेण दुष्पूरेण **अनलेन च** एतेन आवृतम् ।
ज्ञानिनः नित्यवैरिणा कामरूपेण दुष्पूरेण अनलेन च एतेन **किम्** आवृतम् ?	ज्ञानिनः नित्यवैरिणा कामरूपेण दुष्पूरेण अनलेन च एतेन **ज्ञानम्** आवृतम् ।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**कौन्तेय** !

तात्पर्यम् - हे अर्जुन ! एषः कामः ज्ञानिनां वैरी अस्ति । विषयैः पूरयतुं न शक्यते । एषः अग्निः इव अस्ति । एतादृशः कामः ज्ञानम् आवृत्य तिष्ठति ।

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥३.४०॥

पदच्छेदः - इन्द्रियाणि, मनः, बुद्धिः, अस्य, अधिष्ठानम्, उच्यते ।
एतैः, विमोहयति, एषः, ज्ञानम्, आवृत्य, देहिनम् ॥

अन्वयः - इन्द्रियाणि मनः बुद्धिः च अस्य अधिष्ठानम् उच्यते । एषः (कामः) एतैः ज्ञानम् आवृत्य देहिनम् विमोहयति ।

पदार्थः - इन्द्रियाणि = नेत्रादीनि, मनः = चित्तम्, बुद्धिः च = धीः च, अस्य = एतस्य कामस्य, अधिष्ठानम् = आश्रयः, उच्यते = कथ्यते, एषः = एषः कामः, एतैः = एभिः, ज्ञानम् = ज्ञानम्, आवृत्य = आच्छाद्य, देहिनम् = शरीरिणम्, विमोहयति = मोहयति ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
इन्द्रियाणि	अ. नपुं. प्र. बहु.	मनः	मनस्- सका. नपुं. प्र. एक.
बुद्धिः	इ. स्त्री. प्र. एक.	अस्य	इदम्- म. सर्व. पुं. ष. एक. (विशेषणम्)
अधिष्ठानम्	अ. नपुं. प्र. एक.	उच्यते	वच् (वच परिभाषणे) पर. कर्मणि लट्, प्रपु. एक.
एषः	एतद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	एतैः	एतद्- द. सर्व. नपुं. तृ. बहु.

ज्ञानम्	अ. नपुं. द्वि. एक.	आवृत्य	ल्यबन्तम् अव्ययम्
देहिनम्	देहिन्- न. पुं. द्वि. एक.	विमोहयति	वि + मुह् (मुह वैचित्ये) + णिच्, कर्तरि लट्, प्रपु. एक.

व्याकरणम् -

(क) सन्धिः	मनो बुद्धिः	मनः + बुद्धिः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः।
	बुद्धिरस्य	बुद्धिः + अस्य	विसर्गसन्धिः (रेफः)।
	अस्याधिष्ठानम्	अस्य + अधिष्ठानम्	सवर्णदीर्घसन्धिः।
	एतैर्विमोहयति	एतैः + विमोहयति	विसर्गसन्धिः (रेफः)।
	विमोहयत्येषः	विमोहयति + एषः	यण्सन्धिः।
	एष ज्ञानम्	एषः + ज्ञानम्	विसर्गसन्धिः (लोपः)।
(ख) कृदन्तः	बुद्धिः	बुध् (बुध अवगमने) + क्तिन्।	
	अधिष्ठानम्	अधि + स्था (ष्ठा गतिनिवृत्तौ) + ल्युट्, (अधिकरणे)।	
	ज्ञानम्	ज्ञा (ज्ञा अवबोधने) + ल्युट्।	
	आवृत्य	आ + वृ (वृञ् वरणे) + ल्यप्।	

भावस्पष्टीकरणम् -

उच्यते।	
किम् उच्यते ?	**अधिष्ठानम्** उच्यते।
कस्य अधिष्ठानम् उच्यते	**अस्य** अधिष्ठानम् उच्यते।
कानि च अस्य अधिष्ठानम् उच्यते ?	**इन्द्रियाणि मनः बुद्धिः च** अस्य अधिष्ठानम् उच्यते।
विमोहयति।	
कं विमोहयति ?	**देहिनं** विमोहयति।
किं कृत्वा देहिनं विमोहयति ?	**आवृत्य** देहिनं विमोहयति।
किम् आवृत्य देहिनं विमोहयति ?	**ज्ञानम्** आवृत्य देहिनं विमोहयति।
कैः ज्ञानम् आवृत्य देहिनं विमोहयति ?	**एतैः** ज्ञानम् आवृत्य देहिनं विमोहयति।
कः एतैः ज्ञानम् आवृत्य देहिनं विमोहयति	**एषः (कामः)** एतैः ज्ञानम् आवृत्य देहिनं विमोहयति।

तात्पर्यम् - पञ्चेन्द्रियाणि, मनः, बुद्धिः च कामस्य आश्रयाः सन्ति। एषः कामः एभिः पञ्चभिः इन्द्रियैः ज्ञानम् आच्छाद्य शरीरिणं विमोहयति।

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ॥३.४१॥

पदच्छेदः - तस्मात्, त्वम्, इन्द्रियाणि, आदौ, नियम्य, भरतर्षभ ।
पाप्मानम्, प्रजहि, हि, एनम्, ज्ञानविज्ञाननाशनम् ॥

अन्वयः - भरतर्षभ ! तस्मात् त्वम् आदौ इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनं पाप्मानम् एनं प्रजहि ।

पदार्थः - भरतर्षभ = भरतश्रेष्ठ ! तस्मात् = तेन हेतुना, त्वम् = त्वम्, आदौ = प्रथमम्, इन्द्रियाणि = नेत्रादीनि, नियम्य = निगृह्य, ज्ञानविज्ञाननाशनम् = समस्तज्ञानविज्ञाननाशनम्, एनम् = इमम्, पाप्मानम् = पापम्, प्रजहि = त्यज ।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
भरतर्षभ	अ. पुं. सम्बो. एक.	तस्मात्	तद्- द. सर्व. पुं. पं. एक (विशेष्यम्)
त्वम्	युष्मद्- द. सर्व. प्र. एक.	आदौ	इ. पुं. स. एक.
इन्द्रियाणि	अ. नपुं. द्वि. बहु.	नियम्य	ल्यबन्तम् अव्ययम्
ज्ञानविज्ञाननाशनम्	अ. पुं. द्वि. एक. (विशेषणम्)	पाप्मानम्	पाप्मन्- न. पुं. द्वि. एक. (विशेष्यम्)
एनम्	एतद्- द. सर्व. पुं. द्वि. एक. (विशेषणम्)	प्रजहि	प्र + हन् (हन हिंसागत्योः) पर. कर्तरि लोट्. मपु. एक

व्याकरणम् -

(क) सन्धिः इन्द्रियाण्यादौ — इन्द्रियाणि + आदौ — यण्सन्धिः ।
ह्येनम् — हि + एनम् — यण्सन्धिः ।

(ख) समासः ज्ञानविज्ञाननाशनम् — ज्ञानं च विज्ञानं च ज्ञानविज्ञाने - द्वन्द्वः
ज्ञानविज्ञानयोः नाशनं ज्ञानविज्ञाननाशनम्, तत् - षष्ठीतत्पुरुषः ।

(ग) कृदन्तः नियम्य — नि + यम् (यम उपरमे) + ल्यप् ।
विज्ञानम् — वि + ज्ञा (ज्ञा अवबोधने) + ल्युट् ।
नाशनम् — नश् (णश अदर्शने) णिच् + ल्युट् ।

भावस्पष्टीकरणम् -

प्रजहि ।	
कः प्रजहि ?	**त्वं** प्रजहि ।

त्वं **कं** प्रजहि ?	त्वम् **एनं** प्रजहि।
त्वं **कीदृशम्** एनं प्रजहि ?	त्वं **पाप्मानम्** एनं प्रजहि।
त्वं पुनः **कीदृशं** पाप्मानम् एनं प्रजहि ?	त्वं **ज्ञानविज्ञाननाशनं** पाप्मानम् एनं प्रजहि।
त्वं **किं कृत्वा** ज्ञानविज्ञाननाशनं पाप्मानम् एनं प्रजहि ?	त्वं **नियम्य** ज्ञानविज्ञाननाशनं पाप्मानम् एनं प्रजहि।
त्वं **कानि** नियम्य ज्ञानविज्ञाननाशनं पाप्मानम् एनं प्रजहि ?	त्वम् **इन्द्रियाणि** नियम्य ज्ञानविज्ञाननाशनं पाप्मानम् एनं प्रजहि।
त्वं **कदा** इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनं पाप्मानम् एनं प्रजहि ?	त्वम् **आदौ** इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनं पाप्मानम् एनं प्रजहि।
कस्मात् त्वम् आदौ इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनं पाप्मानम् एनं प्रजहि ?	**तस्मात्** त्वम् आदौ इन्द्रियाणि नियम्य ज्ञानविज्ञाननाशनं पाप्मानम् एनं प्रजहि।
अस्मिन् श्लोके सम्बोधनपदं किम् ?	**भरतर्षभ** !

तात्पर्यम् - अर्जुन ! अतः भवान् पूर्वं सर्वाणि इन्द्रियाणि संयम्य समस्तविज्ञाननाशकम् एतत् पापं परित्यजतु।

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥३.४२॥

पदच्छेदः - इन्द्रियाणि, पराणि, आहुः, इन्द्रियेभ्यः, परम्, मनः।
मनसः, तु, परा, बुद्धिः, यः, बुद्धेः, परतः, तु, सः ॥

अन्वयः इन्द्रियाणि पराणि आहुः। इन्द्रियेभ्यः परं मनः, मनसः तु परा बुद्धिः, यः बुद्धेः तु परतः सः (आत्मा) अस्ति।

पदार्थः इन्द्रियाणि = नेत्रादीनि, पराणि = उत्कृष्टानि, आहुः = कथयन्ति, इन्द्रियेभ्यः = नेत्रादिभ्यः, परम् = उत्कृष्टम्, मनः तु = चित्तं पुनः, मनसः = चित्तात्, परा = उत्कृष्टा, बुद्धिः = धीः, यः बुद्धेः तु = यः धियः तु, परतः = उत्कृष्टः वर्तते, सः = सः आत्मा।

पदपरिचयः -

पदम्	विवरणम्	पदम्	विवरणम्
इन्द्रियाणि	अ. नपुं. प्र. बहु. (विशेष्यम्)	पराणि	अ. नपुं. प्र. बहु. (विशेषणम्)
आहुः	ब्रू (ब्रूञ् - व्यक्तायां वाचि) पर. कर्तरि लट्. प्रपु. बहु.	इन्द्रियेभ्यः	अ. नपुं. पं. बहु.

परम्	अ. नपुं. प्र. एक. (विशेषणम्)	मनः	अ. नपुं. प्र. एक. (विशेष्यम्)
मनसः	अ. नपुं. पं. एक.	तु	अव्ययम्
परा	आ. स्त्री. प्र. एक. (विशेषणम्)	बुद्धिः	इ. स्त्री. प्र. एक. (विशेष्यम्)
यः	यद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)	बुद्धेः	इ. स्त्री. पं. एक.
परतः	अव्ययम्	सः	तद्- द. सर्व. पुं. प्र. एक. (विशेषणम्)

व्याकरणम् -

(क) सन्धिः	पराण्याहुः	पराणि + आहुः	यण्सन्धिः ।
	आहुरिन्द्रियेभ्यः	आहुः + इन्द्रियेभ्यः	विसर्गसन्धिः (रेफः) ।
	मनसस्तु	मनसः + तु	विसर्गसन्धिः (सकारः) ।
	बुद्धिर्यः	बुद्धिः + यः	विसर्गसन्धिः (रेफः) ।
	यो बुद्धेः	यः + बुद्धेः	विसर्गसन्धिः (सकारः) रेफः, उकारः, गुणः ।
